R S V L
00988
178/XXII
988

Registered No. M 2300.

Book XXII ॥ श्रीः ॥ Nos. 1 & 2

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २२] कलि ५०४९ सर्वधारि ‖ कन्या तुला { साधारण सं १ शास्त्रानुबन्ध-सं १ आहत्य ,, २

# THE UDYANA PATRIKA.

A SANSKRIT MONTHLY

September & October 1948

## विषयाः ॥

A21

शास्त्रानुबन्धः—
कुवलयानन्दः। [बुधरञ्जनीसमेतः] २५३—२६०

1 मेनका।
2 सुभाषितनीवी।
3 धर्मवीरता।
4 नाटककथासारः।
5 जाजलिचरित्रम्।
6 प्रकृतिभेदः।
7 यथाभिमतम् [नाटकम्]
8 वृक्षाः।
9 प्रतिबोधनम्-wrapper

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.**
Lecturer, Sri Venkateswara College,
TIRUPATI.

वाक्यार्थविन्यसनरूपात्परिकरात्काव्यलिङ्गस्य किं भेदकम्। उच्यते। परिकरे पदार्थवाक्यार्थबलात् प्रतीयमानोऽर्थो वाच्योपस्कारकतां भजते। काव्यलिङ्गे तु पदार्थवाक्यार्थावेव हेतुभावं भजतः। ननु यद्यपि 'सुखालोकोच्छेदिनि' इत्यादिपदार्थहेतुककाव्यलिङ्गोदाहरणे 'अग्रेऽप्यनतिमान्' इत्यादिवाक्यार्थहेतुककाव्यलिङ्गोदाहरणे च पदार्थवाक्यार्थावेव हेतुभावं भजतः। तथाऽपि 'पशुनाप्यपुरस्कृतेन' इति पदार्थहेतुकोदाहरणे 'मच्चित्तेऽस्ति त्रिलोचनः' इति वाक्यार्थहेतुकोदाहरणे च प्रतीयमानार्थस्यापि हेतुकोट्यनुप्रवेशो दृश्यते। 'पशुना' इति ह्यविवेकित्वाभिप्रायगर्भम्। 'विदुषी' इत्यस्य प्रतिनिर्देश(शो)त्वात्। 'त्रिलोचनः' इति च कन्दर्पदाहकतृतीयलोचनत्वाभिप्रायगर्भम्। कन्दर्पजयोपयोगित्वात्तस्य। सत्यम्। तथापि न तयोः परिकराङ्कुर एव। किं तु तदुत्थापितं काव्यलिङ्गमपि। प्रतीयमानाविवेकित्वविशिष्टेन पशुनाप्यपुरस्कृतत्वस्यानेकपदार्थस्य प्रतीयमानकन्दर्पदाहकभावतृतीयलोचनविशिष्टस्य शिवस्य चित्ते सन्निधानस्य वाक्यार्थस्य च वाच्यस्यैव हेतुभावात्। न हि तयोर्वाच्ययोर्हेतुभावे ताभ्यां प्रतीयमानं मध्ये किञ्चिद्द्वारमस्ति। यथा 'सर्वाशुचिनिधानस्य' इत्यादिपदार्थपरिकरोदाहरणे 'सर्वाशुचिनिधानस्य' इत्यादिनानेकेन पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वम्। यथा च वाक्यार्थपरिकरोदाहरणेऽपि पर्यायोक्तविधया तत्तद्वाक्यार्थेन प्रतीयमानं 'नाहं व्यासः' इत्यादि। 'तस्मात्पशुना' इत्यत्र 'त्रिलोचनः'

---

व्यवस्थापयति— उच्यत इति। व्यवस्था[म]प्याक्षिपति— नन्विति। प्रतीयमानार्थस्यापीति। साभिप्रायविशेष्यविन्यासरूपपरिकराङ्कुर एवायमिति भावः। अनुप्रवेशं दर्शयति— पशुनेति। परिकराङ्कुरस्तावदभ्युपगम्यते। काव्यलिङ्गव्यवच्छेदस्तु नेष्यत इत्याशयेन परिहरति सत्यमिति। दाहकभावो दाहकत्वम्। प्रतीयमानकन्दर्पदाहकभावेति बहुव्रीहिः तृतीयलोचनविशेषणम्। द्वारं द्वारमात्रम्। पर्यायेति। भङ्ग्यन्तरेणेत्यर्थः। अने-

इत्यत्र च प्रतीयमानं वाच्यस्यैव पदार्थस्य वाक्यार्थस्य च हेतुभावोपपादकतया काव्यलिङ्गस्याङ्गमेव । यथा 'यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरम्' इत्यनेकवाक्यार्थहेतुककाव्यलिङ्गोदाहरणे 'त्वन्नेत्रसमानकान्ति' इत्यादिकानीन्दीवरशशिहंसविशेषणानि तेषां वाक्यार्थानां हेतुभावोपपादकानीति तत्र अनेकवाक्यार्थहेतुककाव्यलिङ्गे पदार्थहेतुककाव्यलिङ्गमङ्गमिति न तयोः काव्यलिङ्गोदाहरणत्वे काचिदनुपपत्तिः ।

इति काव्यलिङ्गम् ।

---

अथ अर्थान्तरन्यासः

उक्तिरर्थान्तरन्यासस्स्यात्सामान्यविशेषयोः ।
हनुमानब्धिमतरत् दुष्करं किं महात्मनाम् ॥
गुणवद्वस्तुसंसर्गाद्याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥

---

केति । तत्र कान्तासादृश्यविनोदाक्षमायां पूर्ववाक्यार्थत्रयस्य हेतुत्वादिति भावः । तयोः पशुनाप्यपुरस्कृतेन, मच्चित्तेऽस्ति त्रिलोचनः इति वाक्ययोः ।

इति काव्यलिङ्गम् ।

---

अथ अर्थान्तरन्यासः ।

उक्तिरिति । समर्थ्यसमर्थकभावप्रसङ्गात् सङ्गतिः । सामान्यमात्रस्य विशेषमात्रस्य वा उक्तिः मिलितयोः प्रतीतिर्वा अप्रस्तुतप्रशंसायामस्तीति समस्तोक्तिः । अत एव दृष्टान्तव्यवच्छेदोऽपि । तत्र द्वयोः सामान्यविशेषान्यतरमात्ररूपत्वात् । यत्त्वत्र सम्प्रदायप्रकाशिन्यामुक्तं 'समर्थनाद्दृष्टान्ततो भेद' इति तत्तुच्छम् । दृष्टान्तेऽपि समर्थनाऽवश्यं भावात् । न हि

सुहृदालापेनैव प्रणश्यति स्यान्तरान्तरक्लेशः ।
कान्तामुखचन्द्रेण हि शाम्यति सुचिरेण विरहजस्तापः ॥

सामान्यविशेषयोर्द्वयोरप्युक्तिरर्थान्तरन्यासः । तयोश्चैकं प्रस्तुतमन्यदप्रस्तुतं भवति । ततश्च विशेषे प्रस्तुते तेन सहाप्रस्तुतसामान्यरूपस्य सामान्ये प्रस्तुते तेन सहाप्रस्तुतविशेषरूपस्य वा अर्थान्तरस्य न्यसनमर्थान्तरन्यास इत्युक्तं भवति। तत्राद्यस्य द्वितीयार्धमुदाहरणं, द्वितीयस्य द्वितीयश्लोकः । नन्वयं काव्यलिङ्गान्नातिरिच्यते । तथा हि— उदाहरणद्वयेऽप्यप्रस्तुतयोस्सामान्यविशेषयोरुक्तिः प्रस्तुतयोर्विशेषसामान्ययोः कथमुपकरोतीति विवेक्तव्यम् । न हि सर्वथैव प्रस्तुतानन्वय्यप्रस्तुताभिधानं युज्यते । न तावदप्रस्तुतप्रशंसायामिव प्रस्तुतव्यञ्जकतया । प्रस्तुतयोरपि विशेषसामान्ययोस्स्वशब्दोपात्तत्वात् । नाप्यनुमानालङ्कार इव प्रस्तुतप्रतीतिजनकतया । तद्वदिह व्याप्तिपक्षधर्मताद्यभावात् । नापि दृष्टान्तालङ्कार इव उपमानतया ।

---

इत्यदो दृष्टान्ते समर्थना नास्तीति शक्येत वक्तुम् । उक्तिश्चात्र समर्थ्यसमर्थकभावेन बोध्या । तेन 'देवा इन्द्रश्च सविता' इत्यादिगोबलीवर्दन्यायविषयव्युदासः । सूत्रं तन्तुः ।

ननु द्वयोः प्रस्तावे अर्थान्तरन्यासत्वमनुपपन्नम् । यथाकथञ्चित् भेदस्यातिप्रसक्तत्वादित्यत आह—तयोश्चेति । फलितमाह—ततश्चेति । अयमिति । अर्थान्तरन्यास इत्यर्थः । उपकरोतीति । पृष्टे सतीति शेषः । ननु [न] कथञ्चिदप्युपकरिष्यतीत्यतः समासोक्तिप्रकरणोक्तं स्मारयति- न हीति। समर्थकतां वि(परि ?)शेषयिष्यन् सम्भावितप्रकारान्तराणि प्रत्याचष्टे— न तावदिति । [अ]प्रस्तुतेति । उपकरोतीयत्र सम्बद्ध्यते । एवमग्रेऽपि । प्रस्तुतप्रतीतिः (प्रतीतीति) । प्रस्तुतानुमापकत्व(तये)त्यर्थः । व्याप्तीति । तत्सत्त्वेपि तत्प्रतिसन्धानानपेक्षणाच्चेति भावः । तथा चायं विवेकः। सामान्येन विशेषसमर्थनस्थले तत्सत्वेपि तत्प्रतिसन्धानानपेक्षा । विशेषेण सामान्यसमर्थनस्थले तु तदभाव एवेति ।

विस्रब्धघातदोषः स्ववधाय खलस्य वीरकोपकरः ।
वनतरुभङ्गध्वनिरिव हरिनिद्रातस्करः करिणः ॥

इत्यादिषु सामान्ये विशेषस्योपमानत्वदर्शनेऽपि विशेषे सामान्यस्य क्वचिदपि तददर्शनात् । उपमानतया तदन्वये सामञ्जस्याप्रतीतेश्च । तस्मात्प्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोग इहापि वक्तव्यः । ततश्च वाक्यार्थहेतुकं काव्यलिङ्गमेवात्रापि स्यात् न त्वलङ्कारान्तरस्यावकाश इति चेत् अत्र केचित् समर्थनसापेक्षस्यार्थस्य समर्थने काव्यलिङ्गम् । निरपेक्षस्यापि प्रतिभावैभवात्समर्थने अर्थान्तरन्यासः । न हि यत्त्वन्नेत्रसमानकान्तीत्यादिकाव्यलिङ्गोदाहरणेष्विव

अथोपगूढे शरदा शशाङ्के प्रावृड्ययौ शान्ततडित्कटाक्षा ।
कासां न सौभाग्यगुणोऽङ्गनानां नष्टः परिभ्रष्टपयोधराणाम् ॥

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥

---

विस्रब्धेति । विस्रब्धानां विश्वासितानां घात एव दोषः । वीराणां दण्डकानां कोपकरः । हरिः सिंहः । ननु क्वचित्तथा नि(?)दर्शने अन्यत्रापि सैव रीतिरनुरोत्स्यत इत्यत आह— उपमानतयेति । इहेति शेषः । अन्वय इति । वनतरुभङ्गध्वनिरिवेत्यत्र इवशब्दश्रवणेन तथा प्रतीतावपि अन्यत्र तदभावेन तदयोगादिति भावः । विवक्षितं परिशेषयति तस्मादिति । समर्थकत्वमत्रोपमानेतराविधया तद्बुद्धिप्रतिष्ठापकत्वम् । नन्विष्टमेवेदम् । ततः किमित्यत आह—नथा (तत्र) चेति । सर्वस्वकारमतमाह— अत्र केचिदिति । समर्थनेति । अत एव लक्षणवाक्ये समर्थनीयपदमर्थवदिति भावः । तन्निरपेक्षसमर्थने प्रयोजनमाह— प्रतिभेति । तत्प्रातिघटनमेव(?) तादिति भावः ।

अथेति । उपगूढे संश्लिष्टे । परिभ्रष्टपयोधराणां पतितस्तनानां पलायितमेघानां च ।

दिवेति । भीतामिव गुहासु लीनम् । क्षुद्रेऽप्यल्पेऽपि । ममत्वं मदीयताभिमानः । उच्चैःशिरसां उन्नतमूर्ध्नाम् । मानिनामिति यावत् । अविच्छिन्न-

इत्याद्यर्थान्तरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनसापेक्षत्वमस्तीति । वस्तुतस्तु प्रायोवादोऽयम् । अर्थान्तरन्यासेऽपि हि विशेषस्य सामान्येन समर्थनानपेक्षत्वेऽपि सामान्यं विशेषेण समर्थनमपेक्षत एव । 'निर्विशेषं न सामान्यम्' इति न्यायेन 'बहूनामल्पसाराणां संयोगः कार्यसाधकः ।' इत्यादिसामान्यस्य 'तृणैरारभ्यते रज्जुस्तया नागोऽपि बद्धयते ।' इत्यादिसंप्रतिपन्नविशेषावतरणं विना बुद्धौ प्रतिष्ठितत्वासम्भवात् । न च तत्र सामान्यस्य 'कासां न सौभाग्यगुणोऽङ्गनानां' इत्यादिविशेषसमर्थनार्थसामान्यस्येव लोकसंप्रतिपन्नतया विशेषावतरणं विनैव बुद्धौ प्रतिष्ठितत्वं संभवतीति श्लोके तन्न्यसनं नापेक्षितमस्तीति वाच्यम् । सामान्यस्य सर्वत्र लोकसंप्रतिपन्नत्वनियमाभावात् । न हि 'यो यो धूमवान् स सोऽग्निमान्' इति व्याप्तिरूपसामान्यस्य लोकसम्प्रतिपन्नतया 'यथा महानस' इति तद्विशेषरूपदृष्टान्तानुपादानसम्भवमात्रेणाप्रसिद्धव्याप्तिरूपसामान्योपन्यासेऽपि तद्विशेषरूपदृष्टान्तोपन्यासनैरपेक्ष्यं सम्भवति । न चैवं सामान्येन विशेषसमर्थनस्थलेऽपि कचित्तस्य सामान्यस्य लोकप्रसि-

---

शृङ्गाणां [च] । सति साधाविव । प्रस्तुतस्येति । शरदागमे प्रावृडुपरमस्य लोकसिद्धत्वात् । अचेतनत्वासरक्षादेः कविकल्पनैकसञ्जीविनीकस्य समर्थनमनर्थकमिति काव्यप्रकाशे दर्शितत्वाच्चेति भावः । न्यायेनेति । सम्प्रतिपन्नविशेषावतरणं विनेत्यत्रेदमन्वेति । प्रतिष्ठितत्वेति । ततश्च काव्यलिङ्गलक्षणस्यात्र अतिप्रसङ्ग इति भावः ।

तत्रेति । बहूनामल्पसाराणामित्यत्रेत्यर्थः । तन्न्यसनमिति । विशेषन्यसनमित्यर्थः । नापेक्षितमिति । तत्प्रा(-मित्यतः प्रा)क् प्रतिभाविभवात् कृतमर्पीति शेषः । तथा च नातिप्रसङ्गः । लोकसंप्रतिपन्नस्थले विशेषन्यसननैरपेक्ष्येऽन्यत्रापि तथा भविष्यतीत्या(त्यत आ)ह—नहीति । न चैवमिति । तत्राप्यर्थान्तरन्यासाभ्युपगमे सामान्यविशेषयोरिति द्विवचननिर्देशविरोधात् इति भावः । भवेदयं दोषः यदि तत्रापि सोऽभ्युपगम्येत । न त्वेवमित्या-

द्धत्वाभावेन तस्य बुद्धावारोहाय पुनर्विशेषान्तरस्य न्यासप्रसङ्ग इति वाच्यम् । इष्टापत्तेः । अत्रैव विषये विकस्वरालङ्कारस्यानुपदमेव दर्शयिष्यमाणत्वात् । किं च काव्यलिङ्गेऽपि सर्वत्र न समर्थनसापेक्षत्वनियमः । 'चिकुरप्रकरा जयन्ति ते' इत्यत्र तदभावात् । उपमानवस्तुवर्णनीयसाम्याभावेन निन्दायाः कविकुलक्षुण्णत्वेनात्र समर्थनापेक्षाविरहात् । न हि 'तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्वणशर्वरीश्वरः ।' इत्यादिषु समर्थनं दृश्यते ।

> न विषेण न शस्त्रेण नाग्निना न च मृत्युना ।
> अप्रतीकारपारुष्याः स्त्रीभिरेव स्त्रियः कृताः ॥

इत्यादिकाव्यलिङ्गविषयेषु समर्थनापेक्षाविरहेऽप्यप्रतीकारपारुष्या इत्यादिना समर्थनदर्शनाच्च । न हि तत्र स्त्रीणां विषादिनिर्मितत्वाभावप्रतिपादनं समर्थनसापेक्षम् । प्रसिद्धत्वात् । तस्मादुभयतो व्यभिचारात्समर्थनापेक्षसमर्थने काव्यलिङ्गम् । तन्निरपेक्षसम-

---

शयेनाह— इष्टेति । काव्यलिङ्गलक्षणस्य अन्वयव्यभिचारमुखेन अतिव्याप्तिं अर्थान्तरन्यासलक्षणस्य व्यतिरेकव्यभिचारमुखेनाव्याप्तिं च दर्शयित्वा पुनस्ते एव विपर्ययेण दर्शयितुमाह— किञ्चेति । कविकुलक्षुण्णत्वेनेतीदमेव दर्शयति— नहीति । तदास्येति । तस्य नलस्य आस्यदास्येऽपि मुखपरिचरणेऽपि । अत्र अपिना का कथा साम्यस्येति व्यज्यते । ननु सर्वत्र समर्थनापेक्षा अस्त्येव । परं तु सा क्वचित्कण्ठतः समर्थने शाम्यति । क्वचित्तु विद्यमानापि कण्ठतस्समर्थनाभावेपि प्रकारान्तरेण समर्थनं कथञ्चिल्लब्ध्वैव शाम्यति । न तु कण्ठतस्समर्थनाभावो नियतः । यथा सर्वकर्मसाधारण्येऽपि कथंभावाकांक्षा दर्शपूर्णमासादिषु प्रचुराङ्गोपदेशेन शाम्यत्येव । दर्वीहोमादिषु अर्थलब्धस्वरूपनिष्पादनादिमात्रेणापि सन्तुष्टा भवतीति अपरितोषादाह— न विषेणेति । विषादीनां औषधसेवामृत्युमहिषीदानादिना प्रतीकारसम्भवादिति भावः । न हीति । तथा वर्णनप्रयोजनं तु विध्यलङ्कारे वक्ष्यते ।

र्थेन अर्थान्तरन्यास इति न विभागः । किं तु समर्थ्यसमर्थकयोस्सामान्यविशेषसम्बन्धेऽर्थान्तरन्यासः । तदितरसंबन्धे काव्यलिङ्गमित्येव व्यवस्थावधारणीया । प्रपञ्चस्तु चित्रमीमांसायां द्रष्टव्यः ।

एवमप्रकृतेन प्रकृतसमर्थनमुदाहृतम् ।

प्रकृतेनाप्रकृतसमर्थनं यथा—

यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ॥

यथा वा—

दानं ददत्यपि जलैस्सहसाधिरूढे
को विद्यमानगतिरासितुमुत्सहेत ॥
यद्दन्तिनः कटकटाहतटान्मिमङ्क्षो-
र्मङ्क्षूदपाति परितः पटलैरलीनाम् ॥

इति अर्थान्तरन्यासः ।

---

अथ विकस्वरः ।

यस्मिन्विशेषसामान्यविशेषास्स विकस्वरः
स न जिग्ये महान्तो हि दुर्धर्षास्सागरा इव ॥

---

यदिति । रूपं सौन्दर्यम् । पापवृत्तय इति यदुच्यते तद्वचः नाव्यभिचारि । व्यभिचार्येवेत्यर्थः । असत्यमिति यावत् ।

दानमिति । दानं मदजलम् । दानार्हवस्तु च । जलैः वारिभिः मूढैश्च । अधिरूढे आक्रान्ते । विद्यमानगतिः विद्यमानजीविकः विद्यमानगतिसामर्थ्यश्च । कटः कपोल एव कटाहः भाजनविशेषः । मिमङ्क्षोः मज्जनेच्छोः । यदिति । उदपाति उत्पतितं, भावे लुङ् ।

इति अर्थान्तरन्यासः ।

---

अथ विकस्वरः ।

यस्मिन्निति । सङ्गतिः स्पष्टा । विकसति [प्रस्फुटीभवति प्रकृतं

यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्प्रसिद्धावप्यपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषान्तरमुपमानरीत्यार्थान्तरन्यासविधया वा विन्यस्यते तत्र विकस्वरालङ्कारः। उत्तरार्धं यथा कथञ्चिदुदाहरणम्। इदं तु व्यक्तमुदाहरणम्—

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः॥

इदमुपमानरीत्या विशेषान्तरस्य न्यसने उदाहरणम्।

अर्थान्तरन्यासविधया यथा—

कर्णारुन्तुदमन्तरेण रणितं गाहस्व काक स्वयं
माकन्दं मकरन्दशालिनमिह त्वां मन्महे कोकिलम्।
धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां
नेपालक्षितिपालफालपतिते पङ्के न शङ्केत कः॥

---

पुनर्विशेष-] विन्यासेनेति विकस्वरः। अर्थान्तरन्यासवारणाय पुनर्विशेषग्रहणम्। पुनर्विशेष(वि)न्यासे हेतुमाह—तदिति। उपमानरीत्येति। उपमारीत्येति वा पाठः। उपमानीकृत्येति प्रामादिकः। स न जिग्ये इति तत्पदं महद्विशेषपरम्। उत्तरवाक्यानुरोधात्। अमुं क्लेशमुद्घाटयति— यथेति। व्यक्तमिति। वर्णनीयविशेषस्यापि स्पष्टमुपादानादिति भावः।

अनन्तेति। प्रभवः उत्पत्तिस्थानम्। यस्य हिमवतः। सन्निपातः सद्भावः।

अर्थान्तरन्यासोपमासङ्करेणापीदमुपपन्नं स्यादित्यतो विविक्तस्थलं दर्शयति अर्थेति।

कर्णेति। अरुन्तुदं मर्मस्पृक् कठोरमिति यावत्। अन्तरेण वा- (त्यक्त्वा अथ वा 'विना') गाहस्व आरोह। माकन्दं चूतम्। विशेषान्तरं न्यस्यति—कस्तूरिकामिति। भ्रमे तादात्म्यमानपक्षेणेदम्। नेपालदेशे कस्तूरिकोत्पत्तिरिति तद्ग्रहणम्।

नोत्तरमलभ्यत । नेत्रमपि नोदमीलयत । कनकाम्बा करौ पिपेष । दैव-प्रार्थनाश्च प्रलापाश्च पूर्वाभ्यधिका अभवन् । स्वस्नुषा इतः परं न जीविष्यतीति मतेरुदयात् अश्रु द्वाभ्यामपि चक्षुर्भ्यां निर्झरवत् प्रास्रवत् । वाचः व्यसनेन स्खलन्त्यः स्खलन्त्यः अकम्पन्त । "अहो दैव, 'अस्य पट्टणस्य' चत्वरे एवं नु निर्मनुष्यं परितप्तैर्भवितव्यम् । ईश्वर, किमिदं ते वृत्तम् ? समीचीनः पुत्रो मे जातः ! वित्ताभा-वेऽपि भार्यामपि नु अन्तकाले न द्रष्टुमर्हति । अरे रे पापिजन्म ।" इति विदीर्णहृदया साम्बाशिवं गर्हयेत् । एवं तस्याः स्थितिः अतिभ-यङ्करी पश्यतां मनोद्रावणस्य आक्रोशनस्य च क्षमा परितापकरी च बभूव ।

परेद्युः प्रातः अष्ट घण्टा अभूवन् । विल्लिअंस् यथाशीघ्रं पुनः सन्निहितोऽभवत् । पूर्वस्मिन्निव तस्मिन्नपि दिने तस्य कर्मकरः व्रणबन्धनोचितैः साधनैः आगत आसीत् । तूर्णं दृष्टवत्याः कनका-म्बाया मनसि मनाक् धैर्यमुदभूत् । त्वरितमुत्थाय समर्यादं तं प्रत्यग्र-हीत् । तस्याः किट्टस्य च परितापकर आकार एव सहस्रं जिह्वा व्या-पार्य तमनुनाथ्य सानुरोधं 'स्वर्णाम्बा परित्रातव्या' इति प्रार्थयतेव । शिलाहृदयैः 'किरातकै'रपि अनुकम्पनीयायामवस्थायां स्थितौ तौ अत्यनादरेण दृष्ट्वा विल्लिअंस् 'किमम्ब, आगतो नु पुत्रः' इति सस्मितं सोल्लुण्ठनमपृच्छत् । तस्य किमुत्तरं देयमित्यजानती कनकाम्बा एकद्वौ निमेषौ मौनेन स्थित्वा ततः 'स आगतश्चेत् सपदि भवत्स-काशमागताः किं न भवेम ? एकमपि निमेषं किं विलम्बेमहि ? तत्र तस्य कापि विपत् किमापतिता, न ज्ञायते । तमान्विष्य गतः सेव-कोऽपि नागतः । भवद्भिरेव कथञ्चिद्दया कर्तव्या । वध्वा जीवि-तमुत्क्रमिष्यदिव भाति । अस्माननुकम्प्य त्रायध्वम् । भवदीयं वित्तं न हीयेत । केषांञ्चित् दास्यं प्राप्य वा तत् समर्पयेम । दरिद्रजनस्य कस्यचित् धर्मार्थं कृतमिति मत्वा कुरुत' इत्युपर्युपरि अनुनाथ्य निर्बबन्ध । तस्या वाचः कर्णयोरकुर्वन्निव दृश्यमानो तूष्णीः स्वर्णा-

म्बायाः समीपमेत्य तस्या नाडीपरीक्षणमकरोत् । व्रणान् क्षालयित्वा औषधं निधाय बन्धयामास । अथ सः 'किमियमम्बा अभाषिष्ट' । इत्यपृच्छत् । कनकाम्बा 'न' इत्याह ।

भिषक्— लोचने उन्मीलितवती ?

कनकाम्बा— न । अपि तु तदा तदा उङ्करोति, भणति ।

भिषक्— साधु । वयं किं कुर्याम । यूयं तु अनादृता वर्तध्वे । स्वपत्या एवं सङ्कटां दशां अविजानन् किन्नु पुरुष इत्थं वर्तेत ? वित्तं प्रत्यपि नाहं चिन्तां करोमि । अस्याः पोषकः पुरुषः यावत् पत्रं विलिख्य न ददाति तावत् न मया साध्या इयं शस्त्रचिकित्सा कर्तुमुचिता । तस्मात् दयया वा धर्माय वा शस्त्रचिकित्साकरणमप्यकार्यम् । ईदृश्याः शस्त्रचिकित्सायाः कृते पञ्चशत्या अन्यूनरूप्यग्रहणं मे शीलम् । भवद्भिः पुरुषकारलेखस्य आनीतत्वात् द्विशत्यै अङ्गयकार्षम् । तदपि चेत् यथावन्नायाति किमहं कुर्याम् ? आदावेव 'दरिद्राः' इति चेत् भवन्त उक्तवन्तोऽभविष्यन् नाहं वित्तमपेक्षितवानभविष्यम् । आशां प्रदर्श्य किं वञ्चयन्तीति अद्य मन्तव्यं भवति । एवं मां बहवो वञ्चितवन्तो भवन्ति ।

कनकाम्बा— आर्य, न तथा मन्तुं युक्तम् । न वयमल्पमनुष्याः । दिनद्वयात् पूर्वं अस्मद्गृहात् परिमोषिणः विंशतिं सहस्राणि रूप्याणि अहरन् । तान्याभरणानि चेत् अनया आमुक्तानि न स्युः नेयं विपदागता स्यात् । मदुक्तं बालाः नाशृण्वन् । अद्य चेलमपि परकीयं वसितव्यमभूत् । मम पुत्रस्य उपमाण्डलिकोद्योगोऽपि चौर्यदिन एव न्यवर्तत । चतुर्भ्यो दिनेभ्यः पूर्वं अस्याः पुत्री नष्टा । तस्या भर्ता मोटारे लग्नः रायपेटा-वैद्यशालायां शेते । अस्माकमेतावत्य आपदः युगपदागच्छन् । अस्याः शस्त्रचिकित्सायाः कृते रूप्यं ऋणमेव ग्राह्यम् । अस्त्यस्माकमेकं गृहं क्षेत्रं च । मत्पुत्रः ते आधीकृत्य रूप्यं ग्रहीतुं गतः । रूप्यं वा न लब्धम् ग्रहीत्वा

आनीयमानं वा तस्कराः पन्थानमावृत्य अपहरन्ति स्म। किमिति न ज्ञायते। गतः सेवकोऽपि न निवृत्तः। सेवको वा अद्य आगतो भवेत्। दयन्तां भवन्तः।

भिषक्— (मनाक् कुपितः) न वित्तस्य हेतोरेव अहं विलम्बं करोमीति कतिकृत्वो वदानि। पोषकेण पत्रलेखनात्पूर्वं शस्त्रचिकित्सा मया नैव कर्तव्या। एकसहस्रतमं वारं वदामि।

कनकाम्बा—'स्वयमेव अस्या मरणमपेक्ष्य, जीवनाय अस्माभिः क्रियमाणेन यत्नेन यदि सा म्रियेत न तद्दुष्यति। अस्मिन् विषये मत्पुत्रो यथा भवतो नानुद्रवति तथाऽहं द्रक्ष्यामि। तत्राहं प्रतिभूः। मत्पुत्रः सत्पुत्रः। न जात्वपि मम वाचमतिक्रामेत्। वध्वाः प्राणानामापद् यदि भवेत् भवतु। कुरुत।' इत्यवोचत्।

हूणस्य कोपो ववृधे। 'त्वदुक्तिं स शृणुयादिति यतो मया निश्चितं न ज्ञायते, अतः एतत्प्रति पुनःपुनर्भाषणस्य नास्ति किमपि फलम्। वृथा मम व्यथने नाहमितः परमत्र आगच्छेयम्। तत्कालशान्त्यै यद् दीयमानमस्ति तदेव भेषजमद्य दत्वा गच्छामि। जीवितं तु निष्क्रामदेवास्ति। त्रिपादी निष्क्रान्ता। जातिवयं चक्षुरुन्मील्य भाषेतापि। तदेव मरणकालचिह्नम्। जाग्रतः पश्यत।' इत्युक्त्वा तद्भेषजमन्तर्गमयित्वा बहिर्गन्तुमुत्तस्थौ।

तदा तस्य गृहस्यान्तः प्रविश्य लेखवाहः 'का कनकाम्बा?' इत्यपृच्छत्। सा 'अहमेव' इत्युवाच। स सपदि एकं लेखमादाय प्रसार्य 'एक आणको देयः। शीर्षं नासञ्जितम्' इत्याह। अनुपदं किट्टः एकमाणकं दत्वा लेखं जग्राह। लेखवाहो बहिर्जगाम। लेखः कुत आगत इति ज्ञातुं हूणः मनाक् मन्थरस्तस्थौ। किट्टः लेखं अपावृणोत्। तत्र कठिन्या विकृतमेवं लिखितमासीत्—

"अहं पट्टणात् चेङ्कलट्टु आगत्य 'दिवाचौर्यपाकं' गत्वा श्रेष्ठिनमद्राक्षम्। स्वामी गृहं क्षेत्रं च तस्मिन्नाधीकृत्य सहस्रं रूप्याणि गृहीत्वा पूर्वेद्युः सायमेव चेङ्गलपट्टु आगत इति श्रेष्ठी अवादीत्।

अहं सद्यः चेङ्गल्पट्टु आगमम् । बाष्पशकटस्थानके 'चेङ्गलट्टु-नत्त'प्रभृतिषु पुरेषु च अन्वेषणमकार्षम् । बहुषु मनुष्येषु व्यचीचरम् । स्वामिनो वार्ता न कापि उपलब्धा पालकेष्वपि अजिज्ञपम् । ते स्थानकमेत्य तत्रत्यान् कर्मकरान् शाकटिकान् अन्यांश्च व्यचीचरन् । 'हस्ते महता पणमूलेन आगतः कश्चिदार्यः निशि अकाले उपेत्य पट्टणं गन्तव्यामिति परितप्त इति, अश्वशकटो वा मोटारो वा किमागच्छेदिति पृच्छन्नासीदिति च ते अब्रुवन् । किञ्च तृतीयकक्ष्याजनविश्रमस्थाने अस्वामिकं स्थितमेकं वस्त्रं स्थानकपतिः पालकवशे अकार्षीत् । तद्वस्त्रमहमद्राक्षम् । तदस्मत्स्वामिन एव । पणेन सह अस्मत्स्वामिनं चोराः किमुद्दिश्य नीतवन्तः अथ वा स चोराननुद्रुत्य गत इति पालका अनेकधा वितर्क्य उपरि विचारणां कुर्वन्तः सन्ति । विवरं पुनर्लिखामि । रात्रौ लिखितत्वादिमं लेखं शीर्षमनासज्य क्षिप्तवान् । स्वर्णाम्बां जाग्रतः पश्यत । शस्त्रचिकित्सायै भिषजि हूणे प्रार्थनां कुरुत ।"

इत्थं

सेवकः रङ्गराजुः ।

एवं लिखितं लेखं किट्टेन अनुवाच्यमानं श्रुतवती कनकाम्बा दिग्भ्रममापेदे । किट्टोऽपि विभ्रान्तोऽभवत् । उभावपि वाचमुद्धाट्य भाषितुमशक्तौ मूककल्पावभवताम् । विकृतमुखो हूणश्च तस्यां चिकित्सायां द्वे शते रूप्याणि लभ्येरन्निति स्थितं प्रत्ययं वितथीभूतं पश्यन् अन्तर्विषण्ण आसीत् । ततः परं तत्र अवस्थाने निवतनां शस्त्रचिकित्सां कर्तुं ते निर्बध्नीयुरिति मन्यमानः 'साधु । त्वरया मे गन्तव्यम् । युष्मत्कार्याणि युष्माकमापतन्त्यो विपदश्च विचित्राणि सन्ति । यथा तथा कुर्वन्तो भवत । अहमन्ते एकां वार्तां ब्रवीमि । अस्या अम्बायाः प्राणाः अस्मिन् वा निमेषे गच्छेयुः अनन्तरे वेत्यस्यां स्थितौ वर्तन्ते । शस्त्रचिकित्साकरणं नेतःपरं क्षणमात्रमपि

एवं प्राकृतपदार्थपरतयापि । ते च जगति स्थितान् प्राणान् जीवात्मनः निगिरन्तः स्वस्मिन्नन्तर्भावयन्तः । प्रकृतौ लीनतां गमयन्तः । मुखैः मुखभेदैः विषमुद्गिरन्तः फलपुष्पपल्लवादिकं बन्धकत्वादिना वस्तुतो विषरूपमपि मुखभेदेन भोग्यतारूपेण जगति प्रकाशयन्तः । स्वविषयायाश्च भोग्यबुद्धेर्जननीमित्युक्तत्वात् । द्विजिह्वाः रजस्तमोरूपजगद्भ्रमनसाधनपदार्थद्वयवन्तः जिह्मवृत्तयः । माया जगन्मोहिनीत्युक्तमोहनैकव्यापारवन्तः । दूरतः परिहर्तव्याः भगवत्प्रपदनाद्युपायवशेन विरजातीरपर्यन्तं गत्वापि तत्रैव परित्याज्याः । दूरं गत्वेति (?) ल्यब्लोपे पञ्चमी । प्रकृतिसंबन्धस्य बन्धरूपत्वादिति भावः ।

एवमेव ऋतुलिङ्गपरतयाप्यर्थः । परिहर्तव्या इत्यत्र परि हा ऋतव्या इति पदत्रयम् । ऋतव्याः ऋतुव्यापराः । ऋतुभ्यो हिता इत्यर्थे उगवादिभ्यो यदिति यत्प्रत्ययः । ते च जगतां प्राणान् भक्षयन्तः । स्वपरिक्रमणक्रमेण निखिलजगत्प्राणसंहरणदीक्षिताः । उक्तं हि— 'अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह । आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः ॥ नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमिते रवौ । आत्मनो नावबुद्ध्यन्ते मनुष्या जीवितक्षयम्' इति । आरुणकेतुके च श्रूयते—'विशेषणं तु वक्ष्यामः । ऋतूनां तन्निबोधत । शुक्लवासा रुद्रगणः । ग्रीष्मेणावर्तते सह । निद(ज)हन् पृथिवीं सर्वाम् । ज्योतिषाऽप्रतिख्येन सः' इति । अस्यार्थः । ग्रीष्मेण ऋतुना सह रुद्रगणः संहारदेवतासंघः शुक्लवासाः आतपरूपशुक्लवस्त्रोपेतस्सन् आवर्तते परिभ्रमति । किं कुर्वन् । अप्रतिख्येन ज्योतिषा अनिर्वचनीयतेजसा । सः रुद्रगणः पृथिवीं सर्वां निदहन् इति । विशं जनं प्रति मुखैः मुखशब्दितैः मासपक्षादिभिः उद्गिरन्तः उच्चैर्घोषयन्त । तदपि श्रूयते— 'ऋतुर् ऋतुना नुद्यमानः । विननादाभिधावः । षष्टिश्च त्रिंशका वल्गाः । शुक्लकृष्णौ च षाष्टिकौ' इति ॥ एकं रक्ष्यं अन्येन ऋतुना नुद्यमानः प्रेर्यमाणः, अव्यवधानेन प्रवर्तमानत्वात् अभिधावः । आभिमुख्येन धावन् विननाद । उच्चैर्घोषं

चकार । लोकस्थजनं प्रत्युद्घोषयति । तस्य त्रिंशन्मुहूर्तसहिताः षष्टिर्दिवसा बल्गाः सैनिकाः । शुक्लपक्षकृष्णपक्षावनुगामिनाविति । मुखशब्दार्थश्च तत्रैव श्रूयते । एकं हि शिरो नाना मुखे । कृत्स्नं तदृतुलक्षणमिति । ऋतोः शिर एकम् । मुखे नाना द्वे । ते च मासावेवेति एकस्य ऋतोः मुखद्वयम् । व्यक्तिभेदात् बहुवचनमिति बोध्यम् । यद्वा मुखैः प्रकारभेदैः । विषं प्राणिहननसाधनमायुधं उद्गिरन्तः प्रक्षिपन्तः । शस्त्रन्तु विषमायुधमिति वैजयन्ती । तथा च वसन्तादिकालिकफलपुष्पपल्लवादिप्रदर्शनमुखेन जनमनोमोहजनकमायुधविशेषमेव किमपि (?) प्रयुञ्जाना इत्यर्थः । फलपुष्पादीनां भोग्यबुद्धिमुत्पाद्य बन्धकत्वात्, तद्दर्शनादिमुग्धानामविदितस्वायुरवसानानां वृथैव महती यातेत्युक्तक्रमेण क्लेशजननाच्च जनाकर्षणसाधनायुधविशेषत्वमेवेति भावः । तथा हि श्रूयते– 'अभिधून्वन्तोभिघ्नन्त इव । वातवन्तो मरुद्गणाः । अमुतो जेतुमिषुमुखमिव । सन्नद्धास्सह ददृशेह' । इति । हेमन्तऋतौ सञ्चरन्तो वायुगणाः जगदिदं जेतुमिषुमुखमिव स्थित्वा सन्नद्धा दृश्यन्त इत्यर्थः । अन्यत्र च 'यत् क्रीडथ मरुत ऋष्टिमन्त आप इव सध्र्यञ्चो धवध्वे । पर्वतश्चिन्महिवृद्धो बिभाय दिवश्चित् सानुरेजत स्वने व' इति । अत्र भाष्यं हे मरुतः ऋष्टिमन्तो वज्रायुधवन्तो यूयं यदा क्रीडां कुरुथ तदानीं वः स्वने गर्जने सति पर्वतश्चित् बिभाय । पर्वतोऽपि बिभेति । कीदृशः । अत्यन्तं महान् । ऊर्ध्वप्रवृद्धः पर्वतसानुरपि कंपत इति । द्विजिह्वाः मासद्वयस्य मुखद्वयरूपतायाः एकं हि शिरो नाना मुखे इति प्रागुक्तश्रुतिसिद्धत्वेन तदग्रभागस्य जिह्वास्थानीयत्वमिति बोध्यम् । परीत्येतदुपसर्गप्रतिरूपकमव्ययम् । परित इत्यर्थः । प्रयुज्यते च 'आघ्रातं परिचुम्बितं परिमुहुर्लीढमिति । प्रदक्षिणवृत्त्येति यावत् । जिह्मवृत्तयः । एवं नानासमुत्थानाः कालस्संवत्सरं श्रिता इत्युक्तरीत्या परस्परविरुद्धनानाप्रकारव्यापारभाजस्सन्ति इत्यर्थः । हा इति खेदे । सुखहेतुवदुपलभ्यमाना अपि अन्ततो दुःखहेतव एवासन्निति विषादद्योतकः ।

अथात्र श्रौतप्रक्रियामात्रप्रसिद्धमर्थचतुष्टयम् । तथा हि । अग्निच-

यनार्थं गरुडाद्याकृतितया कल्प्यमानासु चितिषु तत्तन्मन्त्रसाध्यमिष्टकोपधानमनेकधा विधीयते। तत्र ऋतव्यानामिकाः काश्चनेष्टका मधुश्च माधवश्चेत्यादिमन्त्रकलापसाध्याः। ताश्चैवं विधीयन्ते। ऋतव्या उपदधात्यृतूनां क्लृप्त्यै द्वन्द्वमुपदधाति तस्माद्द्वन्द्वमृतव इति। तत्र 'मधुश्च माधवश्चेति द्वे ऋतव्ये समानतया देवते' (?) इति कल्पसूत्रविधानात् मन्त्रद्वयेन सकृदेवेष्टकोपधानमिति स्पष्टमत्रान्यचितिवैलक्षण्यम्। ततश्चायमर्थः। ऋतव्याः ऋतव्यानामका इष्टकाबन्धाः। अत एव पुंलिङ्गता। ते च द्विजिह्वाः। इष्टकाया जिह्वासादृश्यात् इष्टकाद्वयस्य एकदैवोपधानाच्च द्विजिह्वता। तत्रापि परिपरितो द्विजिह्वा इत्यन्वयः। मध्यमचितेश्चतुर्जिह्वत्वात्। श्रूयते हि— द्वंद्वमन्यासु चितीषूपदधाति चतस्रो मध्ये धृत्या इति। जिह्मवृत्तयः प्रथमं प्राच्यां अथ दक्षिणायां अथ मध्यमे, अथ प्रतीच्यां अथोदीच्यामिति क्रमविधानात् भुजङ्गवत् कुटिलगतयः, जगत्प्राणान् प्राणा वा अग्नयः प्राणानेवावरुन्ध इति विहितान् चित्याग्नीन् निगिरन्तः स्वान्तर्निक्षिपन्तः, तदपि श्रूयते— समास्त्वाग्न ऋतवो वर्धयन्त्वित्याह समाभिरेवाग्निं वर्धयतीति। ऋतवः प्रवर्तमानास्संवत्सरमुखाग्निधारणेनाग्निं वर्धयन्तीति तद्भाष्यम्। ऋतव्याश्च ऋतूनां स्थानं एतद्वा ऋतूनां प्रियं धाम यदृतव्या इति। अतश्च ऋतव्यानां ऋतुद्वाराग्निधारणं सुव्यक्तम्। ऋतूनामपि वा प्राणप्रदत्वात् जगत्प्राणत्वं बोध्यम्। यद्वा, 'प्राणं मे पाहीति पञ्च प्राणभृत ऋतव्या अनूपधाय' इति कल्पसूत्रविधानात् 'प्राणभृत उपदधात्यृतुष्वेव प्राणान् दधाति' इति श्रुतिविधानाच्च ऋतव्योपरि प्राणभृदुपधानस्य साक्षादृतव्यानां प्राणभरणफलकत्वकीर्तनात् सुस्पष्टमेव जगत्प्राणभरणमृतव्यानाम्। उक्तं हि सायणीयभाष्ये— ऋतव्योपधानादूर्ध्वं प्राणभृत उपधाने सति ऋतुष्वेव प्राणान् स्थापयतीति। अथवा जगत्प्राणशब्दितो वायुरेव, तादृशवायुरूपान् प्राणभृन्नामकानिष्टकाबन्धान् स्वोपरि धारयन्त इत्यर्थः। तदपि श्रूयते—एष वै वायुर्यत् प्राणो यदृतव्या उपधाय प्राणभृत उपदधाति तस्मात्

सर्वान्नृतूननु वायुरावरीवर्तीति । अतो जगत्प्राणभरणभृतव्यानामनेकधारूप-पादमिति । मुखैः मुखभागैः । अत्र भागैरित्यर्थः । विषं जलं शैवालं वा । उद्गिरन्तः वमन्तः । तथा हि श्रूयते । अवकामनूपदधात्येषा वा अग्नेर्योनि-स्सयोनिमेवाग्निं चिनुत इति । तत्र भाष्यम् । उदकजन्यां शैवालापरपर्यायां अवकां उपर्युपदध्यात् । आपो ह्यग्नेः स्थानम् । अवका च जलस्य कार्यत्वात् जलवदग्नेर्योनिरिति । तथा च ऋतव्यानामग्रभागे शैवालजलादिवमनं सुव्य-क्तमिति बोध्यम् । अत्र च विषशब्दस्य बिसशब्दाभासतामभिमन्यमाना उदी-च्याः मृणालशैवालादिपरत्वमप्याचक्षते । अन्ये तु जलाभेदेनोपलम्भात् जल-कार्यत्वाद्वा तद्वाचिशब्दाभिधानमिति । तथाविधा ऋतव्येष्टकाबन्धाः दूरतः अस्माकमिति दूरस्थाः साधरणाग्निसाध्याग्निहोत्राद्यनुष्ठानमप्यस्माकमतिदूरं ईदृशमहाग्निचयनेनाग्निनिष्पादनन्त्वस्माकं मनसाप्यचिन्त्यमिति भावः ।

एवमत्र ग्रहपरोऽपि कश्चिदर्थबोधः । तत्र चाग्नौ होष्यमाणानां सोम-रसानां ऐन्द्रवायवादिनामसु ग्रहाख्यदारुपात्रेषु तत्तन्मन्त्रेण प्रथमं ग्रहणं विधीयते । तत्र च ऋतुग्रह एवं विहितः । यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्या इति । ते च ऋतुग्रहाः ऋतुभ्यो हिता ऋतव्याः । षट्-कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणातीत्युक्तेः । एवं द्विजिह्वाश्च । सह प्रथमौ गृह्येते सहोत्तमौ तस्मात् द्वौ द्वावृतू उभयतोमुखमृतुपात्रं भवतीति ऋतुग्र-हाणामुभयतोमुखत्वविधानात् मुखद्वयेन च सकृदेव सोमरसग्रहणविधानाच्च । रसग्रहणसाधनत्वात् मुखद्वये जिह्वाशब्दव्यपदेश इति बोध्यम् । जिह्मवृत्तयः प्रथमं षट्कृत्वः अथ चतुः अथ द्विः, अथ षट्कृत्वः अथ चतुः अथ द्विः इत्येवं क्रमेण मन्त्रानुवचनविधानात् कुटिलवृत्तयः । जगत्प्राणान् जगतां प्राणवद्रक्षणीयान् अमृतस्वरूपत्वात् प्राणप्रदान् वा अविषं अमृतस्वरूपं सोमरसं, अविपन्नः पितुं कृणोत्विति मन्त्रे नः पितुं अन्नं अविषं कृणु अमृतं कुर्विति भाष्ये व्याख्याकरणात् । मुखैः स्वमुखैः निगिरन्त उद्गिरन्तश्च, प्रथमं ग्रहणकाले स्वान्तर्निगिरणं, अनन्तरं होमकाले उद्गिरणं च कुर्वन्तः सोम-

# उद्यानपत्रिका ॥

"मन्या वाचो विमुञ्चत"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥



| | | | | |
|---|---|---|---|---|
| पु. २२] कलि ५०४९ सर्वधारि | कन्या | साधारण | सं | १ |
| | तुला | शास्त्रानुबन्ध | सं | १ |
| | | आहत्य | ,, | २ |



# धर्मवीरता ॥

अस्तीदं यद् राज्ञो मतमन्यत्, भूयिष्ठानां प्रजानां मतमन्यत्। राजा माहम्मदः, प्रजाः हिन्दवः। वैपरीत्येन राजा हिन्दुः, प्रजा माहम्मदा इति। अत्र पूर्वा विधा हैदराबाद्-अत्र। उत्तरा काश्मीरेषु। अस्मिन् देशे हिन्दवः माहम्मदाः सीक्खियाः सर्वे सन्ति। एषु माहम्मदा भूयिष्ठाः। एवं भिन्नमता अपि इमे जनाः तत्प्रयुक्तवैषम्यलेशमपि विना राज्यपरिपालनं स्ववशे कर्तुं–प्रजाराज्यं स्थापयितुं– प्रयतमानाः चिरात् राज्ञः प्रतीपं महान्तं कोलाहलं कुर्वन्तोऽवर्तन्त। सहसा स्वाधिकारं परित्यक्तुमनिच्छन् महाराजः तदा तदा समुचितं दण्डं पातयन् प्रजानां संरम्भं प्रतिरुन्धन् आस्त।

अतीते वर्षे अस्यास्मदीयस्य भारतदेशस्य विभागे जाते पाकिस्थानिनः काश्मीरदेशं स्वकीयं कर्तुं तीव्राभिलाषा अभवन्। महाराजो वर्तते। प्रजा वर्तन्ते। प्रजाराज्यस्थापनाय कृतबहुपरिश्रमाः असकृत् कारागृहं प्रविश्य महद्दुःखमनुभूतवन्तः स्वार्थविमुखाः देशक्षेमैकदृष्टयः जनाधिपा वर्तन्ते। तान् सर्वानगणयित्वा अत्याशापरवशाः सौजन्यमार्गे जात्यन्धाः प्रकृत्या निर्घृणाः कुटिलाः नृशंसाः पाकिस्थानिनः तुल्यगुणशीलं पत्थानिखलवर्गं प्रोत्साह्य प्रेष्य काश्मीरेषु लोकोत्तररामणीयकशालिनः प्रदेशान् व्यनाशयन्। ग्रामान् पत्तनानि च व्यध्वंसयन्। सङ्घशः स्त्रीबालवृद्धाविवेकेन जनान् व्यापादयन्। स्त्रीणां मानभङ्गमकुर्वन्। अपहरणञ्च।

एवमेषां अतिदुस्सहेन वाचामगोचरेण क्रौर्येण दुर्निर्वहदशायां जातायां भीतः संभ्रान्तो महाराजः स्वकीयस्य राज्यस्य अस्मत्समष्टौ अन्तर्भावं प्रार्थ्य समापतिताया महत्या आपदः सद्यो रक्षामपैक्षत। अस्मत्समष्टि-शासने स्थिताः श्रीनेह्रुप्रभृतयः तत्प्रार्थनामङ्गीकृत्य अभयं दत्वा स्थलमार्ग-रहिते दुर्गमे तस्मिन् देशे अस्मत्सैनिकवीरान् आकाशयानेन गमयित्वा अभियोक्तॄणां पाकिस्थानिपत्थानिदुर्जनानां विद्रावणौपयिकं संविधानमकु-र्वन्। सुदूरमिमे प्रत्यावर्तिताः। अथापि काश्मीरदेशस्य एकदेशः अद्यापि एषामेव वशे वर्तते। युद्धं च प्रवर्तमानमेव आस्ते। अत्र पाकिस्थानस्य अस्मद्देशस्य च सन्धिकरणोद्देशेन नियमिता काचित् देशान्तरसमितिः इह आगता तत्त्वोपलम्भाय काश्मीरान् गत्वा स्वयं साक्षात् तत्रत्यां स्थितिं पश्यन्ती जनानां मुखात् विषयान् शृण्वती च वर्तते।

तस्य देशस्य स्थितौ एवंविधायां सत्यां हैदराबाद् अपि तथाविधामेव अतिसङ्कटां स्थितिमलभत। प्रजासु भूयिष्ठा हिन्दवः। अष्टमांशन्यूना-स्तुरुष्काः। अथाप्येषु घोरप्रकृतयः केचित् 'निजाम्' नाम राजा सजा-तीय इत्येतन्मात्रेण स्वयमेव राज्याधिकारिण इत्यभिमन्यमानाः मतसाम्य-प्रयुक्तदाक्षिण्येन वा मतिदौर्बल्येन वा जोषं स्थिते तस्मिन् राज्ञि, मण्ड-लाधिकारिषु पालकेषु अन्येषु च उद्योगिवर्गेषु न परमौदासीन्यं अपि तु सहकारितामेव अवलम्बमानेषु, जनानां वाचा वर्णयितुमशक्यां उच्चावचां परमहिंसामकुर्वन्। बहवः कान्दिशीकाः अभूवन्। ग्रामा दग्धाः। जनाः स्त्रीबालवृद्धाविशेषेण सङ्घशो मारिताः। धूमशकटयायिनः प्रयाणिनः बलादवरुध्य हिंसित्वा वस्तून्यमुष्णन्। किं बहुना। इतिहासपुराणेषु असुरैः राक्षसैश्च ये उपद्रवाः कृता इति शृणुमः ते सर्वे ततोऽधिकाश्च सम्प्रति हैदराबाद्-जनैरन्वभूयन्त।

ऋजुमार्गैकगामिनः अस्मत्समष्टिशासनभारवाहिनः महापुरुषाः अतिमात्रविषण्णचेतसोऽपि मर्यादां परिपालयन्तः सहसा किमपि कर्तुम-निच्छन्तः तस्य राज्ञः बहुधा सानुनयं प्रतिबोधनमकुर्वन्। शठनृशंस-गोष्ठीपरवशः सः परगुणग्रहणे अत्यन्तमव्युत्पन्नः केवलं बधिरो बभूव। दुर्मन्त्रिणस्तत्र तत्र प्रेष्य 'अन्यायं अस्मान् समष्ट्यधिकारिणः पीडयन्ति। भीषयन्ति। अस्मत्स्वातन्त्र्यमपजिहीर्षन्ति। बलदर्पिता अस्मद्राज्यमाक्र-मितुमिच्छन्ति। अहो महत्यामापदि मज्जामि। रक्षत। परित्रायध्वम्' इति मायाविताकाष्ठामाश्रित्य आक्रोशत्।

इतःपरमसह्या स्थितिरिति पश्यन्तः अस्मत्सम्प्रत्यधिकारिणः हैदराबाद्-जनान् रक्षितुं तत्रत्यं अराजकत्वं राक्षसराज्यं वा अपनेतुं च अतिचतुरामस्मदीयां सेनां तत्र प्रैषयन् । पञ्चभिरेव दिनैः तत्र दुष्टान्निगृह्य शान्तिप्रतिष्ठापने सफलप्रवृत्तिरासीदेषा अस्मदीया सेनेति सर्वत इदानीमानन्दभरिता जना भवन्ति । विजयन्तामिमे धर्मवीराः इति वयं पुनः पुनः प्रार्थनां कुर्मः ।

---

# नाटककथासारः ॥

(शाकुन्तलम्)

(T. Venkatacharya B. O. L.)

IV

दुष्यन्तः यज्ञरक्षणं निमित्तीकृत्य कतिचित् अहानि आश्रमे उषित्वा इष्टिपरिसमाप्त्यनन्तरं स्वनगरमगात् । तद्विरहखिन्ना कण्वदुहिता चिन्ताक्रान्ता समपद्यत । तथाभूतां तां एकाकिनीं उटजे परित्यज्य पूजायै कुसुमापचयार्थं अनसूयाप्रियंवदे निष्क्रान्ते । तस्मिन् अवसरे दुर्वासाः महर्षिः उटजं अनुप्राप्तः । तदा सा दुष्यन्तनिहितमनस्का आगतं तं न विवेद । तस्मै कर्तव्यं सत्कारं न विदधे । तेन कुपितो महर्षिः 'यदेकध्याना मां न वेत्सि सः त्वया प्रतिबोधितोऽपि त्वां न स्मरिष्यति' इति शकुन्तलां शशाप । एवं वृत्तं किमपि शकुन्तला न अजानात् । स्वसखीमधिकृत्यैव संलपन्त्यौ अनसूयाप्रियंवदे परं दैववशात् सकोपं निर्गच्छन्तं दुर्वाससं अपश्यताम् । प्रियंवदा झटिति महर्षिमुपेत्य पादयोः प्रणिपत्य अज्ञानाचरितः शकुन्तलाया अपराधः मर्षितव्यः इति प्रार्थयाञ्चक्रे । 'न मे वचनं अन्यथा भवितुं अर्हति । किंतु अभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते' इति वदन् स मुनिः अन्तर्हितः ।

राज्ञा स्वनगरं प्रस्थितेन स्वनामाङ्कितं अङ्गुलीयकं शकुन्तलायै प्रदत्त-

मासीत् । तद्दर्शनेन राज्ञः शकुन्तलास्मरणं भविष्यति इति अनसूयाप्रियंवदयोः आश्वासः समजनि । परं तु शापवृत्तान्तं सर्वं बहिः अनुक्त्वा ते निगूढं ररक्षतुः । शकुन्तलायाः परिणयवार्तां काश्यपाय निवेदयितुं तयोः भीतिरभूत् । स परं अशरीरिण्या वाचा सूचितं गान्धर्वविवाहादिकं सर्वमवेदीत् । तच्छ्रवणेन भृशं तुष्टो महर्षिः तामापन्नसत्त्वां भर्तुः सकाशं प्रेषयितुं निश्चयमकरोत् । मङ्गलसमालम्भनार्थं कुसुमानि आनेतुं शिष्यान् न्ययुङ्क्त । तदा वनदेवतया कुसुमानां स्थाने क्षौमं आभरणं च वितीर्णं शिष्याः आनिन्युः । इदं सर्वेषां आश्चर्यकरमभूत् । महतः शुभस्य सूचकं इति अमंस्त । सख्यौ तैराभरणैः शकुन्तलामलमकुरुताम् । तापसी काचित् 'महादेवीशब्दमधिगच्छ' इति आशिषं प्रायुङ्क्त । अन्या 'वीरप्रसविनी भव' इत्याशशंसे । एवं तापसवृद्धाभिरनुगृहीतां तां विसर्जयितुं पूर्वं निश्चितवतोऽपि कण्वस्य वात्सल्यहेतुकं वैक्लब्यमासीत् । तदीयं विश्लेषं सोढुं नाशकत् । तथापि भर्तृगृहं प्रति प्रेषणं अवश्यकर्तव्यममन्यत । तस्मात्, गुरुजनशुश्रूषा सपत्नीजने प्रियसखीवृत्तिः सदा भर्तुः छन्दानुवर्तनं च श्रद्धया करणीयं इत्युपादिश्य आशीर्भिरनुगृह्य तां गौतम्याख्यया तापसवृद्धया सह हस्तिनगरं प्राहिणोत् । आश्रमस्थैः तरुभिः लताभिः परभृतैश्च सानन्दं अनुमतगमना सा प्रतस्थे । मार्गे सहायार्थं शार्ङ्गरवशारद्वतनामानौ शिष्यौ ताभ्यां सह अगच्छताम् । शिष्यसकाशे 'दारेषु सामान्यप्रतिपत्तिपूर्वकं इयं द्रष्टव्या' इति सन्देशं शकुन्तलामधिकृत्य दुष्यन्ताय कण्वः प्रैषयत् । एवं शकुन्तलां पतिगृहं संप्रेष्य महर्षिः निर्वृतो बभूव ।

## V

शकुन्तलां पुरस्कृत्य गौतमी कण्वशिष्यौ च दुष्यन्तसकाशं उपागच्छन् । तपस्विनः केचित् काश्यपात् सन्देशं आहरन् इति विदित्वा दुष्यन्तः तान् विधिवत् अभ्यर्च्य तत्सन्देशः अभिधीयताम् इत्यपृच्छत् । प्रथमं शकुन्तलादर्शनसमये राजा आत्मनि कमनीयाकृतिं तामवर्णयत् । परं तु

समनन्तरमेव अनिर्वर्ण्य परकलत्रमिति मत्वा तूष्णीं आसांचक्रे । 'यत् असन्निहिते मयि त्वया शकुन्तला परिगृहीता तत् समुचितं सङ्घटनमिति अनुमोदे । तत् इयं इदानीं आपन्नसत्त्वा प्रतिगृह्यतां सहधर्माचरणाय' इति कण्वसन्देशं शार्ङ्गरवो न्यवेदयत् । परं तु दुर्वाससश्शापवशात् विचिन्त्यापि क्षितिपतिः तां परिणीतपूर्वां न प्रत्यभिज्ञातवान् । अतः स काश्यपसन्देशः तस्य आश्चर्यमजनयत् । राजा वञ्चयति इति मत्वा शिष्यौ तं निष्ठुरमनिन्दताम् । स्वप्रत्यभिज्ञानार्थं तदीयमङ्गुलीयकं दर्शयेतां इति गौतमी शकुन्तलां उवाच । तदर्थं अङ्गुलिपरामर्शे तत्र अङ्गुलीयकं नावर्तत । आगमनसमये सलिलार्थं कचित्तीर्थे तैः अवतीर्णम् । तत्र तदङ्गुलीयकं पतितमभवत् । परं तु इदं तदा न ज्ञातम् । अद्यैव अवगतम् । एवं अङ्गुलीयकदर्शनेन दुष्यन्तस्य प्रत्ययं संपादयितुं अशक्ता सा राज्ञः आत्मनश्च रहसि वृत्तं उदन्तं आचख्यौ । तच्छ्रवणेनापि सा परिगृहीतपूर्वा इति स्मृतिः दुष्यन्तस्य नाजनि । राज्ञा स्वयं पूर्वं परिगृहीतैव इति शकुन्तला अवदत् । तेन राजा वञ्चयति इति कण्वशिष्यौ भृशमकुप्यताम् । राजा तां परिग्रहीतुं नान्वमंस्त । तत्र यदि राजवचनं असत्यं स्यात् तर्हि तेन स्वदारपरित्यागः कृतो भवति । यदि शकुन्तलावाक्यमनृतं तदा तस्याः स्वीकरणे परस्त्रीग्रहणं कृतं स्यात् । अनयोर्मध्ये स्वदारपरित्यागे न तावत् पापं यावत् परस्त्रीपरिग्रहे । अतः शकुन्तलां प्रतिग्रहीतुं स नाङ्गीचकार । एवं विवादे सोमरातनामा राजपुरोहितः इत्थमवादीत्—'प्रसवपर्यन्तं शकुन्तला मद्गृहे तिष्ठतु । उत्पन्नः पुत्रः यदि चक्रवर्तिलक्षणोपेतः स्यात् तर्हि इयं त्वया पूर्वं परिणीतैव इति निश्चेतुं शक्यम् । अन्यथा न परिणीतपूर्वा इति ज्ञातं भविष्यति' इति । तत् राज्ञा अनुमतम् । कण्वशिष्यौ गौतमी च तां तत्र परित्यज्य जग्मुः । राजपुरोहितः तां गृहं नयन्नासीत् । परं तु मध्यमार्गे ज्योतिस्स्वरूपं किमप्येत्य शकुन्तलामुत्क्षिप्य अन्तरधात् ।

## VI

अथ एकस्मिन् दिवसे शक्रावतारतीर्थवासी धीवरः कश्चित् रत्नोत्कीर्णनामधेयं दुष्यन्तस्य अङ्गुलीयकं विक्रयाय दर्शयन् पुरपालकैः अगृह्यत । इदमेव पूर्वं राज्ञा शकुन्तलायै अदीयत । मत्स्यबन्धनोपायैः कुटुम्बं पोषयता धीवरेण कदाचित् इदं आसादितम् । एतस्य अङ्गुलीयकस्य दर्शनेन शकुन्तलया कथितं सर्वं वास्तवं इति सा परिणीतपूर्वेव इति च स्मृतिः दुष्यन्तस्य बभूव ।

शकुन्तलां ऊढपूर्वां अनुस्मृत्य राजा पश्चात्तापमुपययौ । तेनैव हेतुना उपभोगार्हेऽपि नृत्तगीतादिके द्वेषं आविश्चकार । अमात्येभ्यः प्रतिदिनं दर्शनं न ददौ । विगतनिद्र एव क्षपाः निनाय । शकुन्तलाविरहजनितदुःखानुभवात् सर्वानपि उत्सवान् प्रतिषिषेध । एवं स्थिते सानुमती नाम अप्सराः मेनकायाः आदेशेन दुष्यन्तस्य वृत्तान्तमुपलब्धुं राजोद्यानमाजगाम । तदा वसन्तोत्सवाय द्वे चेट्यौ आम्रकलिकां अपचिन्वत्यौ अभूताम् । उद्यानपालकः कलिकाभङ्गः न कार्यः इति ते आज्ञापयामास । अङ्गुलीयकदर्शनात् प्रभृति शकुन्तलाविरहखिन्नेन राज्ञा वसन्तोत्सवः प्रतिषिद्धः इत्यवेदयत् ।

अत्रान्तरे विरहखिन्नमात्मानं विनोदयितुं माढव्यद्वितीयो राजा उद्यानवनं अनुप्राप्तः । प्रतिदिननिर्वर्तनीयं प्रजाकार्यं पर्यवेक्षितुं न्यायास्थानीं तस्मिन् दिने नाध्यतिष्ठत् । प्रत्यवेक्षितं पौरकार्यं पत्रमारोप्य प्रेष्यतामिति अमात्यवर्याय सन्दिदेश । अन्यां परिचारिकां स्वहस्तलिखितां शकुन्तलायाः प्रतिकृतिं आनेतुमादिशत् । मणिशिलापट्टसनाथे माधवीमण्टपे राजा तस्य सखा च न्यषीदताम् । तत्र संलापं प्रवर्तयन् दुष्यन्तः शकुन्तलायाः उदन्तं सर्वं जानता माढव्येन कुतः स विषयः न स्मारितः इत्यपृच्छत् । किं तु सर्वं कथयित्वा राज्ञा अवसाने परिहासविजल्पितमिदं इत्याख्यातम् ।

तद्राजवचनं यथार्थमिति मत्वा सङ्कथासु स्मारणं न कृतमिति सखा प्रत्यवादीत्। अप्रतीक्षितस्य अङ्गुलीयकस्य लाभेन राज्ञः अचिन्तनीयः समागमः शकुन्तलया सह पुनर्भाविता इति तद्विरहाविषण्णं दुष्यन्तमाश्वासयामास। शकुन्तलायै कस्मिन् प्रकरणे स्वनाममुद्रा दत्ता इति सख्या पृष्टो नरपतिः वृत्तं सर्वमाचख्यौ। आश्रमात् निर्गमनसमये पुनः कियता कालेन आत्मनः राजसान्निध्यप्राप्तिरिति कण्वदुहिता दुष्यन्तं प्रार्थयाञ्चक्रे। तस्मिन् अवसरे स्वनाममुद्रां तदङ्गुलौ निवेश्य 'तत्र विन्यस्तं एकैकमक्षरमेकैकस्मिन् दिवसे गण्यताम्, तदन्ते भवत्याः शुद्धान्तगृहप्रवेशः भविष्यति' इति तेन अभिहितम्। एवं दिनत्रिके शकुन्तला स्वनगरं प्राप्स्यति इति समाश्वासः कृतः। परं तु दैवदुर्विपाकात् स्वनगरमेत्य तेन सर्वं विस्मृतम्। स्वदत्तमङ्गुलीयकमपि तस्याः हस्तात् मध्येमार्गं क्वचित् तीर्थे परिभ्रष्टम्। ततः तपस्विन्यां शकुन्तलायां अधर्मभीरोः तस्य परिणयसन्देहः आसीत्। माधवीमण्टपे राजमाढव्ययोः संलपतोः सतोः चतुरिका नाम परिचारिका निर्दिष्टं चित्रफलकमानिनाय। तिरस्कारिणीप्रच्छन्ना सर्वमिदमवदधती सानुमती दुष्यन्तलिखितां तां प्रतिकृतिमवालोकयत्। मधुरावस्थानदर्शनीयं तदिति अन्तरमोदत। साक्षादुपगतां तां तिरस्कृत्य इदानीं चित्रफलकदर्शनेन नन्दन् भूपतिः, 'पथि उपनतां जलपूर्णां नदीमतिक्रम्य मृगतृष्णिकायां तृषितस्य अनुरागोऽयं' इति आत्मानमुपजहास। अर्धलिखितं तच्चित्रं पूरयितुं वर्णिकानयनाय चतुरिकां न्ययुङ्क्त। तदानयन्त्याः तस्याः हस्तात् अन्तरा देव्या वसुमत्या अहमेवेदमुपनेष्यामि इति सबलात्कारं वर्तिकाकरण्डकः गृहीतः। चतुरिका त्वरया उपसृत्य वृत्तान्तममुं राज्ञे न्यवेदयत्। देवी इदं मा ज्ञासीत् इति धिया तच्चित्रं माढव्यसकाशे दत्त्वा दुष्यन्तः तमन्यत्र प्रैषयत्।

देवीं प्रतिपालयति महीपतौ वेत्रवती नाम प्रतीहारी अमात्यदत्तं पत्रमादाय उपस्थिता। पत्रहस्तां प्रतीहारीं दृष्ट्वा राज्ञी प्रतिनिवृत्ता।

'धनमित्रो नाम सार्थवाहः समुद्रव्यवहारी नौव्यसनेन विपन्नः । अनपत्यः सः वणिक् । अतः तदीयं धनं राजगामि' इति अमात्येन पत्रं लिखितम् । राजा तु वणिजस्तस्य पत्नीषु काचिदापन्नसत्त्वा इति विदित्वा तस्याः गर्भः पित्र्यमर्हति इति निर्णयमकरोत् ।

अनेन सार्थवाहवृत्तान्तेन स्वस्य अनपत्यतां स्मृत्वा दुष्यन्तः पर्यश्रुनयनः भृशमखिद्यत । शकुन्तलाप्रत्यादेशे राज्ञो न दोष इति यथावदवगम्य सानुमती निष्क्रान्ता । विषण्णे राजनि, मेघप्रतिच्छन्दे स्थितं माढव्यं कोऽपि कण्ठे जग्राह । परित्राणार्थं सुहृदा साक्रन्दं आहूतः क्षितिपतिः शोकविह्वलतां परित्यज्य शौर्यमवलम्ब्य तद्रक्षणार्थं प्रतस्थे । हन्तुमुद्यतं दुष्यन्तं निरीक्ष्य मातलिः नाम इन्द्रसारथिः पुरस्तात् आविरभूत् । 'दुर्जयाख्यदानवगणस्य जयार्थं भवदागमनं प्रतिपालयति देवपतिः' इति स न्यवेदयत् । मनस्सन्तापात् विक्लबीभूतं महीपतिं पश्चात्प्रकोपयितुं माढव्यविषये तथा आचरितं इति च व्यजिज्ञपत् । अनतिक्रमणीया दिवस्पतेः आज्ञा इत्याकलय्य राज्यभारं अमात्यवर्ये निक्षिप्य मातलिना आनीतं रथमारुह्य दुष्यन्तः देवनगरमयात् ।

## VII

मघवतः कार्यं परिसमाप्य निवर्तनसमये मारीचमहर्षिं प्रणन्तुं राजा हेमकूटाख्ये किंपुरुषपर्वते अवातरत् । महर्षिः क्वापि कार्ये व्यापृतः आसीत् । 'अवसरं निरीक्ष्य महर्षये भवदागमनं निवेदयामि' इत्यभिधाय मातलिः निरगात् । तदनु सिंहडिंभं कदर्थं बाधमानं कञ्चित् बालकं तेन सह द्वे तापस्यौ च दुष्यन्तो ददर्श । सिंहडिंभस्य बाधा न कार्या इति तापस्यौ अशिक्षयताम् । बालकस्तु तद्वार्तां न कर्णे चकार । तद्धस्तात् सिंहशिशुं मोचयितुं यं कमपि मुनिकुमारकं ते आह्वयताम् । तदा दुष्यन्तः तत्र ययौ । तस्मिन् बालके पुत्र इव राज्ञो मनः स्निह्यति स्म । बालके चक्र-

वर्तिलक्षणानि अपश्यत् । यस्य कस्यापि चक्रवर्तिनः पुत्रोऽयं इति तस्य मतिः आसीत् । तापसौ परं राज्ञः बालकस्य च आकृत्योः परस्परमनुकारोऽस्तीति अमन्येताम् । शिशोः रक्षाकरण्डकं सिंहविमर्दसमये मणिबन्धात्भ्रष्टं भूमौ पतितमभवत् । तत् दुष्यन्तः स्वहस्तेन जग्राह । बालकं मातापितरौ च वर्जयित्वा अन्येन तत् स्प्रष्टुं न शक्यम् । अन्येन स्पृष्टं चेत् सर्पो भूत्वा दशेत् । तादृशं तत् नरपतिना गृहीतं तयोः आश्चर्यं अजनयत् । अतः सर्वं इदं निवेदयितुं ते शकुन्तलासमीपं अगच्छताम् । स्वयमपि मातृसकाशं गन्तव्यं इति बालो रुरोद । भूपालः तं स्वयमेव आदाय निनाय । तत्र शकुन्तला अवर्तत । तद्दर्शनेन नृपतिः अमन्दं आनन्दं अन्वभवत् । पूर्वं मोहात् प्रत्यादेशः कृतः इति वदन् तस्याः पादयोः अपतत् । ममैव पुराकृतं दुष्कृतं तत्र कारणं इत्यभिधाय शकुन्तला तं उत्थापयामास । धीवरानीतस्य अङ्गुलीयकस्य दर्शनेन स्मरणं जातं इति दुष्यन्तः कथयामास । शकुन्तलया सह समागमं मनसि कृत्वैव देवपतिना मातलिः प्रेषित इति दुष्यन्तः अधिजगाम । एवं स्थिते मारीचः दर्शनं वितरतीति मातलिः अवादीत् । शकुन्तलां पुरस्कृत्य महर्षिदर्शनार्थं महीपतिः अयासीत् । मारीचः दाक्षायणी च तान् आशीर्भिः अन्वगृह्णीताम् । दुर्वासश्शापवशात् प्रत्यादेशः संवृत्तः । न तत्र दुष्यन्तस्यापराध इति वस्तुतत्त्वं मुनिः आविरकरोत् । राजा लोकापवादात् मुक्तं आत्मानं मेने । 'बालकस्य शौर्यानुगुणं सर्वदमन इति नाम कृतम् । इतः परं सप्तद्वीपां वसुमतीं जेष्यति । तदा लोकस्य भरणात् भरतः इत्याख्या संपत्स्यते' इति महर्षिः आशास्त । वृत्तान्तमिमं कण्वाय सन्दिश्य शिष्यं प्राहिणोत् । ततः मारीचेन अनुमतः शकुन्तलया सर्वदमनेन च साकं ऐन्द्रं रथमधिरुह्य स्वनगरमेत्य न्याय्येन पथा दुष्यन्तः महीं चिरं शशास ।

---

# जाजलिचरित्रम् ॥

(V. R. Srinivasa Tatacharya Siromani)

श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मपर्वणि सप्तषष्ट्यधिकद्विशततमाध्यायादिभिश्चतुर्भिरध्यायैर्भीष्माचार्येण युधिष्ठिराय कथितं जाजलेश्चरित्रं प्रत्यपाद्यत। तदत्र संक्षिप्यते। जाजलिर्नाम कश्चिद्वनेचरो नियताहारश्चीराजिनजटाधरो धीमान्विप्रर्षिस्सागरानूपमागत्य बहून्वर्षगणांस्तपस्तेपे। स कदाचित् त्वरया लोकान् दिदृक्षमाणो जलमध्यवसत्। कदाचन स मुनिर्जलमध्ये सकाननां सागरान्तां महीं प्रेक्ष्य स्थावरजङ्गमात्मके अस्मिन्लोके जले आकाशगतग्रहनक्षत्रादेरवगमने मत्समो नास्तीत्यचिन्तयत्। जलमध्ये रक्षोमुखैर्दृश्यमानस्सन् धर्मफलं मया प्राप्तमित्याकाशे आस्फोटयत्। पिशाचा द्विजमवेक्ष्येत्थमब्रुवन्। हे द्विज, नैवं वक्तुमर्हसि यथात्वं ब्रवीषि तथा वक्तुं वाराणसीवासी वैश्यवृत्तिर्महायशास्तुलाधारोपि नार्हतीति। किञ्च घोरेण तपसा युक्तोऽयं मुनिः कदाचित् वर्षास्वाकाशमास्थितोऽन्तरिक्षात् जलं मूर्ध्ना मुहुर्मुहुः प्रत्यगृह्णात्। आप्लुतस्य तस्य जटाः क्लिन्ना ग्रथिताश्चाभवन्। स कदाचित् वायुभक्षः काष्ठवत् निश्चलस्तस्थौ। तस्य शिरसि कुलिङ्गशकुनौ तृणतन्तुभिर्नीडं चक्रतुः। स दयावान् तथा कुर्वाणौ तौ दम्पती उपैक्षत। अथ वर्षास्वतीतासु शरत्काल उपस्थिते शिरसि नीडे सुखं वसन्तौ तौ पक्षिणौ काममोहितौ तत्राण्डान्युदपादयताम्। स धर्मे कृतमना नैवाचलत्। पुष्टेभ्योऽण्डेभ्यश्शकुनाः प्राजायन्त। ते क्रमेण जातपक्षा उड्डीनास्सायं सायं पुनरागताश्चाभवन्। यदा तु उड्डीनाः पक्षिणो मासं यावन्नागच्छन् प्रलीनाश्चाभवन् तदा जातविस्मयस्सिद्धोऽस्मीति मतिं चक्रे। ततः स्नानोपासनादिकं विधाय मूर्ध्ना चिरं कुलिङ्गकुटुम्बरक्षणेन सम्भावितात्मा प्रीतो धर्मफलं मया प्राप्तमित्याकाशे आस्फोटयत्। अथाकाशवाणी पिशाचोक्तिवदभवत्। तैरेवमुक्तो महातपा जाजलिः प्राज्ञं तं तुलाधारमहं पश्येयमिति प्रत्यब्रवीत्। एवं भाषमाणं तमृषिं रक्षांसि सागरादुत्थायेमं पन्थानमास्थाय गच्छेत्यवदन्। एवमुदितस्स विमना महता कालेन वाराणसीं गत्वा वस्तूनि विक्रीणन्तं तुलाधारं ददर्श। वाणिज्यमूलधनेन जीवन् स तुलाधारः आयान्तं विप्रं दृष्ट्वैव समुत्थाय संहृष्टः स्वागतोक्त्याऽऽभ्य-

पूजय त् । इत्थमकथयच्च । हे ब्रह्मन् आयानेव त्वं मम विदितोऽसि । मम वचनं शृणु । सागरानूपमाश्रित्य त्वया महत् तपस्तप्तम् । पुरा धर्मं न कथञ्चनाजानाः । तपसा सिद्धस्य तव शिरसि शकुन्तका अजायन्त । ते त्वया समपोष्यन्त । यदा ते जातपक्षास्सञ्चरितुं गताः तदा चटकप्रभवं धर्मं बहुमन्यमानो मां प्रति खे वाचमश्रौषीः । ततः अमर्षवशमापन्नो भवानिह प्राप्तः । किं ते प्रियं करवाणि तदाचक्ष्वेति । तेनैवमुक्तो जाजलिस्तमेवमुवाच । सर्वरसगन्धादीन्विक्रीणन्तं त्वामियमग्र्या बुद्धिः कुत आगता एतन्मे आचक्ष्वेति । तेनैवमुक्तो धर्मार्थतत्त्ववित् तुलाधारस्तमेवमभ्यधत्त । अहं सर्वभूतहितपरत्वरूपं सनातनधर्मं जानामि । भूतानामद्रोहेणाल्पद्रोहेण वा या वृत्तिः स परो धर्मः । तेन जीवामि । परिच्छिन्नैः काष्ठतृणैः मयेदं शरणं कृतम् । उच्चावचान्गन्धान् मद्यभिन्नान् बहून् रसांश्च क्रीत्वा वञ्चनं विना विक्रीणे । सर्वेषां नित्यं यः सुहृत् मनसा वाचा कर्मणा च सर्वेषां हिते यो रतः स धर्मं बुध्यते । अहं कञ्चिदपि नानुरुध्ये । केनचिदपि न विरुध्ये । सर्वभूतेषु मे समा कृपा । अहं समलोष्टाश्मकाञ्चनः । अर्थकामभोगेषु मे स्पृहा नास्ति । यदा पुरुषः कस्माच्चिदपि न बिभेति तस्माच्च किञ्चिदपि न बिभेति कामक्रोधौ तस्य व्यपगतौ भवतस्तदैव तस्य सिद्धिः । करणत्रयेणापि सर्वभूतेषु पापमकुर्वाणस्य ब्रह्म अन्तिके भवति । यस्मात् भूतं किञ्चिदपि जात्वपि कथञ्चिदपि नोद्विजते स सर्वभूतेभ्योऽभयं प्राप्नोति । केचन दंशमशकाद्याकुलकर्दमदेशकर्षणभारयुक्तशकटयोजनमारणादिभिर्गवादीन् प्राणिनो दयां विना हिंसन्ति । भूमिं भूमिशयांश्च कर्षणेन घ्नन्ति । प्राणिनो हत्वा तान्भुञ्जते । तदपेक्षया अपण्यवस्तुविक्रयः किं दोषमावहेत् । भूतानामहिंसाया ज्यायान् कश्चन धर्मो नास्ति । यो मां हन्यात् यो मां स्तुयात् तावुभावपि मे समौ स्याताम् । न हि मे प्रियाप्रिये स्तः । अग्नौ प्रास्ताऽऽहुतिरादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः । वृष्टेरन्नं, ततः प्रजाः । फलाभिसन्धिमन्तरा धर्म आचरणीयः ।

स्वर्गादिपुरुषार्थमनिच्छन्तः सात्विकाः पुनरावृत्तिरहितं ब्रह्मणस्थानं प्राप्नुवन्ति । यागानुष्ठानाशक्ताः पुरुषाः स्वसम्बन्धेन सद्यः पापनाशकैः परलोकप्रदैः गोः आज्यपयोदधिशकृदामिक्षात्वग्भिः गोः पुच्छे पितृतर्पणादिना शृङ्गे अभिषेकादिना पादरजसा चानुष्ठितमखा भवन्ति । बहव एते शकुन्तास्तवोत्तमाङ्गे संभूताः । देहस्थितेषु नीडेषु प्रवेशाय सङ्कुचितहस्तपादानेतान्

पश्य । त्वया बहुमता एते खगाः त्वां पितरं सम्भावयन्ति । असंशयं त्वमेतेषां पिता । पुत्रानेतानाह्वयेति । इत्थमुक्तेन जाजलिना समाहूताः पतत्रिणः अहिंसासम्बन्धिप्रियवचनादुत्तरं प्रायच्छन् । तदनु तुलाधारः अहिंसां वैदिककर्मणि श्रद्धां च बहुधा प्राशंसत् । एवं भूतहितपरत्वभूताद्रोहावञ्चनसर्वसौहार्दस्पर्धाशून्यत्वादिरूपांस्तांस्तान् धर्मान् जाजलिश्श्रुत्वा स्वयमपि शान्तिमन्वपद्यत । ततोऽचिरेण कालेन तुलाधारो जाजलिश्च दिवं गत्वा स्वकर्मफलनिर्मितं तत्तत्स्थानमासाद्य व्यहरताम् । अयं तु महानुभावस्तुलाधारो धर्मव्याधविदुरादिवत् पूर्वजन्माभ्याससंसिद्धः न पुनरेतस्मिन्नेव जन्मनि वेदाभ्यासादिजनितज्ञानवान् । अत एव स धर्मसन्देहनिराचिकीर्षया समागताय ब्राह्मणाय जाजलये विद्यामन्त्रादिकमनुपदिश्य धर्मकथामात्रमवददित्याचख्युराचार्याः । अत्रायं श्लोकः—

'धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते ।
वर्णावरत्वे संप्राप्ताः संसिद्धिं श्रमणी यथा ॥' इति ।

---

# प्रकृतिभेदः ॥

I

बालिका— मामि, मामि, भक्ष्यं मामि; किमपि देहि मामि ।

वृद्धा—किमम्ब भक्ष्यमस्मद्गृहे वर्तते । गृहं गत्वा मातरं याचस्व ; दास्यति ।

बालिका— मामि मामि, भूमिचणकान् वा देहि मामि । पञ्चषान् देहि मामि अलम् ।

वृद्धा— कुतोऽम्ब मे भूचणकाः । न खलु क्रीतवत्यस्मि ।

बालिका— गुडं किञ्चिद्देहि मामि । चणका मा भूवन् ।

वृद्धा— अहो बत । कियदियं पीडयति ।

II

वृद्धा — एहि जात, इदं गृहीत्वा भक्षय । मधुरं स्यात् ।

शिशुः— मम मा भूत् मामि । अद्याहं गृहे भक्ष्यमग्रहीषम् ।

वृद्धा— अस्तु तात । इदमपि गृहीत्वा भक्षय ।

शिशुः— मा भून्मामि । त्वमेव भक्षय । अहमिदं गृह्णीयां चेत् मम माता कुप्येत् ।

वृद्धा— अहो शिशोर्नैरपेक्ष्यम्.........

---

16

शेक्स्पिअर्-कृतं

# यथाभिमतम्॥

द्वितीयोऽङ्कः

प्रथमं प्रेक्षणकम्। आर्देन्-वनम्।
ततः प्रविशति ज्येष्ठो राजा, अमीन्स्, अन्ये च प्रभवः
आरण्यकवेषधारिणः।

ज्येष्ठो राजा— अथ मे सहविप्रवासिनो भ्रातरः, किं न कृतवान् चिराभ्यासः इदमस्माकं जीवनं कृत्रिमाडम्बरजीवनान्मधुरतरम्? किन्तु न भवन्तीमे वनप्रदेशाः असूयाभरितादास्थानात् निरपायतराः? अनुभवाम एव वयं आडम्-अस्य* दण्डं ऋतुलक्षणभेदं प्रावृड्वातस्य अतिशीतदंष्ट्रारूपेण घोरनिस्वनरूपेण च। किं तु यदा स मां दशति देहमभि तथा प्रवाति च यथा शीतेन संकुचितो भवामि, तदा तं प्रति स्मितं कुर्वन् अहं ब्रवीमि— 'नेयं मिथ्या स्तुतिः। एते उपदेष्टारः ये, योऽहमस्मि तत् प्रीत्या मां ग्राहयन्ति'। हृद्या नाम दशाविपर्ययस्योपयोगाः। स हि सर्प इव बीभत्सोऽपि विषधरोऽपि शिरसि महार्घं मणिं बिभर्ति। जनसम्पातबाधाविमुक्तं चेदं जीवितं वृक्षेषु वाचं, स्रवत्सु स्रोतस्सु ग्रन्थान्, शिलासु उपदेशान् प्रतिवस्तु गुणं च पश्यति। नाहमत्र विपर्यासं कामये।

अमीन्स्— धन्योऽत्रभवान् यः दिष्टस्य पारुष्यं एवं प्रशान्तमधुराकारतया विपरिणमयितुं प्रभवति।

ज्येष्ठो राजा— एहि। कच्चिन्मृगमांसमाहर्तुं गच्छेव? व्यथयति चेदं मां

---

* अयं प्रथमसृष्टः पुरुषः। प्रथममस्य ऋतुभेदो नासीत्। सर्वो वसन्त एव। पश्चात् कृतापराधस्यास्य दण्डतया भगवान् वर्षहिमादिलक्षणऋतुविशेषानुभवं कल्पयामासेत्यैतिह्यम्।

यदेते तपस्विनो मृगाः निर्मनुष्यस्यास्य पत्तनस्य* प्रकृत्या पौराः सन्तः स्वदेश एव शरैः व्याविद्धपृष्ठा भवन्ति ।

प्रथमः प्रभुः— परमार्थतः, प्रभो, निर्वेदशीलो जाक्विस् अत्र विषीदति । अस्मिन् विषये भवन्तं निष्कासितवन्तं भवतो भ्रातरमपेक्ष्य भवान् अतितरामाक्रमणकारीति सङ्गिरते च । अस्मिन् दिने अयं अमीन्स्-प्रभुः अहं च इदं वनमनु प्रवहतो निर्झरस्योपरि निर्गतजीर्णमूलस्य अशोकपादपस्य अधस्तात् शयितस्य तस्य पृष्ठतः गूढमगमाव । तमेव प्रदेशं यूथभ्रष्टः कस्यचिन्मृगयोर्लक्ष्यीभूय लब्धप्रहारः तपस्वी कश्चन हारिणः वेदनानुभवाय आगमत् । वराको मृगः तथा आक्रन्दान् अमुचत यथा देहावरणं चर्म विदीर्यमाणावस्थमभूत् । स्थूलानि वर्तुलानि चाश्रूणि दयनीयया त्वरया नासाया अधः सानुबन्धमपतन् । एवं स लोमशो जडः§ निर्वेदप्रधानेन जाक्विस् अनेन प्रसमीक्ष्यमाणः वेगिनो निर्झरस्य अत्यन्तपरिसरे अश्रुभिस्तं वर्धयन् अतिष्ठत् ।

ज्येष्ठो राजा— अथ जाक्विस् किमवोचत् ? स किमस्मिन् प्रेक्षणके नीतियोजनं नाकार्षीत् ?

प्रथमः प्रभुः— ओं, आम् । बहुभिर्निदर्शनैः । आदौ निरपेक्षे प्रवाहे तस्य अश्रुपातनं प्रति स आह— 'दीन हारिण, लोके जना इव त्वं त्वदीयप्रदानेन अभिवर्धयितुमिच्छसि यत् प्रागेव अतिसमग्रम् ।' अथ मृदुशरीरैः सुहृद्भिः परित्यक्तस्योपेक्षितस्य तस्य एकाकिनोऽवस्थानं प्रति स आह— 'सम्यगेतत् यदेवं विपत् जनसम्पर्कं वारयति ।' अनुपदं अनादृतं यूथं पूर्णघासं समीपे तस्य प्लुत्वा धावति, न तु जात्वपि तमभिसमीक्षते । स आह— 'आः ! प्रसरत, यूयं हृष्टपुष्टाः पौराः, अयमद्य समुदाचारः । कुतो यूयं पश्यथ तं तत्रस्थितं दीनं दुर्गतं हतम् ?'

---

* वनस्य ।   § हारिणः ।

इत्थं अतिरूक्षं स तुदति ग्रामस्य पत्तनस्य आस्थानस्य च स्वरूपम् । अस्य अस्मज्जीवितस्य च ।

ज्येष्ठो राजा— किं भवान् अस्यां निध्यानावस्थायां तममुचत् ?

द्वितीयः प्रभुः— प्रभो, वयं तममुचाम निश्वसतस्तस्य मृगस्य कृते रुदन्तं बहुधा वर्णनाः कुर्वन्तश्च ।

ज्येष्ठो राजा— मार्गं मे दर्शय । ईदृशीषु अवसादपारवश्यावस्थासु तेनाहं समागन्तुमिच्छामि, यतः स तदा विषयैः पूर्णो भवति ।

प्रथमः प्रभुः— सम्प्रति तमहं भवन्तं नेष्यामि ।

[निष्क्रान्ताः]

# वृक्षाः ॥

असमन्नगरे ईशानकोणे अस्ति कश्चन तटाकः । दक्षिणोत्तरतः किञ्चिद्दैर्घ्ये सत्यपि प्रायो वर्तुलाकार एवायम् । अस्य पश्चिमतः कश्चन कासारः गङ्गादेव्या आलयश्च स्तः । अन्यासु तिसृषु दिक्षु केवलं शून्यं स्थलमासीत् । अद्य आहाराभिवर्धनसंरम्भवशात् कृषिः क्रियते । मरुप्राया भूमिः धान्यक्षेत्रात्मना परिणामं भजते । किन्तु कृषीवलाः तीरप्रान्ते तीर एव च साक्षात् कुटीरं निर्माय नक्तन्दिवं वसन्तः तस्य स्वाभाविकं रामणीयकं पारिशुद्ध्यं च विनाशयन्ति । तस्यां दिशि गमनादपि वयमद्य जुगुप्सामहे ।

देवे वर्षति सति उत्तरतः सन्निहिते शैले अभिवृष्टं जलं सारण्या आगत्य इम तटाकं पूरयति । अल्पे वर्षे अयमपूर्ण एव भवेत् । पूर्णत्वे अस्य दर्शनमतिमनोहरम् । पयः परिशुद्धं मधुरं च । सन्निकृष्टगृहवासिनो जनाः इत एव पानीयं हरन्ति ।

TIRUPATI ... LIBRARY



यदा समृद्धं जलं तदा तत्र निबिडां महतीं विस्तृतां निजच्छायां क्षिपन्तः उन्नताः बृहन्तः सुदीर्घबहुशाखाः वृक्षाः तीरे सर्वतः प्ररूढाः । कदा कैरेते सरोपिताः, न वयं ज्ञातुमीश्महे । द्विपदां चतुष्पदां च विश्राम्यतां शीतलच्छायाप्रदानेन इमे बहूपकुर्वन्ति । गरुडादीनां विहगानामुच्चावचानां वासस्थानीभवन्ति । काले आहारं फलन्ति च । शाखामृगाश्च एषां शाखासु प्लवमानाः लम्बमानाः सङ्क्रीडमानाः रममाणाः युध्यमानाः निद्रान्तश्च दिनं रात्रिं च नयन्ति ।

अहो बताद्य अत्याशाविवशा जनाः । ऋणं कृत्वा रूप्याणि भस्त्रायां निधाय चोरीग्रहणवैयग्र्याविस्मृतात्मनां प्रयाणिनां पणभस्त्रिकामनन्यज्ञातं मुष्णान्ति । अनुपदं तेषां भवित्रीं दुरवस्थां प्रति एषां का चिन्ता । एवं सजातीयेषु मनुष्येषु निरनुक्रोशा जनाः वृक्षेषु किं सानुक्रोशा भविष्यन्ति ? सृण्या शाखिका लूत्वा लूत्वा अजाभ्यो ग्रासान् प्रयच्छन्ति । उपर्यारुह्य असिना शाखाश्छित्त्वा इन्धनार्थमन्यार्थं वा हरन्ति । औषधार्थं त्वगिति क्षीरमिति प्रकाण्डानि परितः खनित्रकेण गाढं कुथ्नन्ति, येन अचिरात् वृक्षाः निर्जीवा भवन्ति । प्रचण्डेन वातेन भग्नासु शाखासु स्वयं तत्स्वामिन इव अतित्वरया आगत्य भग्नाधिकमपि छित्त्वा विदार्य उत्पाट्य नयन्ति । अनेन क्रमेण साम्प्रतं एते वृक्षा विरलीभवितुमारब्धवन्तः । तीरप्रदेशा बहवः निश्छायाः आतपतापतप्ता भवन्ति । इतः कतिपयेषु वर्षेषु गतेषु नूनं कृत्स्नं तीरमशेषतो मुण्डितं भविष्यति ।

अत्रायं मम अन्तश्शोकः । नगरवासिषु इयत्सु जनेषु किं यः कश्चिदेकः इमं विषयं चिन्तयति ? कथं नाम हरणाय प्रायः सर्वे त्वरन्ते ; अभिनवस्य वृक्षस्य संरोपणे तु न कस्यचिन्मतिरपि भवति ? को लोकः ? का स्थितिः ? कः किं करोतु .... .... ।

---

Registered No. M 2300.

Book XXII ॥ श्रीः ॥ Nos. 3 & 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २२] कलि ५०४९ सर्वधारि ‖ वृश्चिक धनुः } साधारण सं २ / शास्त्रानुबन्ध-सं २ / साहत्य ,, ४

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

November & December 1948

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] २६१—२६८

1 मेनका ।
2 सुभाषितनीवी ।
3 स्वस्ति । [बद्धः ।
4 गुरोः त्वंकारः स्वस्तवध्य
5 नाटककथासारः ।
6 प्रकृतिभेदः (2) ।
7 पूर्णत्वसंवादः ।
8 अहिंसा ।
9 पुस्तकपरामर्शः ।
प्रतिबोधनम्—wrapper

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.**
Lecturer, Sri Venkateswara College,
TIRUPATI.

यथा वा—

'मालिन्यमब्जशशिनोर्मधुलिट्कलङ्कौ
धत्तो मुखे तु तव दृक्तिलकात्मनाभाम् ।
दोषावितः क्वचन मेलनतो गुणत्वं
वक्तुर्गुणो हि वचसि भ्रमविप्रलम्भौ ॥'

इति विकस्वरः ।

अथ प्रौढोक्तिः ।

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम् ।
कचाः कलिन्दजातीरतमालस्तोममेचकाः ॥

कार्यातिशयाहेतौ तद्धेतुत्वप्रकल्पनं प्रौढोक्तिः । यथा तमालगतनैल्यातिशयाहेतौ यमुनातटरोहणे तद्धेतुत्वपरिकल्पनम् ।

---

मालिन्यमिति । मधुलिट्कलङ्कावब्जशशिनोः मालिन्यं धत्तः वितरतः । दृक्तिलकात्मना आभां भामिति वा छेदः । धत्त इत्यनुषङ्गः । दोषौ प्रत्येकं दोषत्वेन दृष्टौ क्वचन मेलनतः गुणत्वमितः प्राप्नुतः । इण् गतौ । भ्रमविप्रलम्भौ प्रत्येकं दोषत्वेन दृष्टौ वक्तुर्वचसि गुणः* । भ्रान्तप्रतारकवाक्ये तयोर्मिलितयोः याथार्थ्यपर्यवसायित्वादिति भावः ।

इति विकस्वरः ।

अथ प्रौढोक्तिः ।

प्रौढोक्तिरिति । हेतूपन्याससाम्यात् काव्यलिङ्गेन सङ्गतिः । चतुर्थविभावनाव्युदासाय उत्कर्षेति । 'नीलोत्पलानि दधते कटाक्षैरतिनीलताम् ।' इत्यादिवारणाय अहेताविति । 'उ(अनु)त्कर्षो नीलोत्पलवनचरत्वेऽप्यलितते:' इत्यादिवारणाय अनन्तरदलम् ।

---

* 'वक्तुर्गुणौ' इति द्विवचनपाठः प्रसिद्धः । मिलितयोरेव गुणत्वं न पृथगिति ज्ञापनोपयोगितया एकवचनपाठ एव व्याख्यातुः सम्मत इति स्यादपि ।

यथा वा—

कल्पतरुकामदोग्ध्रीचिन्तामणिधनदशङ्खानाम्।
रचितो रजोभरपयस्तेजश्श्वासान्तराम्बरैरेषः॥

अत्र कल्पवृक्षाद्येकैकवितरणातिशायिवर्णनीयराजवितरणातिशयाहेतौ कल्पवृक्षपरागादिरूपपञ्चभूतनिर्मितत्वेन(त्वे) तद्धेतुत्वपरिकल्पनं प्रौढोक्तिः।

इति प्रौढोक्तिः।

अथ सम्भावना।

सम्भावना(न) यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये।
यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव॥

---

कल्पेति। राजशरीरारम्भकपृथिव्यादिपञ्चकं वदान्यत्वेन प्रसिद्धवस्तुसारांशभूतमिति श्लोकतात्पर्यम्। अन्तराम्बरं मध्याकाशः।

इति प्रौढोक्तिः।

अथ सम्भावना(नम्)।

सम्भावनमिति। पूर्वत्र कार्यसिद्धिः(द्धये) अहेतोः हेतुत्वकल्पनं इह तूह इति सङ्गतिः। अन्यस्य सिद्धिः(द्धये) यदीत्थं स्यादिति ऊहः सम्भावनालङ्कार इत्यर्थः। निरर्थकोन्मत्ताद्यूहवारणाय अन्यस्य सिद्धय इति। अन्यमिथ्यात्वसिद्धये मिथ्यार्थान्तरस्य सिद्धवत्कल्पनात्मकोत्तरालङ्कारवारणाय ऊहपदम्।

'भवतु भवतु दृष्टं मृदुपवनाविभिन्नो
घनरुचिरकलापो निस्सपत्नोऽद्य जातः।
रतिविगलितबन्धे केशहस्ते प्रियायाः
सति कुसुमसनाथे किं करोत्वेष बर्ही॥'

इत्यूहवारणाय ऊहाभिनयः।

यथा वा—

कस्तूरिकामृगाणामण्डाद्गन्धगुणमखिलमादाय ।

यदि पुनरहं विधिः स्यां खलजिह्वायां निवेशयिष्यामि ॥

'यद्यर्थोक्तौ च कल्पनमतिशयोक्तिभेदः' इति काव्यप्रकाशिकारः ।

इति सम्भावना ।

अथ मिथ्याध्यवसितिः ।

किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् ।

मिथ्याध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन् ॥

अत्र वेश्यावशीकरणस्यात्यन्तासम्भावितत्वसिद्धये गगनकुसुममालिकाधारणरूपार्थान्तरकल्पनं मिथ्याध्यवसितिः ।

---

कस्तूरिकेति । अण्डात् वृषणात् । गन्धगुणं गन्धरूपं गुणम् । खलजिह्वायां गन्धनिवेशे सति कस्तूरिकामृगाण्डकोशवत् तस्या अपि प्रसमच्छेदः सिद्ध्येदिति भावः । काव्यप्रकाशिकाकार इत्युपलक्षणम् । सर्वस्वकारोऽपीति बोध्यम् । लक्ष्यनाम्नो[र]नानुगुण्यमत्र अस्वरसबीजम् ।

इति सम्भावना(नम्) ।

अथ मिथ्याध्यवसितिः ।

किञ्चिदिति । अन्यस्य सिद्धये कल्पनाप्रसङ्गात्सङ्गतिः । कस्यचित् मिथ्यात्वसिद्ध्यर्थं मिथ्याभूतार्थान्तरकल्पनं मिथ्याध्यवसितिरलङ्कार इत्यर्थः । वेश्यामित्युदाहरणम् । सम्बन्धातिशयोक्तिवारणाय पूर्वदलम् ।

'मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः

सत्त्वानामभिलक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।

उत्कर्षस्स च धन्विनां यदिषवस्सिद्ध्यन्ति लक्ष्ये चले

मिथ्या हि व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ॥'

इत्यादिव्युदासायानन्तरदलम् । मिथ्येति । कल्पनं सिद्धवन्निर्देशः ।

यथा वा—

अस्य क्षोणिपतेः परार्द्धपरया लक्षीकृताः सङ्ख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्राव्याः किलाकीर्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥

अत्राद्योदाहरणं निदर्शनागर्भम् । द्वितीयं तु शुद्धम् । असम्बन्धे सम्बन्धरूपातिशयोक्तितो मिथ्याध्यवसितेः किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनात्मना विच्छित्तिविशेषेण भेदः ।

इति मिथ्याध्यवसितिः ।

अथ ललितम् ।

प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम् ।
ललितं निर्गते नीरे सेतुमेषा चिकीर्षति ॥

---

तेन—

'राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्या मुखं तदा साम्यपराभवमाप्नुयात् ॥'

इति पूर्वालङ्कारे नातिव्याप्तिः ।

अस्येति । परार्धं समस्तसङ्ख्याप्रपञ्चपरिसमाप्तिसीमा सङ्ख्याविशेषः । ततोऽपि परया सङ्ख्यया लक्षीकृताः विषयीकृताः परिच्छिन्ना इति यावत् । प्रज्ञाचक्षुरवेक्ष्यमाणाश्च ताः बधिरश्राव्याश्चेति खञ्जकुब्जादिवत्समासः । 'ईक्षणध्यानसंस्पर्शैः मत्स्यकूर्मविहङ्गमाः' इति प्रमाणानुरोधेन ध्यानादेव शिशुपोषिकाणां कूर्मरमणीनां दुग्धमेव मिथ्या कुतः तदुदधिरिति भावः ।

इति मिथ्याध्यवसितिः ।

अथ ललितम् ।

प्रस्तुत इति । पूर्वत्र [किञ्चिन्मिथ्यात्व-]सिद्ध्ये मिथ्यार्थवर्णनम् । इह तु सत्यभूतप्रस्तुतवाक्यार्थसिद्ध्ये तथाभूतम(ता)प्रस्तुतार्थकल्पनमिति सङ्गतिः । अप्रस्तुतप्रशंसावारणाय प्रस्तुत इति । वर्ण्यवाक्यार्थवर्णनवारणाय

प्रस्तुते धर्मिणि यो वर्णनीयो वाक्यार्थस्तमवर्णयित्वा तत्रैव तत्प्रतिबिम्बरूपस्य कस्यचिदप्रस्तुतवाक्यार्थस्य वर्णनं ललितम्। यथा कथ(किं?)ञ्चिद्दाक्षिण्यसमागततत्कालोपेक्षितप्रतिनिवृत्तनायिकान्तरासक्तनायकानयनार्थं सखीं प्रेषयितुकामां नायिकामुद्दिश्य सख्या वचनेन तद्व्यापारप्रतिबिम्बभूतगतजलसेतुबन्धनवर्णनम्। नेयमप्रस्तुतप्रशंसा। प्रस्तुतधर्मिकत्वात्। नापि समासोक्तिः। प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाधारण्येन सारूप्येण वा अप्रस्तुतवृत्तान्तस्फूर्त्यभावात्। अप्रस्तुतवृत्तान्तादेव सरूपादिह प्रस्तुतवृत्तान्तस्य गम्यत्वात्। नापि निदर्शना। प्रस्तुताप्रस्तुतवृत्तान्तयोश्शब्दोपात्तयोरैक्यसमारोप एव तस्यास्समुन्मेषात्। यदि विषयविषयिणो-

---

प्रतिबिम्बस्येति। प्रस्तुतधर्मिकावर्ण्यवाक्यार्थप्रतिबिम्बवर्णनात्मकस्य 'पुरा यत्र स्रोत' इत्यादेर्व्युदासाय वर्ण्येति। ललितमिति लक्ष्यनाम। ननु वर्ण्यवाक्यार्थतत्प्रतिबिम्बोभयवर्णनात्मकनिदर्शनायां प्रस्तुते नायके वर्णनीयवाक्यार्थप्रतिबिम्बभूतभृङ्गवाक्यार्थादिवर्णनात्मके, 'किं भृङ्ग सत्याम्' इति प्रस्तुताङ्कुरे च अतिप्रसङ्ग इत्यत आह— **प्रस्तुत** इति। अवर्णयित्वेति निदर्शनाव्युदासः। अप्रस्तुतेति। प्रस्तुताङ्कुरे प्रतिबिम्बस्यापि प्रस्तुतत्वात्तद्व्यावृत्तिरिति भावः। वर्ण्यवाक्यार्थं स्फुटीकुर्वन् योजयति। कि(कथ?)ञ्चिदिति। अत्र ललितालङ्कारः प्राचीना[न]भ्युपगतोऽपि ग्रन्थकृता विच्छित्तिविशेषानुभवात् स्वयं लक्ष्यलक्षणश्लोकरचनापूर्वकमभ्युपगतः। तदिहास्य सर्वालङ्कारोत्तीर्णत्वम्। तदेषा [चिन्ता।] प्रस्तुतधर्मिकप्रस्तुतवाक्यार्थवर्ण(ज)नपूर्वकतत्प्रतिबिम्बाप्रस्तुतवाक्यार्थवर्णनत्वं च (?) चमत्कृतिविशेषजनकतावच्छेदकतया अनुभूयमानं उपमादिसम्प्रतिपन्नालङ्कारेषु अन्यतर(म)वृत्ति नवेति। विधिकोटिः प्राचाम्। निषेधकोटिः अर्वाचाम्। कोट्योः प्रसिद्धिस्तूपमात्वादौ घटत्वादौ च द्रष्टव्या। 'क्लृप्तकल्प्यविरोधे तु युक्तः क्लृप्तपरिग्रह' इति विधिकोटौ युक्तिः। 'क्लृप्तान्तर्भूत्ययोगे स्यादगत्या कल्प्यसङ्ग्रहः' इति निषेधकोटौ। तत्र क्लृप्तेष्वन्तर्भावासम्भवमेव सम्भाविताशङ्कानिरासपूर्वकं प्रपञ्चयति—नेय-

शब्दोपात्तयोः प्रवर्तमान एवालङ्कारो विषयिमात्रोपादानेऽपि स्यात्तदा रूपकमेव भेदेऽप्यभेदरूपाया अतिशयोक्तेरपि विषयमाक्रामेत्। ननु तर्ह्यत्र प्रस्तुतनायकादिनिगरणेन तत्र शब्दोपात्ताप्रस्तुतनीराद्यभेदाध्यवसाय इति भेदे अभेदरूपातिशयोक्तिरस्तु, एवं तर्हि सारूप्यनिबन्धनाप्रस्तुतप्रशंसाविषयेऽपि सैवातिशयोक्तिः स्यात्। अप्रस्तुतधर्मिकत्वान्न भवतीति चेत्। तत्राप्यप्रस्तुतधर्मिवाचकपदस्यापि प्रसिद्धातिशयोक्त्युदाहरणेष्विव प्रस्तुतधर्मिलक्षकत्वसंभ-

---

मित्यादिना। शब्दोपात्तयोरिति। नन्वत्रापि एषेति सर्वनाम्ना प्रस्तुतविशेषणविशिष्टविशेष्यपरामर्शिना वर्ण्यवाक्यार्थोऽप्युपात्त इति निदर्शनैव स्यादिति चेन्न। तात्पर्यवशेन केवलविशेष्यपरामर्शस्यापि सम्भवेन तदानीम(तदा नि)दर्शनानुपपत्तेः। अत एव सङ्करप्रकरणे शशिनमुपगतेयमिति श्लोके इयमिति सर्वनामपदं प्रस्तुत्य वक्ष्य[ति] "यदि सा स्वरूपेणैव निर्दिश्यते" इति। वस्तुतस्तु 'सेतुं मुग्धा चिकीर्षति' इति पाठे निदर्शनाया उक्तिसम्भव एव नास्तीत्याशयः। ननु तत्र शब्दोपादानमतन्त्रं गौरवादित्यत आह—यदीति। अतिशयोक्तिप्रसङ्गोद्बुद्धसंस्कारः शङ्कते— नन्विति। परमुखेन स्वाभिमतसमाधानं वाचयितुं प्रतिबन्दीमाह— एवं तर्हीति। अप्रस्तुतधर्मिकत्वादिति। सारूप्यनिबन्धनाप्रस्तुतप्रशंसाया इति शेषः। न भवतीति। सारूप्येत्यारभ्य अतिशयोक्तिरित्यन्तस्यानुषङ्गः। अतिशयोक्तेः प्रस्तुतधर्मिकत्वनियमादिति भावः। यद्यपि तत्र अप्रस्तुतवाचकानां नीलोत्पलादिशब्दानां मुख्यवृत्त्या प्रस्तुतनेत्रादिपरत्वमनुपपन्नं तथापि साध्यवसानलक्षणया तदुपपद्यत इति भावः। तदिदमप्रस्तुतप्रशंसायामपि सम्भवतीति प्रतिबन्दीमेव द्रढयति— तत्रेति। सारूप्यनिबन्धनाप्रस्तुतप्रशंसाविषय इत्यर्थः। प्रस्तुतधर्मिलक्षकत्वसंभवादिति। प्रस्तुतधर्मिप्रतिपादकत्वसम्भवादित्यर्थः। यद्यपि प्राचां मतानुरोधेन लक्षणामभ्युपेत्य लक्षकत्वसम्भवादित्युक्तम्। न तु लक्षणायां ग्रन्थकृतस्तात्पर्यम्। तस्यास्तत्र दुर्वचत्वात्।

वात । नन्वप्रस्तुतप्रशंसायां सरूपादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थोऽवगम्यते, न त्वतिशयोक्ताविव विषयिवाचकैस्तत्तत्पदैर्विषया लक्ष्यन्त इति भेद इति चेत् । तर्हीहापि प्रस्तुतगनादप्रस्तुतवृत्तान्तरूपाद्वाक्यार्थात्तद्गतप्रस्तुतवृत्तान्तरूपो वाक्यार्थोऽवगम्यत इत्येवातिशयोक्तितो भेदोऽस्तु । वस्तुतस्तु

---

शक्यसम्बन्धो हि लक्षणा । न च शक्याभेदाध्यवसाये [स] सम्भवति । न चात्राभेद एव सम्बन्धो लक्षणा । घटादिशब्दानां मुख्यार्थेऽपि लक्षणापत्तेः । नाप्यारोपितस्य(स्स) लक्षणा । तदभेदारोपे तद्वाचकपदवाच्यत्वस्य आरोपावश्यम्भावेन लक्षणानुपपत्तेः । यत्त्विह उपमानोपमेयसाधारणधर्मपुरस्कारेण उपमानपदं उपमेयं लक्षयतीति प्राचामुपपादनं तदनुभवविरुद्धम् । अनुभवस्य अभेदावगाहित्वेन सर्वसंप्रतिपन्नत्वात् । कथमन्यथा 'कमलमनम्भसि कमले–' 'जाता लता हि शैले–' इत्यादीनामुपपत्तिः । अत एव 'यजमानः प्रस्तर' इत्यादौ तत्कार्यकरत्वादिकं लक्ष्यत इत्युपपादयन्तो मीमांसकाः समाहिताः । अत एव हि 'अन्नं ब्रह्मेत्युपासीत' इत्यादौ दृष्टिविधिस्थले तादात्म्यबुद्धिरभ्युपगता । न चैवं चित्रमीमांसायां रूपकप्रकरणे

'यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात् ।
उपमेये भवेद्वृत्तिः तदा तद्रूपकं मतम् ॥'

इति सरस्वतीकण्ठाभरणदूषणावसरे अतिशयोक्तिस्थले लक्षणाभ्युपगमविरोधः । तस्यापि प्राचीनमताभिप्रायत्वादिति दिक् ।

नन्विति । न चात्र विनिगमनाविरहः विपर्ययो वा शङ्कनीयः । अप्रस्तुतप्रशंसायां लोकसंप्रतिपन्नप्रास्तुतवृत्तान्तलाभात् । अतिशयोक्तौ तु तदसम्भवात् । तर्हीति । गतजलसेतुबन्धवृत्तान्तस्यापि लोकसंप्रतिपन्नत्वादिति भावः । नन्वप्रस्तुतप्रशंसायां अप्रस्तुतधर्मिकवृत्तान्तस्य लोकसंप्रतिपन्नत्वेऽपि प्रकृते प्रस्तुतधर्मिकाप्रस्तुतवृत्तान्तो न तथाविध इत्याशयादाह— वस्तुतस्त्विति ।

सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं
दृष्टिस्सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा।
पूर्वं निश्चितवानसि भ्रमर हे यद्वारणोऽद्याप्यसा-
वन्तश्शून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः॥

इत्याद्यप्रस्तुतप्रशंसोदाहरणे प्रथमप्रतीतादप्रस्तुतवाक्यार्थात्प्रस्तुत-वाक्यार्थोऽवगम्यत इत्येतन्न घटते। अप्रस्तुते वारणस्य भ्रमरासेव्यत्वे कर्णचापलमात्रस्य भ्रमरनिरासकरणहेतुत्वसंभवेऽपि रसनाविपर्यया-न्तश्शून्यकरत्वयोर्हेतुत्वासंभवेन मदस्य प्रत्युत तत्सेव्यत्व एव हेतुत्वेन च रसनाविपर्ययादीनां तत्र हेतुत्वान्वयार्थं वारणपदस्य दुष्प्रभुरूप-विषयकोडीकारेणैव प्रवृत्तेर्वक्तव्यत्वात्। एवं सत्यपि यद्यप्रस्तुतसंबो-धनादिविच्छित्तिविशेषात्तत्राप्रस्तुतप्रशंसाया अतिशयोक्तितो भेदो घटते। तदत्रापि प्रस्तुतं धर्मिणं स्वपदेन निर्दिश्य तत्राप्रस्तुतवर्णना-रूपस्य विच्छित्तिविशेषस्य सद्भावान् ततो भेदः सुतरां घटते। 'पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति' 'वापी कापी स्फुरति गगने तत्परं सूक्ष्मपद्या' इत्यादिषु तु प्रस्तुतस्य कस्यचिद्धर्मिणः स्ववाचकेनानिर्दिष्ट-त्वादतिशयोक्तिरेव। एतेन गतजलसेतुबन्धवर्णनादिष्वसम्बन्धे

---

स इति। रसनाविपर्ययविधिः जिह्वापरिवर्तनविधिः। गजस्य हि जिह्वामूलाग्रयोः वैपरीत्यं लोकसिद्धम्। अनृतभाषणं च। चापलं सन्ततं [चाञ्च]ल्यं पिशुनवचनश्रवणकौतूहलं च। अत्रापि अपूर्वपदं उचितलिङ्ग-परिणामेन अनुषञ्जनीयम्। एवमग्रेऽपि। मदाविस्मृता स्वस्य परेषां च दिक् यया सा। पूर्वं निश्चितवानसीति पाठे इतिशब्दोऽध्याहार्यः। इत्थं निश्चितवानसीति पाठे तु न। 'अन्तः शून्यकरः' इति पठनीयम्। अन्तः शून्यकरः अभ्यन्तरे छिद्रायमानशुण्डादण्डः विचारणे रिक्त-हस्तश्च। ग्रहोऽभिनिवेशः। भ्रातरित्यामन्त्रणम्, हितोपदेष्टृत्वसूचनाय। अन्तश्शून्यकरो वारणस्सेव्यत इति यत् एष ग्रहः इति योजना।

तत्रेति। [अ]सेव्यत्व इत्यर्थः। क्रोडीकारेणेति। अभेदाध्यवसा-येनेत्यर्थः। अभेदातिशयोक्तिं निरस्य सम्बन्धातिशयोक्तिं निरस्यति एतेनेति।

विलम्बनीयम् । अस्याः भर्ता तु न दृश्यते । तदागमनं यावत् नास्माभिः प्रतीक्षितुं शक्यम् । इमं लेखमहं प्रमाणं करिष्यामि । भवती प्रतिभूरिति पत्रं विलिख्य दीयेत चेत् तत्पर्याप्तमित्यहं गृह्णामि । अनेन मे क्लेशो भविष्यति चेत् तन्मे अनुमतम् । तदेकं मया कर्तुं शक्यं साहाय्यम् । ततो वित्तं नागमिष्यतीति अस्माल्लेखान्निश्चितं ज्ञातम् । युष्माकं बन्धवो वा सुहृदो वा ये केचनास्मिन् पुरे सन्ति चेत् तानुपेत्य वित्तं परं सज्जीकृत्य आगता भवत । सद्योऽहं कार्यं निर्वर्तयिष्यामि । न मयाऽन्यः कोऽप्युपकारः कर्तुं शक्यः । नेतःपरं मे प्रतिवेलमिह आगच्छतो भवितुं शक्यम् । अद्य कति नाम कार्याणि विनाशयन्नस्मि । अद्यावधि भवद्भिर्मे देयं पञ्चाशतो रूप्याणामुपरि भवति । यन्मया वक्तुं शक्यं तदुक्तवानस्मि । इतः भवादिच्छानुसारं कुरुत ।" इति वदन्नेव बहिर्जगाम ।

इमा विल्लिअंस्-डूणस्य वाचः श्रुतवती कनकाम्बा किमपि वक्तुमपारयन्ती विमूढा तस्थौ । साम्बशिवेन पत्रं विलिख्य दातव्य मित्यस्य विषयस्य तावन्तं कालं प्राधान्यं कृत्वा भाषितवान् डूणः यत् तदानीं पणस्य प्राथम्यं कृत्वा भाषित्वा गतः तत्पश्यन्ती उपरि किं कर्तव्यमित्यजानती व्यामुग्धमतिः पादनाडीं यावत् श्रान्ता उपविष्टा बभूव । स्वेषां उपर्युपरि विपद आगच्छन्तीरेव सतीः चिन्तयित्वा अन्ते का गतिर्भविष्यतीति व्याकुला निमग्नमना अभवत् । पणेन सह विनष्टं साम्बाशिवं प्रत्येव भूयिष्ठां चिन्तामकरोत् । उद्योगः वित्तम् इति सर्वविनाशेऽपि पुत्रः स्नुषा च जीवन्तौ स्त इत्येतदेव महाभाग्यमिति मन्यमानस्य स्वस्य मनोरथे किमीश्वरो मृदं क्षिपेदिति बिभाय । क्रमेण साम्बशिवः स्वर्णाम्बा मेनका वराहस्वामीति चतुरः स्मृत्वा उत्सुका आकुला भूत्वा मूकीभूता अनुभित्ति अपरेव भित्तिरवातिष्ठत । तस्याः स्थितिं पश्यन् किट्टः सन्त्रस्तः 'पाट्टि, पाट्टि, देहस्ते किं क्रियते ?' इति पृच्छेत् । उन्मत्तेव सा चक्षुषी भ्रमयित्वा भ्रमयित्वा पश्यन्ती निरुत्तरा तिष्ठत् । कनकाम्बेव

किं पूर्वं मृता भवेदिति सम्भ्रमेण किट्टः । कनकाम्बां स्वर्णाम्बां च उभे शाययित्वा स्वयं किं कर्तव्यमिति बह्वाकुलः पर्यटेत । तस्मिन् पुरे साम्बशिवस्य परिचितान् सर्वानुपगम्य स्वेषामवस्थामावेद्य ऋणं प्रार्थ्य रिक्तहस्तो न्यवर्तत । पणो न लब्ध इति श्रुतवत्याः कनकाम्बाया मनः कालुष्यं सुमहदभूत् । स्वर्णाम्बा पुनः नेत्रे उन्मीलयन्ती निमीलयन्ती चावर्तत । श्वासश्च पदे पदे उल्बण आसीत् । मुखे च शोभना कळा प्रादुरभवत् । तस्या मुखस्य विपर्यासात् कनकाम्बा जाग्रती अवदधौ । तथाविधानि चिह्नानि नानुकूलानीति भिषजा उक्तं तस्याः स्मृतिमागच्छत् । स्वर्णाम्बाया जीवितं अचिरादुत्क्रान्तं भविष्यतीति मेने । अश्रु धारया अपतत् । सपदि सा उरसि प्रहारमकरोत् । अहो ! मन्द्भाग्यभूते त्वमपि नु गच्छसि ? गच्छ गच्छ । पापैरस्माभिः इयदेव दत्तपूर्वम् । सर्वं गतम् । इतः किमस्ति ? सर्वान् ग्रसित्वा किं नु मया परं जाम्बवतेव सहस्रकालं स्थातव्यम् ? अहमपि कूपे पतित्वा प्राणान् त्यजामि । मत्कुटुम्बमेव निर्मूलं भवतु' इति व्यलपत् । तदा स्वर्णाम्बा वाचमुद्घाट्य "पिपासा मे भवति" इत्यवदत् । स ध्वनिः कूपान्तरुद्भूत इवाभवत् । 'सैव किमभाषिष्ट उत अन्या काचित्' इति संशयोऽभूत् । कनकाम्बा विस्मयं विभ्रमं च भेजे । भिषजा हूणेनोक्तं तथ्यं संवृत्तमिति मेने । स्वर्णाम्बाया मरणकाल आगत इत्यचिन्तयत् । अथापि तीर्थमपि वा दत्वा तस्याः चरममभिलाषं पूरयेमेत्यमंस्त । कस्मिंश्चित् पात्रे जलमादाय तस्या मुखे निदधौ । स्वर्णाम्बा अतितर्षेण किञ्चिन्नीरं पपौ । अनन्तरक्षणे तस्या नेत्रे निमिमीलतुः निभृता शवतुल्या बभूव । तद् दृष्ट्वा कनकाम्बा 'हो' इत्याक्रुश्य रोदितुमुपक्रम्य 'अय्यो । अयि मे स्वर्ण, अन्त्यं जलपानं कृत्वा नु गच्छसि । इतः परं नयने किं नोन्मीलयिष्यसि ? हतः खलु स यमः त्वां नेतुं धृष्णोतिस्म । इत्युपर्युपरि विलापान् वितेने । तद्दर्शी किट्टश्च मुक-

कण्ठमाक्रन्दितुमारेभे । तत् असामान्यं क्रन्दितमाकर्ण्य बहिः स्थिता अपि जनाः मिलिताः स्वर्णाम्बां परितापकरं शयितां दृष्ट्वा व्यसनिनोऽतिष्ठन् ।

तस्मिन् समये लेखवहः कश्चित् तत्र प्रादुर्भूय 'का कनकाम्बा' इत्युच्चैरपृच्छत् । तदाकर्ण्य सर्वे सम्भ्रान्ताः तदभिमुखं पर्यावर्तन्त । कनकाम्बा किट्टश्च स्वं रोदनं झटिति उपरमय्य 'स किं कथयिष्यति' इति कुतुकेन तत्र मुखमपश्यताम् ।

'का कनकाम्बा' इति पुनः सकृत् तस्मिन् पृष्टवति सा 'अहमेव' इत्यवदत् ।

तत्रत्यानां जनानां सर्वेषां स एकः क्षणः एकं युगमभात् । तदा लेखवहः 'भवत्यै त्रीणि शतानि रूप्याणि धनादेशेन आगतानि । हस्ताक्षरं दातुं किं भवती जानाति ?' इत्यब्रवीत् ।

कनकाम्बा स्वकर्णयोरकृतविश्वासा विभ्रान्ता 'जानामि' इत्युवाच । सपदि सः तस्याः समीपे उपविश्य तस्याः द्वयोः साक्षिणोश्च हस्ताक्षराणि गृहीत्वा त्रीणि शतानि रूप्याणि गणयित्वा तस्यां समर्प्य उत्थाय बहिर्जगाम । स पणः केन प्रेषित इत्येतदपि अपृष्टवती कनकाम्बा पणं एकस्मिन् पार्श्वे क्षिप्त्वा पुनरपि विलपितुं प्राक्रमत । 'कुतोऽयं पणः द्वाभ्यां घटिकाभ्यां पूर्वं नागच्छत् । प्राणापगमानन्तरं किमर्थमागच्छत् ?' इत्याक्रन्दत् । परितापिनीं तामवस्थां पश्यन्तो जनाः सर्वे अतीव अनुकम्प्य विषण्णाः ततोऽपगन्तुमजातमनसः अतिष्ठन् । तथा अर्धनाडिका अगच्छत् । सङ्के स्थिता काचन स्त्री स्वर्णाम्बाधिशयितां खट्वां समया गत्वा तामभिसमीक्ष्य 'किमम्ब, श्वासः आगच्छति । यूयं तु परिदेवयथ ?' इत्यवोचत् । तदाकर्ण्य सर्वे उपसमेत्य अपश्यन् । कनकाम्बा च समैक्षत । श्वासः शनैरागच्छन्नासीत् । सद्यः कनकाम्बया आहूय, 'द्वे शते पञ्चाशतं च रूप्याणि गृहीत्वा भिषजे दत्वा द्रुतं तं आदाय आगच्छ' इत्यादिष्टः किट्टः तथैव पणमादाय बहिर्गत्वा कञ्चिदश्वशकटमारुह्य वायुवेगेन पतित्वा अन्तरधात् ।

तदा स्वर्णाम्बायाः श्वासः आगच्छन् सन्तिष्ठमानश्चासीत् । अपि नाम भिषक् अविलम्बेन आगच्छेदिति, अपि नाम तावत् प्राणास्तिष्ठेयुरिति च चिन्तयन्तः उत्सुकाः सर्वे जनाः कनकाम्बा च अग्नाविव कीटाः क्षुभ्यन्त आसन् । तथा एका नाडी अतीयाय । किट्टः आधावन् प्रत्यागच्छत् । कदा भिषजं द्रक्ष्याम इति पर्युत्सुकाः स्थिता जनाः सर्वे किं स आगच्छतीत्यपश्यन् । स नादृश्यत । किं स जातु पश्चादागच्छेदिति मत्वा सर्वे किट्टस्य मुखमपश्यन् । तन्मुखं अभ्यधिकं हर्षमदर्शयत् । अथापि तस्मिन् एकस्मिन् क्षणे कनकाम्बाया हृदयं 'पठीर्' इति स्फोटनार्हदशायामवर्तत । सा किट्टमभिवीक्ष्य 'क्व सः' इत्यपृच्छत् किट्टः सहर्षं 'मा भैषीः पाट्टि । अक्का जीविनवती' इत्यब्रवीत् तदाकर्णितवत्याः कनकाम्बाया न किमपि स्फुटं ज्ञानमासीत् । मूढतया स किमपि प्रलपतीति मेने । भिषक् नागत इति क्रोधः क्वचिदजृम्भत । सद्यः सा 'किमरे प्रलपसि ? क्व भिषक्' इति पप्रच्छ । किट्टः 'स नागच्छति । स किल अस्माकमत्र आगमनदिन एव गृहे शस्त्रचिकित्सां चकार । पणो नागच्छेदिति मत्वा किल तत्त्वमस्मासु अकथयित्वा अद्यावधि गोपयति स्म । अनुत्थानाय शरीररुजाया अननुभवाय च किल स्वर्णाम्बायाः किमपि मूर्छौषधमददात् । सोऽद्य अपरमौषधं प्रेषितवान् । अस्य दाने किल सर्वं साधु भवेत्' इति वदन् स्वहस्ते स्थितमौषधं स्वर्णाम्बाया मुखे आवर्जयति स्म । तदुक्तं विचित्रं वृत्तान्तं श्रुतवती कनकाम्बा अन्ये जनाश्च तथैव स्तब्धाः विस्मिताश्च हृषद्भूता अतिष्ठन् । तथा पञ्चनिमेषकालोऽगच्छत् । स्वर्णाम्बाया मुखे कश्चन विपर्यासोऽजनि । रक्तप्रसरः शोभा च पुनः प्रादुरभवताम् । सुप्तप्रबुद्धेव सा चक्षुषी स्पष्टमुन्मील्य 'किं स्थलमेतत्' इत्युवाच । अनन्तरक्षणे सा स्वदेहं तत इतः परिवर्त्य उत्थाय बृहदुपधाने साचीभूय चत्वार्यपि पार्श्वानि विस्मिता दृष्ट्वा कनकाम्बामवेक्ष्य "अत्रभवत्याः पुत्रः क्व" इत्यप्राक्षीत् ।

रसस्यामृतस्वरूपत्वञ्च कद्रूब्राह्मणे प्रसिद्धम् । 'आनीतां तु निजाक्षरैः' इत्यत्राभिप्रेतञ्च । ते च ऋतुग्रहाः अस्माकं दूरत एव अग्निष्टोमादि-संस्थाप्रवृत्तेरतीव विरलत्वात् । हेति खेदे । तत्तन्मन्त्राणामध्ययनमात्र-विश्रान्तेः अनुष्ठानपर्यन्ताप्रवृत्तेश्चेति ।

एवमाश्विनग्रहपरतयापि बोधः—

स चैवं विधीयते 'यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै' इति । ते चाश्विनग्रहा द्विजिह्वाः जिह्वाद्वयपातव्याः । अश्विन्याख्यदेवताद्वयमुद्दिश्य सकृदेव सोमरसग्रहणस्य सहैव पानस्य च विधानात् । अत एव तन्मन्त्र एवमाम्नायते—'या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम्' इति । अस्यार्थः— हे अश्विना अश्विनौ वां युवयोः या कशा कशातुल्या । जिह्वा, मधुमती मधुना पूर्णा, सूनृतावती, यथार्थवचनविशिष्टा, तया जिह्वया, यज्ञं मिमिक्षतं सेक्तुमिच्छतमिति । प्रत्येकविवक्षया कशाशब्द एकवचन-प्रयोगः । ते चाश्विनग्रहाः दूरतः परिहर्तव्याः भक्षणकाले दूरात् प्रदक्षिणी-कर्तव्याः । परिहरणं च प्रदक्षिणीकरणम्, परितो हरणमिति व्युत्पत्तेः । वेदे चैतदसकृत् प्रयुज्यते । 'अनुपरिहारꣳ सादयति' इत्यादौ । तथा च शिरोवेष्टनेन तदीयरसा भक्षयितव्या इत्यर्थः । तच्चैवं विधीयते । 'पुरस्तादैन्द्रवायवं भक्षयति तस्मात्पुरस्ताद्वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात्पुरस्ता-च्चक्षुषा पश्यति सर्वतः परिहारमाश्विनं तस्मात्सर्वतश्श्रोत्रेण शृणोति' इति । भाष्ये चैवं व्याख्यातम् । 'पुरस्तात् अग्रतः यथागृहीतमेवे-त्यर्थः । सर्वतः परिहारं शिरःप्रदक्षिणीकृत्येत्यर्थः' इति । तथा चाश्वि-नग्रहस्य शिरःप्रादक्षिण्येन कुटिलतया भक्षणीयत्वात् जिह्मवृत्तित्वम् । वृत्तिराहारः कुटिलाहार इत्यर्थः । जगत्प्राणान् निगिरन्तः स्वान्त कुर्वन्तः । स्वान्तःकरणं च संहरणरूपं धारणरूपञ्च । तच्चैवमाम्नायते । "प्राणा वा एते यद्द्विदेवत्याः पशव इडा यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत पशुभिः

प्राणानन्तर्दधीत प्रमायुकः स्यात् द्विदेवत्यान् भक्षयित्वेडामुपह्वयते प्राणानेवात्मन् धित्वा पशूनुपह्वयते” इति । सर्वत्र सोमरसभक्षणात् पूर्वमिडोपाह्वानं विहितम् । द्विदेवत्यस्थले तु नैवं क्रमः । द्विदेवत्यानां प्राणरूपत्वात् । इडायाश्च पशुरूपत्वात् । द्विदेवत्यभक्षणात् पूर्वमिडोपाह्वाने तु पशुव्यवधानेन यजमानस्य प्राणा अन्तर्हितास्स्युः । अतो यजमानो म्रियेत । पश्चादिडोपाह्वाने च नायं दोषः । किं तु प्राणानन्तर्निधाय स्वात्मनि संस्थाप्य पशूनुपह्वयत इति । उद्धिरन्त इत्यादेः पूर्ववत् सोमरसोद्गार एवार्थ इति ।

एवमाघाराख्यहोमविशेषपरतयाप्यर्थः—

तत्र चैवं विधीयते ।‘ऋजुमाघारयत्यृजुरिव हि प्राणस्सन्ततमाघारयति प्राणानामन्नाद्यस्य सन्तत्या अथो रक्षसामपहत्यै यं कामयेत प्रमायुकस्स्यादिति जिह्मं तस्याघारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्रमीयते’ इति । तत्र चार्जवेन सान्तत्येन च आघारणं प्राणादिसन्तत्यै भवति । यं यजमानमयं मृतस्स्यादिति अध्वर्युः कामयेत स जिह्मं कुटिलं तस्याघारयेत् । तथा सति यजमानप्राणानां वक्रीकरणात् सद्य एव यजमानो मृतो भवतीत्यर्थः । अतश्च जिह्मवृत्तयः जिह्माकारकारिण ऋत्विजः यजमानेन दूरतः परिहर्तव्या इत्यन्वयः । सा च जिह्मवृत्तिरभिचाररूपत्वादग्नेर्जिह्वाद्वय एव कार्या । द्वे च ते जिह्वे च द्विजिह्वे । तयोर्जिह्मवृत्तय इति विग्रहः । तथा चोक्तं दक्षस्मृतौ ‘हिरण्या कनका रक्ता कृष्णा चैवाथ सुप्रभा । अतिरक्ता बहुरूपा सप्त जिह्वाः प्रकीर्तिताः ॥ हिरण्या पश्चिमे जिह्वा कनका मध्यमे स्थिता । रक्ता चैवोत्तरे जिह्वा कृष्णा दक्षिणदिक्स्थिता ॥ सुप्रभा चैव पूर्वायां अतिरक्ताऽग्निदिक्स्थिता । बहुरूपा च शार्वायां जिह्वास्थानं प्रकीर्तितम् ॥ विवाहे पश्चिमा जिह्वा जातकर्मणि मध्यमा । उत्तरा चोपनयने पितृकार्ये तु दक्षिणा ॥ सर्वकर्मसु पूर्वायामभिचारेऽग्निदिक्स्थिता । शान्तिकर्मणि शार्वायां स्थानकर्म समीरितम् ॥’ इति । स्मृतिरत्ने तु—‘विवाहे वारुणी जिह्वा मध्यमा यज्ञकर्मसु । उत्तरा चोपनयने दक्षिणा पितृकर्मसु ॥ पूर्वदिक् सर्वकामेषु आग्नेयी शान्तिकर्मसु ।

ऐशानी चोग्रकार्येषु एतद्धोमस्य लक्षणम् ॥ अज्ञानात् सप्तजिह्वासु होमं यः कुरुते द्विजः। होमो निष्फलतां याति होता च नरकं व्रजेत् ॥' इति। तदेवं स्मृतिरत्नाकरस्मृतिमुक्ताफलोदाहृतस्मृतिद्वयवचनावगतोग्रकार्याभिकाराग्नेय्यैशानीरूपजिह्वाद्वये ये जिह्मचारकर्तार ऋत्विजस्ते यजमानेन सुदूरपरिहार्याः। जिह्वान्तरेषु जिह्मवृत्तेर्निष्फलत्वोक्त्या अप्रयोजकत्वात्। ते च जगतां प्राणान् निगिरन्तः यं यमुद्दिश्यैवंविधजिह्मवृत्तिः क्रियते तत्तत्प्राणान् संहरन्तः मुखैः स्ववक्त्रैः विषं विषमन्त्रं उद्गिरन्तः उच्चारयन्तश्च। विषमन्त्रोच्चारणमाम्नातम्। 'यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति ब्रूयादाहुतिमेवैनं प्रेप्सन् हन्ति यदि दूरे स्यादातमितोस्तिष्ठेत् प्राणमेवास्यानुगत्य हन्ति यद्यभिचरेदमुष्य त्वा प्राणे सादयामीति सादयेदसन्नो वै प्राणः प्राणमेवास्य सादयति' इति। तदेवमुक्तमन्त्रैः होमसादनयोः कृतयोः होमात् पूर्वं पश्चाच्च प्राणवियोगकरणावगमात् ईदृशमन्त्रोच्चारयितारः पूर्वोक्तजिह्मवृत्तयः जगत्प्राणनिगरणात् दूरतः परिहर्तव्या इति पर्यवसितार्थः।

एवं सोमरसाहर्तृगरुडपरोऽपि—

जगत्प्राणान् अमृतस्वरूपत्वेन जगतः प्राणप्रदान् अविषं सोमरसामृतं, 'यं जीवमश्नवामहै न स रिष्याति पूरुष' इति वचनेन सोमरसपायिनां मरणाभावश्रवणात् मुखैः निगिरन्त इत्यन्वयः। तच्च श्रुतं गरुडरूपाया गायत्रीदेवतायास्सोमाहरणसमये 'पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं यन्मुखेन समगृह्णात्तदधयत्' इति। तत्र पद्भ्यां सोमरसभागद्वयं मुखेन तद्भागमेकञ्च गृहीत्वा निर्याणसमये मुखस्थितो यो भागस्तमभक्षयदित्यर्थः। उद्गिरन्तश्च गूढतया स्थितं सोमरसं प्रकाशयन्तश्च। साधारणगरुडपरत्वे तु जगति स्थितानां भिल्लपल्लीजनानां प्राणान् भक्षयन्तः। विषं विषवदन्तरुष्णायमानं विप्रमेकं उद्गिरन्तः वमन्तश्चेत्यर्थो बोध्यः। द्विजिह्वैः सर्पैः। अजिह्मा अनलसा संपूर्णेति यावत्। 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः। वृत्तिराहारो

येषां ते । 'सुपर्णः पन्नगाशन' इत्युक्तत्वात् । ते दूरतः दूराद्दृष्ट्वा । पूर्ववत् पञ्चमी । परिहर्तव्याः प्रदक्षिणीकर्तव्याः । गरुडदर्शने प्रदक्षिणीकरणविधानादिति भावः ।

एवमाचार्यादिपरतयापि ।

स्मर्यते हि "प्रासादं देवदेवीयमाचार्यं पाञ्चरात्रिकम् । अश्वत्थं च वटं धेनुं सत्समृद्धिं गुरोर्गृहम् । दूरात् प्रदक्षिणीकुर्यात् निकटे प्रतिमां हरेः ॥" इति । अतस्ते दूरतः प्रदक्षिणीकर्तव्या इत्यर्थः । ते च, द्विजिह्वाजिह्मवृत्तय इत्येकं पदम् । द्वयोर्जिह्वयोस्समाहार इति द्विजिह्वं तेन अजिह्मवृत्तयः अन्तर्जिह्वाबहिर्जिह्वारूपजिह्वाद्वयेप्यकपटवृत्तयः अन्तर्जिह्वापदेनान्तःकरणमेव विवक्षितम् । यद्वा द्विजिह्वेषु पिशुनेष्वप्यकपटवृत्तयः । उक्तं हि– शुनि चैव श्वपाके च पण्डितास्समदर्शिन इति । ते च जगतः प्राणभूतं परब्रह्म निगिरन्तः स्वान्तःकुर्वन्तः अनुभवन्तो वा । 'सोऽश्नुते' इत्युक्तेः । अविषं यथा तथा अन्तर्विषरहितं यथा तथा, मुखैः स्ववक्त्रैः उद्गिरन्तः 'सिद्धे महति पाण्डित्ये सनिर्वेदश्चतुर्विधे । प्रणवद्विचतुष्काद्यैः प्रशान्तैरेव मोदते ॥' इत्युक्तक्रमेण सदा प्रणवाष्टाक्षरादिजपशीलाः । परवञ्चनार्थतामन्तरेण स्वात्मतृप्त्येकप्रयोजनता अविषशब्दाविवक्षिता । ते प्रदक्षिणीकार्या इत्यन्वयः । यद्वा विषं व्यापकमन्त्रं सर्वव्यापकं भगवन्तं वा उद्गिरन्त इत्यर्थः । विष्लृ व्याप्तावित्यस्मात् कर्तरि क्विप् । 'विड् व्यापके च विष्ठायां' इति च विश्वमेदिन्यौ ।

एवमर्धचन्द्रबाणपरोऽपि—

ते हि जगत्प्राणान् संहरन्तः मुखेषु विषदिग्धत्वात् विषमुद्गिरन्तश्च अग्रद्वययुक्तत्वात् द्विजिह्वाः । प्राणनिगिरणसाधनत्वादग्रभागस्य जिह्वात्वम् । अर्धचन्द्रवत् वक्राकृतित्वात् जिह्मवृत्तयश्च । ते दूरतः तादृशनाराचप्रक्षेपस्थलादतिदूरत एव परिहर्तव्या इति ॥ १० ॥

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदावमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २२] कलि ५०४९ सर्वधारि { वृश्चिक } साधारण सं २
{ धनुः } शात्रानुबन्ध सं २
आहत्य „ ४

## स्वस्ति ॥

स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥

प्रजाः जनाः । इयं जातिः इदं कर्म इदं लिङ्गं इदं वयः इति न कश्चिदपि विशेषश्चिन्तनीयः । अविशेषेण सर्वे जना ग्राह्याः । तेभ्यः स्वस्ति सुस्थितिः क्षेमः अस्त्विति प्रथमा प्रार्थना । राजानः पालकाः । प्रजाः पाल्याः । मनुष्याणां मिथो बहुविधः सम्बन्धः । तत्रायमेकः राजा प्रजा इति । पाल्यपालकभावरूपोऽयम् । तत्र पाल्यानां प्राधान्यम् । पाल्यपालनाय हि पालकाः । तस्मात् प्रथमप्रार्थनीयं प्रजानां स्वस्तिमत्त्वम् । अथ तदनुगुणा प्रार्थना पालकविषये क्रियते परिपालयन्तां न्याय्येन मार्गेणेति । पालनं नाम इदम्, तच्चेदृशमिति विवेकस्तावद्दुर्लभः । विवेकिनोऽपि कामक्रोधादिभिः अन्याय्यमाचरन्ति । अधिकारश्च महान् दर्पहेतुः बलात् अपथे पदं कारयति । अतो न्याय्येन मार्गेण महीपरिपालनमनन्तरं प्रार्थनीयं भवति ।

व्याधितस्करशत्रुभ्यो भयं विना स्थितिः प्रजानां सुस्थितिः । एतत्सम्पत्त्यनुगुणं कर्म राज्ञां पालनम् । तदुभयं प्रार्थितम् । अत्रैव जीवनप्रार्थनमप्यन्तर्भूतम् । अजीवतां हि स्थितिरेव नास्ति । का तत्र सुस्थितिर्नाम, या प्रार्थ्येत । तत्र जीवने प्रधानहेतुर्वृष्टिः । सा यज्ञसम्भवा । यज्ञस्य द्वे रूपे हव्यं होतेति । अस्य द्वयस्य क्षेमप्रार्थनं परतः क्रियते— गोब्राह्मणेभ्य इति ।

एवं तत्तदधिकारानुगुणतया विभज्योपदिष्टे कर्मणि सम्यङ् निर्वृत्ते प्रजानां योगक्षेमकॢप्तिर्भवति । तासु सुस्थितासु सुखितासु राजानः सुखयन्ति ।

यष्टारो ब्राह्मणाश्च । दोग्ध्र्यो गावश्च । अन्ये च सर्वे प्राणिनः । परमफल-भूता इयं स्थितिः अन्ते प्रार्थ्यते लोकाः समस्ता इति । इमां प्रार्थनां वयं सम्प्रति पुनः पुनः करवाम ।

---

# गुरोः त्वङ्कारः स्वस्तवश्च वधः ॥

श्रीमहाभारते कर्णपर्वणि चतुर्भिरध्यायैः(७६–७९)उक्तमिह सङ्गृह्यते ।

कर्णशराभितप्तः पार्थो राजा युधिष्ठिरः फल्गुनस्य मुखात् सूर्यसूनुं कर्णं कुशलिनं निशम्य क्रुद्धो धनञ्जयमेवमुवाच– हे फल्गुन, त्वं कर्णं कौरवसेनाया अर्धं च हनिष्यामीति मयि प्रतिज्ञाय मां मद्रान् युद्धार्थं मया समानीतान् सृञ्जयकेकयादींश्च शत्रुमध्यं प्रवेश्य प्रतिज्ञामनिवर्त्यास्माकं जीवितसंशयं शत्रुसकाशादतिमात्रपराभवं चाकरोः । तव जननात्सप्तमेऽह्नि कुन्तीं प्रति तवानन्ददायी महात्मा पुत्रः स्वेषां जयाय द्विषतां वधाय च जातः । अस्मात्परो धनुर्धरो न भविता । एतस्य विजेता कश्चित् न भूतो न भविष्यतीत्यादिकमाकाशवाणी शतशृङ्गमूर्ध्नि तपस्विषु शृण्वत्सु सत्स्ववदत् । एवंविधस्त्वं नाद्य तथाभूतः । देवा नूनमनृतं वदन्ति । तथा कथयतामृषीणां वचनमप्याकर्ण्य सुयोधनं प्रति न प्रणतोऽस्मि । महाभये रणे भीमो रुष्टस्सूतपुत्रस्य वशं यातं मां विमोच्य तीक्ष्णेन शरेण कर्णं बिभेद । स गदाहस्तो निजजीवनं तृणाय मत्वा समेतैः कुरुभिरन्यैश्च सहायुध्यत । यदि महाबलावभिमन्युघटोत्कचौ जीवेतां न मे कर्णादीदृशः परिभवस्स्यात् । त्वष्ट्रा कृतमकूजिताक्षं शुभं कपिध्वजं रथं समाश्रितो जातरूपत्सरुं खड्गं तालमात्रं गाण्डीवं धनुश्च बिभ्रत् केशवेनोह्यमानश्च सन् कथं कर्णादपैतुं व्यचिन्तयः । यदि त्वं केशवाय गाण्डीवं प्रदाय तस्य यन्ता भवेः तदा स उग्रं कर्णं गृहीतवज्र इन्द्रो वृत्रमिव मारयेदिति । युधिष्ठिरेणैवं कथितोऽर्जुनः सङ्क्रुद्धः पुरुषर्षभन्तञ्जिघांसुरसिञ्जग्राह । चित्तज्ञः केशवस्तस्य क्रोधं समाज्ञायेत्थमपृच्छत् – हे अर्जुन, त्वं राजा युधिष्ठिरो द्रष्टव्य इत्युपागतोऽसि । स भवता कुशली दृष्टः । हर्षकाले संप्राप्ते कस्मात्त्वां मन्युराविशत् । इह यस्ते वध्यो भवेत् न तं पश्यामि । कस्मात्त्वमिमं खड्गं गृह्णासीति । एवमभिहितोऽर्जुनः कटाक्षेण युधिष्ठिरं प्रेक्षमाणः क्रुद्धस्सर्प इव श्वसन् सन् केशवं प्रतीत्थमभ्यधत्त— अन्यस्मै देहि गाण्डीवमिति मां यः प्रचोदयेत् तस्य शिरोऽहं भिन्द्यामिति ममोपांशुव्रतम् । यन्मां राजा केशवाय धनुर्दे-

हीत्यवदत् तस्मात्तं हत्वा प्रतिज्ञां पालयिष्यामि । एतदर्थं मया खड्गोऽगृह्यत । अस्मिन् कार्ये प्राप्ते सति किं कर्तव्यं भवान् मन्यते । सर्वज्ञो भवान् यथा मां वक्ष्यते तथाहं प्रकरिष्यामीति । तदनु गोविन्दः पार्थं धिक्त्वामित्युक्त्वा हे पार्थ, अकालेऽनया संरम्भक्रियया त्वया वृद्धा न सेविता इतीदानीं जानामि । धर्मलोपाद्भीतोऽपण्डितश्च त्वमधुना पाण्डवश्रेष्ठे युधिष्ठिरे यथा कर्तुं व्यवस्यसि तथा कर्तुं धर्मविभागज्ञा न व्यवस्येयुः किल । त्वया बालेनैव सता, एतद्व्रतं पुराकृतम् । मौर्ख्यादिवाधर्मसंयुक्तं कार्यमाचरितुं व्यवस्यसि । अज्ञानात् त्वं सत्यं रक्षसि । सत्यं धर्म इति बहवो जना वदन्ति । तदभ्यनुज्ञातम् । तत्तु न सर्वत्र शिष्यते । 'विवाहकाले ऋतुसंप्रयोगे प्राणात्यये सर्वधनापहारे । विप्रस्य चार्थेऽप्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि ॥' इति महान्तो वदन्ति । अनृतं वाच्यं भवेत्, हिंसा न कदाचिदपि कार्या । प्राणिनां वधात् धर्मो वृधा मम मतः । अयुध्यमानस्य गुरोरशस्त्रस्य पराङ्मुखस्य द्रवतश्शरणं गच्छतः कृताञ्जलेः प्रमत्तस्य च पुरुषस्य वधो बुधैर्न पूज्यते । तथाविधं धर्मकोविदं ज्येष्ठभ्रातरं प्राकृतोऽन्यः पुमानिव कथं हन्तुकामोऽभिधावसि । इत्यादि सनिदर्शनं पार्थङ्गदित्वा धर्माधर्मविवेकमुत्पाद्य तस्यावध्यो युधिष्ठिर इति बुद्धिमुदपादयत् ।

अथार्जुनो हितं मनोहारि च भगवद्वाक्यं बहुधाऽभिनन्द्यैवमब्रवीत्– हे दाशार्ह, मम व्रतं जानासि । यद्युधिष्ठिरस्तव समक्षं धनुर्देहीति मामवदत्तस्मात्तं हत्वा कुशली चेत् अत्यल्पमात्रं कालं अहं जीवलोके स्थाता । यथा मम प्रतिज्ञा सत्या भवेत् यथा च युधिष्ठिरो जीवेत्तथा मम बुद्धिं दातुं त्वमर्होऽसीति । एवमुदितश्श्रीकृष्णः पार्थमित्थमभाषत– हे पार्थ, राजा कर्णशरैर्विक्षतश्श्रान्तश्च । तस्मात् त्वां परुषाणि वाक्यान्यवोचत् । युद्धे कर्णे हते कुरवो निर्जितास्स्युरिति स मन्यते । मानवस्सम्मानवान् जीवलोके जीवति । अवमानवान्मृत इत्युच्यते । युष्माभिर्भ्रातृभिरन्यैश्च युधिष्ठिरस्सुबहुमानितः । अत्रभवन्तं तं त्वमित्युक्त्वा तस्यावमानं कलय । त्वमित्युक्तो गुरुर्निहतो भवति । अतः युधिष्ठिरे एवमाचर । ततोऽस्य पादावभिवाद्य पश्चात् श्रेयःप्रदं सान्त्वयुक्तं हितं च वचनं ब्रयाः । धर्ममार्गानुसारी प्राज्ञो राजा भ्राता युधिष्ठिरस्तव विषये कोपं न जात्वपि कुर्यात् । पापावहादनृताद्भ्रातृवधाच्च मुक्तो हृष्टः पश्चात्कर्णं जहीति । जनार्दनेनैवमाख्यातोऽर्जुनः सुहृद्वचस्तत् प्रशस्य धर्मराजं प्रत्यनुक्तपूर्वाणि परुषाणि वचनानि प्रसह्येत्थमभणत्– राजन्, मा त्वमद्य पापं व्याहरस्व । त्वं रणाङ्गणात् क्रोशमात्रे व्यपोह्य तिष्ठसि । शल्येश्चतुरङ्गसैन्यं

शरैर्गदयाऽसिना कराभ्यां पादाभ्यां च विध्वंसयन् भीमसेनस्तु मां गर्हितु मर्हति। तथा सर्वलोकप्रवीरान्युद्धे विनाशयन्तो नकुलसहदेवादयो मामुपालब्धुमर्हन्ति। न त्वमुपालब्धुमर्हसि। द्यूते प्रमत्तेन मूढेन वाग्बलेन निष्ठुरेण कृतकार्ये निर्लज्जेन द्रौपदीतल्पसंस्थेन त्वयाऽस्माभिरिदं वैरं राज्यविनाशवनवासदुःखाभिमन्युनाशादिजनितव्यसनं च प्राप्तम्। त्वदर्थे महारथा भीष्मद्रोणादयो निपातिताः। अनार्यजुष्टं पापं स्वयं कृत्वाऽस्माभिर्व्यसनं तितीर्षसि। त्वमस्मान्क्रूरैर्वाक्प्रतोदैर्मा तुदः। अल्पबुद्धिर्मां कोपयसीति। इत्थमभिधाय विनिश्वस्य कोशादसिमुदहरत्। कृष्णः पार्थमुद्दिश्य कुतस्त्वमसिं विकोशमाकाशनिभङ्करोषि। स प्रयुत्तरं प्रब्रूहि। तवार्थसिद्धये पुनर्वचः प्रवक्ष्यामीत्यपृच्छत्। पुरुषोत्तमेनैवमनुयुक्तस्सुदुःखितोऽर्जुनो गुरौ प्रसह्य परुषभाषणान्मामहं हनिष्यामीत्यभाषत। धर्मभृतां वरिष्ठो जनार्दनस्तद्वचो निशम्येदमाचष्ट। पार्थ, स्वगुणानद्य विशेषेण कथय। ततो हतस्त्वं भविष्यसीति मे निश्चय इति। अथ पार्थस्तद्वचनमाकर्ण्य धनुः प्रगृह्य धर्मभृतां वरिष्ठं युधिष्ठिरं प्रति राजन्, दुर्वचः शृण्वित्याख्याय तदेवं प्राह स्म। नरदेव, पिनाकिनं देवमृते मादृशोऽन्यो धनुर्धरो न विद्यते। मया सदिगीश्वरास्सर्वा दिशो विजित्य भवतो वशे कृताः। ममौजसा राजसूयः पर्याप्तदक्षिणोऽभवत्। भवतो दिव्या सभा चासीत्। मया सर्वास्वपि दिक्षु वर्तमाना वीरा अहन्यन्त निरास्यन्त च। सर्वस्य लोकस्यार्धं मया कथाशेषं व्यधीयत। अनस्त्रज्ञान्नैवास्त्रैर्निहन्मि। तस्माल्लोकान् भस्मैव न करोमीति।

एवमुक्त्वा राज्ञः पादावुपसङ्गृह्य तं प्रसाद्य, भीमं समराद्विमोचयितुं सर्वात्मना सूतपुत्रं हन्तुं च यामि। भवत्प्रियार्थं मम जीवितम्। सत्यं ब्रवीमि। तदिदं विद्धीति व्याहरत्। तदनु धर्मराजोऽर्जुनस्य परुषाणि वाक्यानि निशम्य दुःखपरीतचेताः योग्यो भीमो राजा भवतु। युष्मद्व्यसनकारी क्लीबश्चाहं न राज्यार्हः। वनं गच्छामीति व्याहृत्य शयनं विहाय वनाय निर्गन्तुमियेष। तं वासुदेवः प्रणत एवं व्याहरत्—राजन्, प्रतिज्ञां सत्यां परिरक्षता पार्थेन मच्छन्दात्त्वायमवमानः कृतः। उभावप्यावां त्वां शरणं प्रपन्नौ। क्षमस्व, अद्य सूतपुत्रं हतं विद्धि। इदं सत्यमिति। अनन्तरं युधिष्ठिरः हे कृष्ण, यथाऽऽत्थ त्वमेतदेवमेव। एषोऽतिक्रमो ममास्तु। भवन्तं नावम्. …द्य घोराद्व्यसनसागरादज्ञानमोहिताबुभावावां समुत्तीर्णावित्याद्यवदत्। स्वोत्कर्षपरनिकर्षानुसन्धानानि एषु निपतेयुरित्युपरिविधानपूर्वकं कृतानि गर्तानीति, अवदनीयेष्वात्मोत्कर्षः, करणत्रयेणापि वर्जनीयेषु ब्रह्मविदपचारश्च प्रधानभूत इति चाचार्या आचक्षत।

# नाटककथासारः ॥

(T. Venkatacharya B. O. L.)

(विद्धसालभञ्जिका)

I

विद्याधरमल्लो नाम केरलाधिपतिर्बभूव । तस्य चारायणाख्यो नर्मसचिवः भागुरायणनामा महामात्यश्च अवर्तेताम् । एकदा प्रातश्शयनादुत्थितो नरपतिः अनन्येन मनसा काञ्चित् तरुणीं पद्येन वर्णयाञ्चक्रे । तदा सन्निहितश्चारायणः 'अहो श्लाघनीयः प्राभातिकपठनविधिः' इति राजानं उपजहास । वास्तविकं वृत्तं आख्यातुं तं प्रार्थयामास । 'प्रत्यूषे स्वप्ने काचित् अतिमनोहरा तरुणी दृष्टा । सा मां परिणयाय निर्बबन्ध । प्रत्यग्रमौक्तिकगुम्फितं हारं स्वकुचतटात् उन्मुच्य मत्कण्ठदेशे न्यस्तवती च । तदनु तां दुकूलाञ्चले गृहीत्वा 'का त्वं ? कस्मात् इहासि' इति पृच्छति मयि असौ वासगृहात् क्वापि अगमत् । तस्या एव इदं सर्वं अनुस्मरणम्' इति विद्याधरमल्लः प्रत्यवादीत् । स्वप्नदृष्टकन्यानुबन्धिना राज्ञः संरम्भेण एकपर्यङ्कगता देव्यपि शयनमपास्य निर्ययौ । तत्परतन्त्रचेतसा प्रभुणा देवी अनुनेतुं न पारिता ।

राज्ञः कण्ठे तदर्पितः हार आसीत् । सा कन्या परं नालक्ष्यत । तेन किं तत् साक्षात् वृत्तं उत केवलं स्वप्न एव इति विकल्पः तस्य मनसि पदं निदधे । निशायां परिहितेन स्वीयहारेण चित्तस्य अन्यासङ्गवशात् राजा भ्रान्तिं आपादितः इति सखा व्याजहार । ततो देवीप्रसादनार्थं चारायणेन चोदितो नरपतिः तेन सह निर्जगाम । सामन्तसंकुलं आस्थानीमण्डपद्वारं उज्झित्वा उद्यानवनं प्रविष्टः तत्र मदनोद्दीपकं वसन्तसमयसंरम्भं उदैक्षत । महामन्त्रिकारितं स्फटिकशिलामन्दिरं पर्यवेक्षितुं चारायणं अनुसरन् कमपि मधुरं शब्दं अशृणोत् । पुरतः प्रासादे काचित् दोलया क्रीडन्ती चरन्ती च आसीत् । तदीयरशनामणीनां शिञ्जितमेव पूर्वं आकर्णितम् । तस्याः मुखमात्रं राज्ञा किञ्चिदिव आलोक्यत । सा तु कृत्स्ना न लक्षिता । स्वप्नदृष्टजनमुखपद्मसंवादिनी लावण्यलक्ष्मीः इति चारायणाय स न्यवेदयत् । एवं तामेव अनुध्यायन् स्फाटिकभवनं प्राविशत् । तत्र भवनभित्तिषु आलिखितानि चित्राणि अवालोकत । क्वचित् देव्या सह पाशकेन क्रीडन् भूपतिः चित्रे अदृश्यत ।

एकत्र ताम्बूलकरङ्कवाहिनी नागवल्ली, पार्श्वे चामरग्राहिणी प्रभञ्जनिका, रत्नकरण्डको नाम वामनकः, टप्परकर्णो नाम मर्कटश्च आलिखिता आसन् ।

राज्याः मातुलः चन्द्रवर्मा नाम राजा लाटेषु अवात्सीत् । तस्य एका पुत्री । पुत्राभावात् तां औरसपुत्रत्वेन स प्रथयामास । इदं तत्त्वं विद्याधरमल्लामात्यस्य भागुरायणस्य परं चारमुखेन विदितं आसीत् । अन्येषां न ज्ञातम् । सामन्तेषु यः करान् दातुं यावत् न शक्नोति तावत् तत्पुत्रः प्रधानराजसकाशे स्थाप्यते इति समयः पूर्वं अवर्तिष्ट । अयमेव पुत्रावकल्प इति व्यपदिश्यते । लाटपतिकृत्यं तत्त्वतो विदन् भागुरायणः पुत्र इति प्रथितां तां पुत्रावकल्पच्छलेन राज्ञः सन्दर्शनार्थं केरलीयान् आनाययामास । वस्तुतत्त्वं अजानाना देवी केवलं कौतूहलेन मातुलपुत्रस्य वारं वारं महिलावेषं अकारयत । अविदितपरमार्थैः चित्रकारैः कृतमहिलावेषः चन्द्रवर्मपुत्रोऽपि स्त्रीरूपेण देवीपरिवारमध्ये आलिखितः । प्रकृत्या इयं स्त्री । पित्रा पुत्रवेषं दापिता । राज्या कौतूहलेन पुनः स्त्रीवेषं प्रापिता । अतः प्रकृतिभूतस्त्रीरूपेण दृश्यमानं तच्चित्रं रमणीयं सत् राज्ञो मनो जहार । इयमेव पूर्वं स्वप्ने दृष्टा । वास्तवं अनवगच्छन् चारायणः स्थितया प्रथया भ्रान्तः सन् चित्रितां तां पुरुषमेव मेने । प्रभोः विस्मयसम्पादनं आकलय्य स्वविदितं 'इयं वस्तुतः पुरुषः' इत्यंशं न प्रकटयामास । राज्ञः परं 'सा स्त्री' इत्येव मतिरभूत् । न तावन्मात्रं किन्तु अतिरमणीयस्त्रीसन्निवेशभाजः तस्य चित्रस्य तयैव स्त्रिया कर्त्र्या भाव्यं इत्यपि सः निरणैषीत् । यादृशः चित्रकरः तादृशी चित्रकर्मरूपरेखा, यादृशः कविः तादृशी काव्यबन्धच्छाया इति महाजनसमाजेषु श्रूयते इति वदन् नर्मसचिवः नरपतेर्निर्णयं अभ्यनन्दत् । तस्य कन्यारत्नस्य चित्रं अन्यत्रापि अदृश्यत । क्वचित् स्तम्भे सालभञ्जिकारूपेणापि सा प्रतिबिम्बिता । पुनरपरत्र चित्रगता अवालोकि । एवं चतुर्षु स्थलेषु सा तस्थौ ।

स्वप्नलब्धं हारं "पुनरयं योग्यस्थानविन्यासं आसादयतु" इत्यभिधाय सालभञ्जिकारूपेण स्थितायाः तस्याः कण्ठे राजा समार्पयत् । उल्लसितभ्रूलतेन उदङ्गुलिकरकमलेन संस्थानेन दृश्यमानां तां काव्यकर्मणि निषक्तमनस्कां उत्प्रैक्षत । तदुत्प्रेक्षानुसारेण तस्याः पुरतः 'विधत्ते

सोऽलखं कतरदिह नाङ्गं तरुणिमा' इति काचित् अक्षरावल्यपि अदृश्यत । व्यापारं अन्तरेण गृहीतापि शुक्तिः मौक्तिकानि न मुञ्चति इति सम्भाव्य श्रवणे कृतार्थयितुं तया सह भाषणीयं इति मनसि निधाय तं देशं उपससार । अत्रान्तरे देवी तत्र सन्निहिता । माध्यन्दिनसन्ध्याकालोऽपि समुपस्थितः । तेन सन्ध्यानिर्वर्तनार्थं अपूर्णेन मनसा ततो निरगच्छत् ।

II

चण्डमहासेन इति सामन्तराजः निजराज्यभ्रष्टः केरलदेशं अनुप्रापत् । तस्य कुवलयमाला नाम पुत्री । सा कदाचित् स्नात्वा नर्मदातः उत्तरन्ती केरलपतेः दृष्टिगोचरं गता । ततःप्रभृति राजा तदासक्तमनाः समजनि । राज्ञी तु स्वमातुलपुत्रीं प्रथानुसारेण पुत्र इत्येव विदती तस्य कुवलयमालया सह विवाहं सम्पादयितुं इयेष । नरपतिः इदं न विवेद । एकदा मदनपरायत्तचित्तवृत्तिः असौ विनोदार्थं तुषारपुञ्जाख्यकदलीगृहं प्रति सुहृदा सह प्रतस्थे । भवनमार्गं आदेशयितुं उक्तः चारायणः वाचंयमः सन् संज्ञया तं निर्दिदेश । "किन्निमित्तं इदं मौनं" इति महीपतिः सोपहासं अन्वयुङ्क्त । तस्य "ओलाख्यदेशादागतस्य मृगाङ्कवर्मणः पुरोहितः शशशृङ्गनामा प्रथते । तस्य पत्नी मृगतृष्णिका । तयोः दुहिता नाम्ना अम्बरमाला । तया सह मम परिणयं राज्ञी कारयिष्यति । तदर्थं दीक्षितेन सता मया मौनं आस्थितं' इति विशेषविभूषितः स प्रत्यब्रवीत् । देवी अलीकविवाहेन इमं प्रतारयिष्यति इति नरपतिरतर्कयत् । परं तु परिहासवृत्तान्तं अनुभवितुकामः स्वयं ऊहितं अंशं न प्रकटं अवादीत् ।

एवं स्थितयोः तयोः चेटी काचित् उपेत्य "चारायणस्य द्वितीयविवाहार्थं सन्नाहः कृतः, तत्र राज्ञा सन्निधातव्यं" इति देव्याः प्रार्थनां व्यजिज्ञपत् । अतः राजा तत्सखश्च कदलीगृहं अभि प्रस्थितौ । तत्र सपरिजना राज्ञी प्रतिपालयन्ती अवर्तत । कृतवधूटीवेषं नटं कञ्चित् कन्यास्थाने स्थापयामास । मेखलानाम्नीं तत्कन्यायाः मातरमकल्पयत् । सा मेखला आगतं चारायणं वध्वाः पाणिं ग्रहीतुं प्रार्थयत । सोपि "ध्रुवं सप्तर्षिमण्डलं च प्रेक्षस्व" इति कन्यां अवदत् । वधूवेषे स्थितो नटः तदुक्तरीत्या विलोक्य "दृष्टध्रुवः दृष्टसप्तर्षिमण्डलश्च संवृत्तोस्मि" इति प्रत्यवदत् । "दृष्टध्रुवा दृष्टसप्तर्षिमण्डला इति ब्रूहि" इति चारायणः तां

उवाच । तदा "देवीदासः बन्धुलोऽहं, पुरुषः पुरुषं परिणयति इत्यप्रसिद्धं, सति चैवं आर्यः मां परिणयति इति अद्भुतं इदं" इति वस्तुतत्त्वं नटः प्रकाशयामास । तेन कुपितो राजसुहृत् सर्वान् विनिन्द्य अन्यत्र निश्चक्राम । राजा तं प्रसाद्य तेन सह स्वविनोदार्थं मन्त्रिकारितां रत्नवतीनाम्नीं चतुष्किकां ययौ ।

तवत्येन प्रभुणा कन्दुकक्रीडाव्यग्रा सा स्वप्नदृष्टा तरुणी पुनरीक्षिता। अनङ्गपरवशः किंचित्कालं सख्युः पुरस्तात् तां निर्वर्णयामास । क्रीडाविश्रान्तां आत्मानमेव सप्रत्यभिज्ञं अवलोकयन्तीं एनां संलपितुकामः सुहृदा सत्वरं अभिययौ । तावत्येव "विधत्ते सोल्लेखं कतरदिह नाङ्ग तरुणिमा तथापि प्रागल्भ्यं किमपि चतुर लोचनयुगे ।" इति द्विपदीं अक्षरावलीं अपश्यत् । अत्रान्तरे भित्त्यन्तरिता सा राज्ञः लोचनपथात् अपगता । स परं, तत्र कमपि वल्लभ हृदयस्थितं उद्दिश्य रुदतीं सख्या आश्वास्यमानां तां अवागच्छत् । "भवानेव तस्याः हृदये स्थितो वल्लभः" इति सखा सपरिहासं नरपतिमवोचत् । तदनु 'सखि मृगाङ्कावलि, तवावस्थानिवेदनार्थं महाराजस्य पुरतः पठनीयौ मया रचितौ द्वौ श्लोकौ शृणु' इति आमन्त्र्य तरुणीसख्या अनुवाचितौ श्लोकौ भित्तिव्यवहितो महीपतिः सोत्कण्ठं शुश्राव । स्वप्नदृष्टायाः तस्याः नाम "मृगाङ्कावली" इति अधिजगाम । सत्येवं सायंतनी सन्ध्या सन्निदधे । तेन सन्ध्यां उपासितुं अनिच्छन्नपि राजा बलात् देवीभवनं अयासीत् ।

---

# प्रकृतिभेदः (2) ॥

एकः— रे रे वस्त्रान्तः पिधेहि भूमिचणकान् । त्वरितं पिधेहि रे । किमरे वदामि, मन्दायसे । अनन्तरगृहशिशुरागच्छति । उपद्रविष्यति त्वाम् । पुनः किञ्चिद्देहि पुनः किञ्चिद्देहीति । नास्माकमल्पमप्यवशेषयिष्यति ।

अपरः— अस्तु रे । काममागच्छतु तपस्वी बालः । गृह्णातु यथेच्छं भुङ्क्तां च । एकद्वैराणकैः क्रीतान् चणकान् यदि शिशवे दद्याम कः प्रमादः । किमस्माकं यास्यति ? कथमियांस्ते सम्भ्रमः ?

# पूर्णत्वसंवादः (2) ॥

(T. E. Viraraghavacharya Siromani)

राघवः—सखे, आवयोः पूर्णत्वसंवादः प्रपूर्वस्यां सञ्चिकायां प्रकाशितस्सशेषो दृश्यते । (1) तदेकवृत्तित्वमेव स्वरूपसमाप्तिरिति निर्णयद्भिः परैरेव निर्दयं तद् दूष्यते इति तत्रादर्शयाव । (2) ईदृशी समाप्तिर्जातिबाधिकैवेति दीपाद्युदाहृतजातिदृष्टान्तबलादपि भगवति न स्वर्तव्या आसीत् परेषामिति चावोचाव । (3) कृष्णाद्यवतारे रूपभेदात् सौभरेरिवैकत्वैव सत्त्वं अन्यत्र सत्त्वञ्चेति न तत् स्वरूपसमाप्तिं साधयिष्यतीत्यब्रूव । (4) 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्यादिकं अंशतो व्याप्तौ प्रमाणमिति वेदार्थसंग्रहं तद्व्याख्यानतात्पर्यदीपिकाञ्चोदाहृत्योपापीपदाव । (5) अंशतो व्याप्तिः श्रीकृष्णपादैरपि कण्ठोक्तेति परेषां अद्भुतशक्तौ तन्निरसनं कूटस्थसूक्तिदूषणमित्युदैरिराव । प्रतिज्ञातं वक्तव्यशेषमिदानीं आवाभ्यां विमृष्टव्यं भवति ।

माधवः— दीपग्रन्थे तु श्रीभाष्यकारैरेवमुक्तम्— ब्रह्म निरवयवमपि कार्यञ्च भवति; अनन्तञ्च भवति । यथा जातिवादिनो जातिरेकैवामूर्ता खण्डमुण्डादिष्वत्यन्तविलक्षणेष्वनन्तेष्वपि परिसमाप्यैव वर्तते इति । अत्र हि जातेः ब्रह्मणश्च स्वरूपसमाप्तिरभिहिता ?

राघवः— साधु पृष्टं भवता । समाधानमिदमवेहि । परिसमाप्तिः पर्याप्तिरिति च पर्यायौ । अधिकवारिका न्यूनवारिका चेति द्विविधा पर्याप्तिः । आद्या तदितरावृत्तित्वम् । तदुक्तं कूटघटितलक्षणे—'व्यापकतावच्छेदकपर्याप्तत्वं हि व्यापकतानवच्छेदकावृत्तित्वम्' इति । ईदृशी पर्याप्तिर्जातिबाधिकेति जातेरियं नेष्यते नैयायिकैरित्यसकृदुक्तम् । अन्या तु तन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । गवि क्वचिदपि गोत्वात्यन्ताभावो नास्तीति गोत्वं गवि पर्याप्तमित्युच्यते । जातेः तद्वादिभिरादृता पर्याप्तिरियमेव । सेयमन्यत्रापि सत्ता न व्याहन्ति जातेः । तद्वत् ब्रह्मापि प्रत्येकं

परिसमाप्य(व्याप्य)वर्तते इति कृत्स्नप्रसक्त्यधिकरणदीपग्रन्थार्थः। 'संपूर्णं वर्तताम्' इतीदं 'व्याप्यवृत्तिर्भवतु' इति विवृतं अद्रव्यपरिच्छेदे व्याख्यातृभिः। तत्र व्याप्यवृत्तित्वं हि तन्निष्ठात्यन्ताभावाप्रतियोगित्वरूपमेव।

माधवः— वयस्य, युक्तमुक्तं भवता। कृत्स्नप्रसक्त्यधिकरणे ब्रह्मणः कार्त्स्न्येनांशेन वा वस्त्वन्तरसंबन्धः समर्थितः ?

राघवः— यथामतं द्वेधापि। तथा हि—(1) निरवयवे वस्तुनि औपाधिकः अंशभेदोऽस्तीत्येकं मतम्। (2) स्वाभाविक एव स इत्यपरम्। (3) औपाधिकं स्वाभाविकं वा अंशभेदं विनैव कार्त्स्न्येन तत् संबध्नाति इति तृतीयम्। आद्यं पक्षद्वयमवलम्ब्य न्यायसिद्धाञ्जने श्रीदेशिकचरणैः, सिद्धान्तसिद्धाञ्जने चानन्तार्यैः निरवयवायाः प्रकृतेः प्रादेशिकः परिणाम उपपादितः। उभयेऽपि कृत्स्नप्रसक्त्यधिकरणमेवैकदेशपरिणामे प्रमाणयामासुः। व्यासार्यास्तु आरम्भणाधिकरणश्रुतप्रकाशिकायां स्वतस्सांशत्वं निरवयवस्य खण्डयित्वा औपाधिकांशभेदमेव समर्थयन्ति। कार्त्स्न्येनेति तृतीयोऽपि पक्षः स्वीक्रियत एवास्माभिः। कार्त्स्न्यं हि नाम न तन्मात्रवृत्तित्वरूपा स्वरूपपरिसमाप्तिः पराभिमता। अपि तु 'एकदेशाबहिर्भावो हि कार्त्स्न्यम्' इति शतदूषण्यां आचार्यैरुक्तरूपम्। अस्मिन् पक्षे एकदेशाभावादेवैकदेशाबहिर्भावस्सुवचः! सांशं हि एकदेशेन संबध्नाति एकदेशान्तरेण च बहिर्भवति। निरंशे एकदेशबहिर्भावो नास्तीति एकदेशाबहिर्भावरूपेण कार्त्स्न्येन वस्त्वन्तरैस्समं सम्बन्धः सिद्ध्यति। 'प्रतिपिण्डं कार्त्स्न्येनैव जातिर्वर्तते' इति न्यायमञ्जर्यां जयन्तभट्टोक्तिः। तन्मात्रवृत्तित्वरूपास्वरूपसमाप्तिस्तु जातिबाधिका नात्र विवक्षितेति तु न विस्मर्तव्यं परैः। एकदेशाबहिर्भावरूपेण कार्त्स्न्येन सम्बन्ध एव विवक्षित इह। जातेरिव ब्रह्मणोऽपि एकदेशाबहिर्भावात्मना कार्त्स्न्येन वस्त्वन्तरसंबन्धोऽपि कृत्स्नप्रसक्त्यधिकरणसिद्धान्तसम्मत एव।

माधवः— सखे, दीपग्रन्थसामरस्यं सुष्ठु संपादितम् । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्यस्य विवरणावसरे वेदार्थसंग्रहतात्पर्यदीपिकायामित्थमाहुर्व्यासार्याः—

'अंशशब्दः स्वरूपैकदेशपरः, निरंशे प्रतिपदार्थं पूर्णवर्तिन्यपि स्वरूपे अंशशब्दव्यवहारः एकस्मिन्नेव वस्तुनि स्वरूपस्य पूर्णवर्तितयाऽन्यत्र वृत्त्ययोग्यत्वशङ्काव्युदासार्थः ।' इति ।

व्यामिश्रमिवेदं वाक्यं बुद्धिं मोहयतीव । प्रथमं अंशशब्दः स्वरूपैकदेशपर इति व्याख्यायि । अनुपदमेवान्यथा क्रियत इव ।

राघवः— परेऽपि क्रियासमभिहारेण 'निरंशे' इत्यादिकमुदाहृत्य प्रत्यवतितिष्ठन्ते । 'अंशशब्दः स्वरूपैकदेशपरः' इति पूर्ववाक्ये त्वदर्शनमिवाभिनयन्ति । निरवयवे स्वतस्सांशत्वपक्षः आरम्भणाधिकरणे व्यासार्यैः प्रतिक्षिप्त इत्यवोचम् । अन्यौ तु पक्षौ तदभिमतौ । तयोरौपाधिकांशवादानुसारेणांशशब्दः स्वरूपैकदेशपरः इति प्रथमं व्याख्यायि । कार्त्स्न्येन वस्त्वन्तरसम्बन्ध इति पक्षेण 'निरंशे' इत्यादिकमुक्तम् । निरंश इति पक्षे अंशशब्दः अन्यत्रवृत्त्ययोग्यत्वशङ्काव्युदासार्थः । न तु मुख्यार्थकः इत्याशयः । स्तोत्ररत्नभाष्ये देशिकोक्तिरिहानुसन्धेया ।

'अत्रायुतायुतेत्याद्यंशक्तिरसंख्यातब्रह्माण्डतदावरणादिमहत्तरविभूत्याश्रयप्रदेशातिरिक्तविभूत्यन्तराश्रयापरिमितस्वरूपवैभवसूचनार्था' इति ।

निरंशं ब्रह्मेतिपक्षे प्रतिपदार्थं निश्शेषं संबद्धमपि ब्रह्मस्वरूपं अन्यत्रापि वृत्तियोग्यम् । जात्यादिवत् इति भावः ।

माधवः— 'एकस्मिन्नेव वस्तुनि स्वरूपस्य पूर्णवर्तितया' इति कथम् ? 'अत्रैव विद्यमानत्वस्यास्माभिरनभ्युपगमात्' इति ईदृशं पूर्णत्वं भगवतो नास्तीति स्फुटमीश्वरपरिच्छेदे न्यायसिद्धाञ्जने ?

राघवः— परेऽपि हि स्वसम्प्रदायपरित्राणे तथैव लिखन्ति— 'वस्तुत एकत्रैव विद्यमानत्वं नाभ्युपगम्यते किल ।' इति [18. पु.] । अयमर्थः—

एकस्मिन्नेवेति नैरपेक्ष्यपरः एवकारः न तु इतरव्यवच्छेदार्थः । प्रसिद्धो हि नैरपेक्ष्यपरः एवकार प्रयोगः शास्त्रेषु काव्येषु च । यथा— 'सुखविशिष्टाभिधानादेव च इति' एवकारो नैरपेक्ष्यं हेतोर्द्योतयति । इति श्रीभाष्यम् । यथा वा— अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयित्वात् ; न चैवं घट एव व्यभिचारः । इति

घटमात्रे प्रसिद्धः । न तु पटादौ इति न ह्यर्थः । केवलान्वयिनोऽभावस्य पटादावपि सत्वात् । एवं घट एव व्यभिचारः इत्यत्रापि न पटादौ इति न ह्यर्थः, तत्रापि व्यभिचारात् । एवं 'भवतां पुनराशीरेव जयराशीकरणायालम्' इत्यादिकविप्रयोगोऽपि भाव्यः । तद्वदिहापि । वस्त्वन्तरनिरपेक्षं ब्रह्मस्वरूपं एकस्मिन् वर्तते । निरंशत्वात् निश्शेषमेवैकत्रवृत्तिस्तस्य । अतोऽन्यत्र कथं वर्तताम् । शेषाभावात् इति शङ्कितुराशयोऽत्र । सर्वशक्तौ एतत्पत्राधिपैस्ताताचार्यस्वामिभिरुदाहृतं पार्थसारथिमिश्रवचनमिहानुसन्धेयम् । यथा— व्यक्त्यन्तरमनपेक्ष्यैव व्यक्त्यन्तरे वर्तमाना स्वानुरूपां बुद्धिं जनयन्ती जातिः प्रत्येकं वर्तते इत्युच्यते । इति ।

अतः 'एकस्मिन्नेव .... पूर्णवर्तितया' इत्यस्य व्यक्त्यन्तरमनपेक्ष्यैकस्यां व्यक्तौ निश्शेषं सत्वेनेति विवक्षितोऽर्थः । अवयविवत् अवयवान्तराण्यपेक्ष्यावयवे तदन्यस्मिन् वृत्तिश्चेत् तद्वदेवान्यत्र वृत्तियोग्यं स्यात् ब्रह्मस्वरूपम् । इदं तु व्यक्त्यन्तरमनपेक्ष्यैवैकस्मिन् वस्तुनि पूर्णवर्ति कथमन्यत्र वर्तताम् ? इति शङ्का । जात्यादिवत् निरंशस्य एकत्र निरपक्षसत्वं, अन्यत्रापि सत्वञ्चोपपद्यत इति परिहारः अंशशब्दविवक्षितः इति व्यासार्यसूक्तिसामरस्यम् ।

33

# अहिंसा ॥

(Pandit K. S. Ramaswami Sastri, Baroda)

सर्वोऽपि लोकः स्वार्थसिद्ध्यै सर्वदा प्रयतते । स्वार्थश्च क्वचित् स्वपोषणं क्वचित्परपीडनं कदाचिदुभयरूपश्च भवति । तत्सिद्ध्यै च प्रयतमानो लोकः अनादिना कालेन द्विविधां रीतिमुपायतयाऽऽद्रियमाणो दृश्यते । सा च हिंसा अहिंसा च । हिंसयापि भवति स्वाभीप्सितसिद्धिः तथा अहिंसयापि । परपीडनश्च तथैव हिंसयापि भवति अहिंसयापि । एकस्यैव कार्यस्य परस्परविरुद्धमप्युभयं हिंसाऽहिंसा च साधनं भवतीति चित्रमिदं दृश्यते । सर्वोऽपि लोकः हिंसायाः उपायत्वे न सन्दिह्यात् । रावणादयो राक्षसाः हिंसयैव स्वार्थसिद्धिं लेभिर इति शृणुमः । देवा अपि हिंसयैव असुरराजान् भूयसा जिग्युरिति कथयन्ति पुराणानि । वेदा अपि श्येनादीन् यज्ञानभिचोदयन्तः हिंसायाः स्वार्थसिद्धिसाधकत्वमनुमन्यन्ते । क्रूराः पशवोऽपि हिंसयैवान्यान् पशून्निघ्नन्तो दृश्यन्ते । किं बहुना ? राजानोऽपि पूर्वस्मिन् इदानींतने च समये हिंसयैव स्वसंरक्षणं परेष्वाक्रमणं वा कुर्वन्तो दृश्यन्त इति नात्र बहु वक्तव्यम् ।

अहिंसायाः कार्यसिद्ध्युपायत्वं नैतावता कुत्रापि समवधारितमिति यदत्र जनाः सन्दिहते तदुचितमेव । अहिंसामाचरतां कथं स्वार्थो लभ्येत विशेषतश्च परपीडनम् । प्रत्युताहिंसकं परे जनाः पीडयन्ति; न कश्चनार्थं तद्वशं कुर्वन्ति । दृश्यते श्रूयते च बहु निदर्शनमत्र विषये । अहिंसामार्गमधितिष्ठन्तो युधिष्ठिररामहरिश्चन्द्रनलादयो वीरपुरुषा अपि महतीष्वापत्सु पातिता बभूवुरिति पुराणानि कथयन्ति । हिंसा यद्यादृता भवेदेभिरेव महापुरुषैः, न केवलं निरापदः परन्तु समग्रपृथिवीपाला एते भवेयुरिति सर्वेषां प्रतिभाति । अहिंसामार्गे अवतीर्णाः भारतवर्षीयाश्च चिरादेव

हिंसाप्रधानैः परैः स्वार्थसाधनाय वञ्चिता अभूवन् । हिंसयैवाचिरप्रवृत्तेषु महाघोरेषु लोकयुद्धेषु जयपराजयौ निर्धारितौ दृश्येते ।

परन्तु अहिंसायाः धर्मत्वं सर्वादरणीयत्वं च सर्वेषु धर्मशास्त्रेषु प्राधान्येनोद्घुष्यमाणं दृश्यते । न कुत्रापि कार्यसाधकत्वं परपराजयहेतुत्वं वाऽवगम्यतेऽहिंसायाः । समीहितसाधनायानुपयोगिनी अहिंसा कथं वा कर्तव्यतयोपादिश्यते । किमत्र कारणम् । अहिंसाऽपि कार्यसिद्धिहेतुरिति प्रथममेव प्रतिज्ञातम् । यत्फलं हिंसया लभ्यते तदेवाहिंसयापि । इदन्तु न तथा स्फुटम् ; सूक्ष्मनिरीक्षणं किञ्चिदिवापेक्षते । इदमेकं विचिन्त्यताम् । सत्स्वपि बहुषु हिंस्रेषु कथमन्ये जीवन्ति स्वकार्यञ्च साधयन्ति । अहिंसयैव । यदि हिंस्राः प्राणिनो निघ्नन्तीति परेऽहिंस्रा अपि तैः साकमवर्तेयुर्हिंसायां सर्वथा मूलोच्छेदो भवेदेव । दूर एव स्वकार्यसिद्धिः । कथं वा एतेऽहिंस्रा जीवन्ति शतगुणं वर्धन्ते च । अहिंसयैव । अहिंसकस्य शान्तस्य पुरतः क्रूरतराणामपि हिंसा न प्रभवति । प्रवृत्ता वा न तावतीं हानिं विदध्यात् या हिंसायामादृतायां भवेत् । समुपचितामर्षः शस्त्रपाणिः पुरुषः परमेकमहिंस्रमपि हत्वा शान्तरोषोऽनिन्धनो वह्निरिव स्वयं शाम्यति लभेत च स्वकर्मणः फलम् । भूयांसश्चापरेऽहिंसयैव सुरक्षिता भवन्ति । अतोऽहिंसाप्यात्मरक्षणोपायो भवति ।

लोकोत्तरवीर्येषु रावणपरशुरामादिषु क्रूरतरहिंसामाचरत्स्वपि कथमन्ये तपस्विनः ब्राह्मणा राजानश्च सुखेन जीवन्त आसन् । अहिंसयैव । युधिष्ठिरादयश्च वीराः महतीं कीर्तिं कार्यसिद्धिञ्चावापुरहिंसयैव । अहिंसकञ्च सर्वो लोकः सदयमीक्षते । हिंस्राणामुपरोधञ्च करोति । हिंस्राश्च पीडिता भवन्ति । न च प्रभवन्ति पुरतश्चिरं स्थातुमहिंस्राणाम् । इयमेव रीतिरादृता भारतवर्षीयैः कथञ्चित् स्वातन्त्र्यावाप्तिसाधनमभवत् । हिंसा-

ऽहिंसयोः कार्यसाधकत्वे समाने कतरस्या आश्रयणमभ्युदयकारीति परं युक्तं विचिन्तयितुम् ।

हिंसाया बलवदनुष्ठिताया अपि नैकान्ततः कार्यसाधकत्वं दृश्यते । हानिश्च महती चिरानुवर्तिनी । फले च विपर्ययः । अहिंसायास्तु न कदाचित्पराजयः । सत्यामपि कस्याञ्चिद्धानौ विलंबितमपि फलं सा प्रसूत एव । खेदो विनाशश्च न तावान् यावान् हिंसया प्रवर्तमानानाम् । हिंसाकरणं च यावन्तं प्रयत्नं साधनसम्पत्तिं चापेक्षते न तावन्तं कञ्चिदपि अहिंसाकरणमपेक्षते । अत एव हिंसावादः लोकोत्तरः राजनीतितया समुपदिष्टो महात्मना गान्धिमहोदयेन । गीताचार्यस्तु हिंसायामप्यहिंसामेव पश्यतीति प्रभवतीयमहिंसा ।

---

---

नास्तिकप्रचारैः कलुषीकृतप्रज्ञः कश्चन युवा भूतपूर्वं अमेरिकाजनाधिपतिं 'उड्रोविल्सन्'महाशयं इत्थमप्राक्षीत्—

मान्य ! 'लोके सन्मार्गं दर्शयितुं मतमुपयुज्यते । अतः सर्वैरपि मतमादरणीयम्' इति प्रचार्यते किल । मतावलम्बिष्वपि जनेषु क्रूरतराणि पापकर्माणि वञ्चनादयश्च कुतः प्रचलन्ति ? अतः 'मतात् दोषो भवति' इत्यहं विश्वसिमि । मतेन किं फलम् ?

उड्रोविल्सन् उत्तरमाह— वयस्य ! श्रूयताम् । 'सत्येव मते नराः क्रूराः पापिनश्च भवन्ति । यदि मतं न स्यात् 'एते नराः कथं वा वर्तेरन्' इति त्वमेव साधु चिन्तय" इति ।

रे. शौरिराजः ।

---

KENDRIYA SANSKRIT VIDYAPEETHA, TIRUPATI. LIBRARY

# पुस्तकपरामर्शः ॥

Bulletin of the Government Oriental Manuscripts Library, Madras. Edited by the Curator.

Annual subscription— Rs 4.

वर्षस्य द्विः इयं पत्रिका प्रकाशयिष्यते । सर्वप्रथमसञ्चिका सम्प्रति बहिरागता । 133 पुटात्मिकायामस्यां श्रीकुञ्जन्-राजस्य The Sanskrit Metres: Vedic and classical ; श्रीशङ्कराचार्यप्रणीतं मायाविवरणम् ; श्री V. Hanumantacharya-अस्य Linganaradhya and His Works ; तत्त्वदीपनाख्यव्याख्यासहितः एकश्लोकः ; दैवस्वामिकृतः भूधरविलासः (பூதரவிலாஸம்) ; गणपवरपु-वेङ्कटकविविरचितः विद्यावतीदण्डकः (आन्ध्रभाषामयः) ; सीतास्वयंवरं-किलिप्पाट्टु (केरळभाषायाम्) ; Mirat i. e. Kashmir, The earliest Persian poem on Kashmir इत्येते निबन्धाः प्रकाशिताः । नानाभाषामयबहुग्रन्थरक्षणपरेयं राजकीयप्राचीनपुस्तकशाला एवंविधं प्राचीनग्रन्थप्रकाशनोद्यमं करोतीति अत्यन्तं श्लाघ्यमेतत् । विद्यारसिकः सम्पादकः श्रीचन्द्रशेखरार्यः अद्यावधि अमुद्रितान् विनश्यदवस्थान् ग्रन्थान् अन्विष्य प्रकाश्य रक्षिष्यतीति दृढं विश्वसिमः । वृत्तविषये केवललक्षणग्रन्थैरवेद्यान् कवीनां स्वानुभवैकगम्यान् बहून् विशेषान् श्रीकुञ्जन्-राजः प्रकाशयति । तत्र नूनं सहृदयाः प्रहृष्येयुः ।

मन्दाक्रान्तालक्षणे ( 20पुटे) Ma Bha Na Ta Ta Ga इत्यत्र अन्ते पुनः Ga इति योजनीयम् । द्राविडभागे (68 पुटे) 'கி. பி. பதினேழாம் நூற்றாண்டினது' इत्यत्र 'பதினெட்டாம்' इति भाव्यम् ।

इयं पत्रिकाप्रकाशनप्रवृत्तिरुत्तरोत्तरमभिवर्धतामित्याशास्महे !

[सं]

Registered No. M 2300.

Book XXII ॥ श्रीः ॥ Nos. 5 & 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २२] कलि ५०४९ सर्वधारि मकर } कुम्भ साधारण सं ३
शास्त्रानुबन्ध सं ३
आहत्य ,, ६

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

January & February 1949

## विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । २६९—२७६

1 मेनका ।
2 सुभाषितनीवी ।
3 राज्यतन्त्रम् ।
4 दिनचरी ।
5 धैर्यम् ।
6 नाटककथासारः ।
7 प्रभातचिन्ताः ।
8 यथाभिमतम् । [नाटकम]
9 राष्ट्रभाषा ।
10 प्रकृतिभेदः (१) ।
11 पुस्तकपरामर्शः ।
12 प्रतिबोधनम् । [wrapper]

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subcription Re. One only.

Do. With Sanskrit Supplement Rs. 2—0—0

## उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम्। सानुबन्धाया द्वे रूप्ये।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम्।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन्। गद्यरूपेषु अधिकतर आदरः।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या।

मुद्रणकारः— **S. Vijayaraghavan,**

*Proprietor,* The Srinivasa Press,

Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamasarnava, Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.

Lecturer, Sri Venkateswara College,

TIRUPATI.

ANDRIYA SANSKRIT VIDYA PEETHA LIBRARY 316

संबन्धरूपातिशयोक्तिरस्त्विति शङ्कापि निरस्ता। तथा च सति 'कस्त्वं भोः कथयामि' इत्यादावपि तत्प्रसङ्गात्सारूप्यनिबन्धनाप्रस्तुतवाक्यार्थावगतिरूपविच्छित्तिविशेषेण अलङ्कारान्तरत्वकल्पनं तु इहापि तुल्यम्। तस्मात्सर्वालङ्कारविलक्षणमिदं ललितम्।

यथा वा—

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

अत्रापि निदर्शनाभ्रान्तिर्न कार्या। अल्पविषयया मत्या सूर्यवंशं वर्णयितुमिच्छुरहमिति प्रस्तुतवृत्तान्तानुपन्यासात्तत्प्रतिबिम्बभूतस्य 'उडुपेन सागरं तितीर्षुरस्मि' इत्यप्रस्तुतवृत्तान्तस्य वर्णनेनादौ विषमालङ्कारविन्यासेन च केवलं तत्र तात्पर्यस्य गम्यमानत्वात्।

यथा वा—

अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य।
त्वदाप्तसङ्केततया कृतार्था श्राव्यापि नानेन जनेन संज्ञा॥

---

शङ्कापीति। प्रस्तुतधर्मिण्यप्रस्तुतवाक्यान्वयायोगादिति शङ्कोन्मेषावकाशः। प्रसङ्गादिति। चेतनाचेतनप्रश्नोत्तरयोः अत्यन्तासम्भावितत्वादिति भावः। इहापीति। गतजलसेतुबन्धनवर्णनादिष्वपीत्यर्थः।

क्वेति। 'उडुपन्तु प्लवः कोलः' इत्यमरः। नन्वत्र काव्यप्रकाशे निदर्शनायाः प्रदर्शितत्वात् कथं ललितालङ्कार इत्यत आह—अत्रापीति। अपिना 'निर्गते नीरे' इत्युदाहरणसमुच्चयः। कथं तर्हि तदवगम इत्यत आह— तदिति। आदाविति। पूर्वार्धे इत्यर्थः। तत्र पूर्वोक्ते प्रस्तुतार्थे। गम्यमानत्वादिति। तथा च रूपकेण अतिशयोक्तिविषयाक्रमणप्रसञ्जनपूर्वकं प्रस्तुताप्रस्तुतवाक्यार्थयोः उपात्तयोरेव निदर्शनेति व्यवस्थापनात् काव्यप्रकाशो नादरणीय इति भावः॥

अनायीति। कुतो देशादागतोऽसीति पूर्वार्धतात्पर्यम्। त्वयि

अत्र 'कतमो देशस्त्वया परित्यक्तः' इति प्रस्तुतार्थमनुपन्यस्य 'वसन्तमुक्तस्य वनस्य दशामनायि' इति तत्प्रतिबिम्बभूतार्थमात्रोपन्यासाल्ललितालङ्कारः ।

इति ललितम् ।

## अथ प्रहर्षणम् ।

उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम् ।
तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ॥

उत्कण्ठा इच्छाविशेषः ।

सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते ।
तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयो विदुः ॥

इत्युक्तलक्षणः । तद्विषयस्यार्थस्य तदुपायसंपादनयत्नं विना सिद्धिः प्रहर्षणम् । उदाहरणं स्पष्टम् ।

---

आप्तः सङ्केतः शक्तिः यया । तथाविधतया कृतार्था । अनेन जनेन मया । अपिरत्र प्रश्ने । अपि न श्राव्या । न श्राव्या किमित्यर्थः । किं ते नामेति तात्पर्यम् ।

इति ललितम् ।

अथ प्रहर्षणम् ।

उत्कण्ठितेति । सम्भावनालङ्कारे ऊहरूपयत्नः, इह तु यत्नं विना सेति सङ्गतिः । मध्यमौ तु प्रासङ्गिकौ । यत्नं विना उत्कण्ठितार्थसंसिद्धिः प्रहर्षणालङ्कार इत्यर्थः । समालङ्कारव्युदासाय पूर्वदलम् । 'यत्नाभावान्न तल्लाभ' इत्यादिवारणाय उत्कण्ठितेति । उत्कण्ठितार्थमात्रसिद्धिरिति विवक्षितम् । तेन द्वितीयप्रहर्षणव्युदासः । इदं विशेषलक्षणम् । सामान्यलक्षणं तु तद्विषयकयत्नं विना तल्लाभ इति । प्रहृष्यते अनेनेति प्रहर्षणम् । करणे ल्युट् । सैव दूतिका निसृष्टा । दूतिकात्वेन प्रेषिता ॥

सर्वेति । आस्वादोऽनुभवः । अविच्छिन्नध्यानं सङ्कल्पः । तदुपायेति तृतीयप्रहर्षणव्यावृत्तिः । स्पष्टमिति । ध्यायत इत्यनेन [उत्कण्ठायाः निसृष्टेत्यनेन] तद्विषयलाभस्य चोक्तत्वादिति भावः ।

यथा वा—

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैः

नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।

इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं

राधामाधवयोर्जयन्ति यमुनाकूले रहः केळयः ॥

अत्र राधामाधवयोः परस्परमुत्कण्ठितत्वं प्रसिद्धतरम् । अग्रे च ग्रन्थकारेण निबद्धमित्यत्रोदाहरणे लक्षणानुगतिः ।

वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम् ।

दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः ॥

स्पष्टम् ।

यथा वा—

चातकस्त्रिचतुरान्पयःकणान् याचते जलधरं पिपासया ।

सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता ॥

यत्नादुपायसिद्ध्यर्थात्साक्षाल्लाभः फलस्य च ।

निध्यञ्जनौषधीमूलं खनता साधितो निधिः ॥

---

**मेघैरिति** । मेदुरं निबिडितम् । इमं कृष्णम् । भीरुत्वस्यानुवाद्यत्वेन, विहितस्य कार्यान्तरविधानरूपान्वादेशाभावात् नात्र एनादेश इत्याहुः । प्रत्यध्वकुञ्जद्रुमम् । अध्वकुञ्जद्रुमेषु सर्वेष्वित्यर्थः । वीप्सायामव्ययीभावः । उत्कण्ठाया उदाहरणे अनुपन्यासादाह— **अत्रेति** । ग्रन्थकारेण गीतगोविन्दाख्यग्रन्थकारेण जयदेवेन ।

**वाञ्छितादिति** । अत्रापि विना यत्नमित्यनुषङ्गः । तेन समनिरासः पूर्वप्रहर्षणव्युदासाय अधिकेति । **स्पष्टमिति** । स्वोपयोगिप्रकाशमात्रलिप्सायां सर्वोपयोगितल्लाभ इति भावः । **चातक इति** । त्रींश्च चतुरश्च त्रि(त्रीन्)चतुरो वा, त्रिचतुरान् । दुह्यादित्वात् द्विकर्मकत्वम् । विशेष[स्य] सामान्य[न्येन]समर्थनरूपोऽर्थान्तरन्यासः ।

**यत्नादिति** । पूर्वप्रहर्षणवारणाय यत्नादिति । समालङ्कारव्यावृत्तये

फलोपायसिद्ध्यर्थाद्यत्नान्मध्ये उपायसिद्धिमनपेक्ष्यापि साक्षात्फलस्यैव लाभोऽपि प्रहर्षणम् । यथा निध्यञ्जनसिद्ध्यर्थं मूलिकां खनतस्तत्रैव निधेर्लाभः ।

यथा वा—

उच्चित्य प्रथममधः स्थितं मृगाक्षी पुष्पौघं श्रितविटपं गृहीतुकामा ।
आरोढुं पदमदधादशोकयष्ट्यामासूलं पुनरपि तेन पुष्पिताऽभूत् ॥

अत्र पुष्पग्रहणोपायभूतारोहणसिद्ध्यर्थात्पदनिधानात्तत्रैव पुष्पग्रहणलाभः ।

इति प्रहर्षणम् ।

## अथ विषादनम् ।

इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनम् ।
दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः ॥

---

उपायसिद्ध्यर्थादिति । भूमिगतनिधिदर्शनाञ्जनमूलिकार्थं भूमिं खनता निधिरेव प्राप्त इत्यर्थः । साक्षात्पदार्थमाह—**मध्य** इति । तल्लाभः* निधिलाभः **उच्चित्येति** । प्रथममधः स्थितं हस्तापचेयम् । श्रितविटपम् उच्छ्रितशाखाश्रयम् । पदमदधात् न्यस्तवती । तेन पदाधानेन । अत्र अशोकयष्टिरिति विपरिणामेनानुषङ्गः । यष्टिपदं काष्ठ...य(काठिन्य)द्योतनाय ।

इति प्रहर्षणम् ।

अथ विषादनम् ।

**इष्यमाणेति** । प्रहर्षणवैधर्म्यात्सङ्गतिः । विना यत्नमित्यनुषङ्गः । तेन विषमनिरासः । प्रहर्षणव्युदासाय इष्यमाणेत्यादि । व्युत्पत्तिः स्फुटा । निर्वाणः शान्तः । 'निर्वाणोऽवाते' इति निपातः ।

---

* तत्रैव निधेर्लाभ इति मुद्रितपाठः ।

यथा वा—

रात्रिर्गमिष्यति भविष्यति च प्रभातं
　भास्वानुदेष्यति हसिष्यति पङ्कजं च ।
इत्थं विचिन्तयति कोशगते द्विरेफे
　हा हन्त हन्त नलिनीं गज उज्जहार ॥

इति विषादनम् ।

अथ उल्लासः ।

एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि ।
अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी ॥
काठिन्यं कुचयोः स्रष्टुं वाञ्छन्त्यः पादपद्मयोः ।
निन्दन्ति च विधातारं त्वद्धाटीष्वरियोषितः ॥
तद्भाग्यं धनस्यैव यन्नाश्रयति सज्जनम् ।
लाभोऽयमेव भूपाल सेवकानां न चेद्वधः ॥

यत्र कस्यचिद्गुणेनान्यस्य गुणो दोषेण दोषो गुणेन दोषो दोषेण गुणो वा वर्ण्यते स उल्लासः । द्वितीयार्धमाद्यस्योदाहरणम् । तत्र

---

रात्रिरिति । हसिष्यति विकसिष्यति । तदनन्तरं अहं बहिर्गमिष्यामीति भावः । कोशगते अब्जमुकुलगते । उज्जहार उन्मूलयाञ्चकार ।

इति विषादनम् ।

अथ उल्लासः ।

एकस्येति । इष्टानिष्टप्रसङ्गात् गुणदोषयो[रुपस्थिति]रिति सङ्गतिः । तौ गुणदोषौ । उत्तरालङ्कारवारणाय तौ यदीति । साध्वी पतिव्रता । स्नात्वा मामपि पावयेत् । अपि नाम पवित्रीकुर्यादिति भावः । त्वद्धाटीषु त्वत्कर्तृकरिपुजनानुधावनेषु । गुणेन दोष इति । गुणदोषाभ्यामिति समस्तयोरपि गुणदोषपदयोः तावित्यत्र प्रत्येकमन्वयः लक्ष्यानुरोधादाश्रीयत इति भावः ।

पतिव्रतामहिमगुणेन तदीयस्नानतो गङ्गायाः पावनत्वगुणो वर्णितः । द्वितीयश्लोको द्वितीयस्योदाहरणम् । तत्र राज्ञो धाटीषु वने पलायमानानामरियोषितां पादयोर्धावनपरिपन्थिमार्दवदोषेण तयोः काठिन्यमसृष्ट्वा व्यर्थं कुचयोः तत्सृष्टवतो धातुर्निन्द्यत्वदोषो वर्णितः । तृतीयश्लोकस्तृतीयचतुर्थयोरुदाहरणम् । तत्र सज्जनमहिमगुणेन धनस्य तदनाश्रयणं दोषत्वेन राज्ञः क्रौर्यदोषेण तत्सेवकानां वधं विना निर्गमनं गुणत्वेन वर्णितम् । अनेनैव क्रमेणोदाहरणान्तराणि।

यदयं रथसंक्षोभादंसेनांसो निपीडितः ।
एकः कृती मदङ्गेषु शेषमङ्गं भुवो भरः ॥

अत्र नायिकासौन्दर्यगुणेन तदंसनिपीडितस्य स्वांसस्य कृतित्वगुणो वर्णितः ।

लोकानन्दन चन्दनद्रुम सखे नास्मिन्वने स्थीयतां
दुर्वंशैः परुषैरसारहृदयैराक्रान्तमेतद्वनम् ।
ते ह्यन्योन्यनिघर्षजातदहनज्वालावलीसंकुला
न स्वान्येव कुलानि केवलममी सर्वं दहेयुर्वनम् ॥

अत्र वेणूनां परस्परसंघर्षसञ्जातदहनसंकुलत्वदोषेण वननाशरूपदोषो दर्शितः ।

---

यदयमिति । ऊर्वश्या सह एकं रथमधितिष्ठतः पुरूरवसः इदमनुस्मरणवचनम् । स (अंसः ।) ममेत्यनुषङ्गः । आस्नो (अंसेन ।) तस्या इति शेषः ।

लोकेति । पदत्रयेणामन्त्रणम् । दुर्वंशैः दुष्टवेणुभिः दुष्कुलीनैश्च । परुषैः कठिनैः । पर्ववद्भिर्वा परुश्शब्दादर्श आद्यच् । क्रूरैश्च । असारहृदयैः त्वक्सारत्वेन अन्तस्सारशून्यैः सारासारानभिज्ञहृदयैश्च । निघर्षः निष्पेषः कलहश्च ।

दानार्थिनो मधुकरा यदि कर्णताल-
दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डतलमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥

अत्र भ्रमराणामलङ्कारत्वगुणेन गजस्य तत्प्रतिक्षेपो दोषत्वे वर्णितः ।

आघ्रातं परिचुम्बितं परिमुहुर्लीढं पुनश्चर्वितं
त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः ।
हे सद्रत्न तवैतदेव कुशलं यद्वानरेणादरा-
दन्तस्सारविलोकनव्यसनिना चूर्णीकृतं नाश्मना ॥

अत्र वानरस्य चापलदोषेण रत्नस्य चूर्णनाभावो गुणत्वेन वर्णितः ।

अत्र प्रथमचतुर्थयोरुल्लासोऽन्वर्थः । मध्यमयोश्छत्रिन्यायेन लाक्षणिकः ।

इति उल्लासः ।

अथ अवज्ञा ।

ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा ।
स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरम् ॥

---

दानेति । करिवरेण कर्त्रा मदान्धबुद्ध्या करणेन ।

आघ्रातमिति । प्रतिमुहुः पुनः पुनः पुनश्चर्वितम् दन्तैः दष्टम् । असीति शेषः । तत्र त्यागेने(त्याग इ ? )ति शेषः । अत्र वानरगतानां आघ्राणपरिचुम्बनलेहनचर्वणानां क्रमिकत्वात्कारकदीपकम् ।

इति उल्लासः ।

अथ अवज्ञा

ताभ्यामिति । सङ्गतिः स्फुटा । पूर्वालङ्कारवारणाय नेति ।

मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः ।

ताभ्यां गुणदोषाभ्यां । तौ गुणदोषौ । अत्र कस्यचिद्गुणेनान्यस्य गुणालाभे द्वितीयार्धमुदाहरणम् । दोषेण दोषस्याप्राप्तौ तृतीयार्धम् ।

यथा वा—

मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादलसपुरुषानादरभरैः ।
यथा यूनस्तद्वत्परमरमणीयापि रमणी
कुमाराणामन्तः करणहरणं नैव कुरुते ॥

त्वं चेत्सञ्चरसे वृषेण लघुता का नाम दिग्दन्तिनां
व्यालैः कङ्कणभूषणानि कुरुषे हानिर्न हेम्नामपि ।
मूर्धन्यं कुरुषे सितांशुमयशः किं नाम लोकत्रयी-
दीपस्याम्बुजबान्धवस्य जगतामीशोऽसि किं ब्रूमहे ॥

अत्राद्ये कविताररमणीगुणाभ्यामलसबालकहृदयोल्लासरूपगुणाभावो वर्णितः । द्वितीये परमेश्वरानङ्गीकरणदोषेण दिग्गजादीनां लघुतादिदोषाभावो वर्णितः ।

इति अवज्ञा ।

---

कारणानादरोऽवज्ञा द्वितीयार्धमिति । तत्र प्रचुरजलसम्बन्धरूपगुणस्य कारणस्य सत्त्वेऽपि जलाभाववर्णनादिति भावः । तृतीयेति । पद्मनिमीलनरूपदोषेऽपि अमृतद्युतेः हानिरूपदोषाभावप्रदर्शनादिति भावः ।

मदुक्तिरिति । सुधीभूय सुधाभूत्वा । सुधिय इति द्वितीयान्तम् । अस्याः मदुक्तेः । अलसोऽत्र मूढः । किं नाम स्यादित्यन्वयः ।

त्वं चेदिति । सञ्चरसे । 'समस्तृतीयायुक्तात्' । इति तङ् । मूर्धन्यं शिरोनिष्ठं सितांशुं चन्द्रम् । द्वितीय इति । यद्यप्याद्य एव अलसपुरुषकुमारानाह्लादादिदोषेण कवितारमण्योः हान्यभावो वर्णितः । तदेवाद्यप्युदाहरणम् । तथाऽपि तस्यास्पष्टत्वादुदाहरणान्तरं दर्शितम् ।

इति अवज्ञा ।

# पञ्चविंशोऽधिकारः ॥

## पिशाचनृत्तम् ।

पेरुन्देव्यम्बा कोमला च श्यामार्यसमेते स्वकीयमभिनवं प्रासादमागते अभवताम् । सर्वतः नारिकेलैः क्रमुकैः आम्रैः पनसैः मातुलुङ्गैश्च वृक्षैः पुष्पभाजनैः, वापीभिः, सैकतैः अच्छशिलावेदिकाभिः, चम्पकलतासमग्राभिः पर्णशालाभिः, चतुष्कैः, विहरणस्थानैः मण्डपैः शालाभिश्च समृद्धे उत्तमे तस्मिन् प्रासादे पदनिधानमात्रेण ते स्वकीयां प्राचीनां स्थितिमत्यन्तं विस्मृत्य सर्वदा प्रासाद एव प्रसूताभिवृद्धे इव, पुरापि महोन्नतायां स्थितौ स्थिते इव च परिणते अभवताम् । अतिरम्यस्य तस्य उपवनप्रासादस्य स्वयं स्वामिन्यौ संवृत्ते इति तयोरेव मनः मनागपि न विशश्वास । पेरुन्देवी कोमला च विक्रयशासनं पुनः पुनः अन्ववाचयताम् । प्रासादस्य एकैकमपि कोणमुपकोणं च अपरित्यज्य धावंधावं दृष्ट्वा, तदात्वे लब्धदृष्टिर्जात्यन्ध इव जगत् अतिविस्मयेन दृष्ट्वा दृष्ट्वा महानन्दं प्राप्य विस्मृताहारनिद्रे स्वर्गलोकं तदानीमेव प्रविष्टे इव अदृश्येताम् । मांसपर्वताकारा पेरुन्देवी मृगशाबक इव पुष्पकुञ्जानामन्तः सैकतेषु च धावन्ती उत्प्लवमाना च विजहार । तयोर्वयोऽपि दशभिर्वर्षैर्न्यूनीभूतमिव अभात् । तत्र आगमनात् परं द्वित्रदिनावधि बुभुक्षैव तयोर्नाभवत् । दिवानिशं कुञ्जेषु सञ्चारे, सौधस्थानि विद्युत्सारव्यजनानि भ्रमयित्वा अधः कुथासनेषु सोल्लासं साचि स्थित्वा कथालापे च ते स्वकीयं सर्वं कालमनयताम् । दृश्येषु स्थलेषु सर्वतो घटितान् विद्युद्दीपान् दिवापि प्रज्वल्य विनोदमन्वभवताम् । अन्तः चारु निवेशितेषु खट्वाकुथासनोत्पीठिकाचतुष्पदीप्रभृतिषु उपविश्योपविश्य ते सुखानुभवमकुरुताम् । श्यामार्योऽपि कानिचिदहानि स्वगृहमगतः ताभ्यां सह वसन् तयोरेकं क्रीडनकं भवन् सोल्लासं कालं गमयमास । बहिः ताभ्यां सह सानन्दं

विहरन्नपि सः तस्मिन् प्रासादे अङ्गारेष्विव स्थितः व्यथते स्म । अन्ते मिथ्यापत्रं सज्जीकृत्य समर्पयन् सः तयोः सकाशात् अपरमेकं रूप्यसहस्रं अपजहार कथमिति चेत्; स्वनाम्ना क्रयणे प्रासादः ९५०० रूप्यैः लभ्येतेति पूर्वमेव स कथितवानासीत् । स इदानीं यतः पेरुन्देवीनाम्ना क्रीतः ततः नाविकस्तुरुष्कः अधिकं अपरं सहस्रमपेक्षत इत्यभिधाय मेनकापेटिका-स्थेषु भूषणेषु कतिचित् विक्रीय उपरि सहस्रं रूप्याणि गृहीत्वा पत्रं १०५०० रूप्याणां लेखयामास । नाविकतुरुष्कवेषं धृतवतः तुरुष्कस्य तस्मादेव अर्थात् सम्मानमकरोत् । अपि च तस्य प्रासादस्य भाटकहेतोः पञ्चाशच्छतं रूप्याणि गूढं नागपट्टणाय धनादेशेन प्रेषयामास । अवशिष्टं अर्थं स्वकीयव्ययाय भद्रं रक्षितवान् । वराहस्वामिनमानीय कुम्भघोणवरदाचार्यपुत्रीं तस्मै विवाह्य अनन्तरदिन एव क्वापि पलायितव्यमिति मत्वा आर्यः दिनानि गणयन्नास्त । स्वेन मेनकाया विक्रयणं एकस्यामेव रात्रौ अयुतस्य रूप्याणामपहारः, अयोधने कृत्स्नां रात्रिं नरकवेदनानुभवः दिव्यरम्भाभासुरायाः गणिकायाः कमलाया लम्भकस्य स्वभाग्यस्य विघातसम्भवः ततः स्वस्य जातः मिथ्यापत्रकल्पनप्रसङ्गश्च क्रमेण तस्य मनसि प्रतिभाय यद्यपि तं निरन्तरं व्यथयन्ति स्म तथापि तानि बहिः मनागप्यप्रकाशयन् ताभ्यां सह स्थितः नाट्यकारिणीनां वारवनितानां पश्चात् उपगायन् तालकारी नर्तक इव नाटयन्नवर्तत । पेरुन्देवी कोमला इत्याभ्यामुभाभ्यां 'चन्द्रिकाक्रीडा' 'छायाक्रीडा' निलीय ग्रहणम्' इत्येवमादीः क्रीडा अवर्तयत् । पेरुन्देव्यम्बा सर्वथा आत्मानं विस्मृत्य अनुपरतवाक् 'जावलि' गानानि उपादायोपादाय चण्डमारुतवत् वीजयन्त्येव आस्त । कोमला स्वस्य नालिकेरवृक्षारोहणे अस्ति परिचय इति अनुष्ठानेन प्रत्यक्षमुभयोः दर्शयित्वा भुजमास्फालयत् । स्वयमेव लोके महत्याविति स्वबुद्धिमत्तया महत् तन्त्रं कृत्वा एकनिमेषमात्रेण अतीव आढ्ये संवृत्ते इति च मन्यमाने ते द्वे अपारमात्मगौरवमभावयताम् ।

तावद् विशाले प्रासादे पृथक् स्वमात्रवासे नास्ति सुखमिति मत्वा

श्यामार्यमपि तत्पत्न्या सह तत्र आगत्य अभाटकं निवासाय अन्वमन्येताम्।

तेषां तत्र प्रवेशानन्तरं चतुर्षु दिनेषु मुहूर्तदिनमेकमासीत् । वरदाचार्यप्रभृतीनानाय्य तस्मिन् दिने "निश्चयः" कार्य इति, ततस्तृतीयदिने तिरुपतिस्थले कल्याणं निर्वर्तनीयमिति च ते निश्चयमकुर्वन् । तदर्थं सद्यः वराहस्वामी वैद्यशालात आनेय इति मन्यमानौ श्यामार्यः पेरुन्देवी च दिनद्वयात् पूर्वमेव भिषजं प्राप्य प्रार्थयतां । समुद्रतीरप्रान्ते प्रासादं क्रीतवन्तः स्म इति, तत्र वाता समीचीनवातेन वराहस्वामी प्रासादे शीघ्रं स्वास्थ्यं प्रतिलभेतेति च न्यवेदयताम् । वराहस्वामिनो जानुव्रणस्य तदानीमपि अशुष्कत्वात्, तद्देहस्य रक्तरिक्ततया तदात्वेऽपि तस्य दुर्बलावस्थत्वाच्च नक्तन्दिवं तेन सह तिष्ठन्त्या हूणधात्र्या क्रियमाणं औषधदानं आवश्यकमासीत् । तस्मात् भिषक् तस्य प्रेषणं प्रत्याचष्ट । तावति अमुञ्चन्तौ इमौ उपरि निर्बन्धमकुरुताम् । परेद्युः वराहस्वामिनः पितुः श्राद्धमिति, तदर्थं तेन आगतेनैव भाव्यमिति च सद्यः अनृतमभाषेताम् । वराहस्वामिनः पूर्णस्वास्थ्यप्रतिलम्भावधि सा धात्री हूणकन्या स्वप्रासादे तेनैव सह वर्ततामिति तदर्थमपेक्षितं व्ययं स्वयमेव भरिष्याम इति अभ्युपागच्छताम् । हूणश्च तदङ्गीचकार । पेरुन्देवी कोमला श्यामार्यः एषां त्रयाणां प्रासादप्रवेशदिनात् चतुर्थमेव दिनं वराहस्वामिन आनयनाय निर्दिष्टः कालः । तस्मिन्नेव दिने दिवा श्यामार्यस्य महदातिथ्यं वृत्तम् ।

तदा ते त्रयः उदरपूरं भुक्त्वा कुथासनेषु सोल्लासमुपविष्टा आसन् । विद्युद्व्यजनानि भ्रमन्ति 'जिल् जिल्' इति शिशिरं समुद्रवातं विसार्य तान् परवशयन् आसत । तदानीं पेरुन्देव्यम्बा श्यामार्यमभिवीक्ष्य 'इयतः महाप्रासादस्य स्थितस्य मोटारं एकं यदि न स्यात् गौरवं न स्यात् । अरे श्याम, गच्छतु यदि गच्छेत् । सम्बन्धि-अय्यङ्गार्-अनेन दास्यमानेषु अयुते रूप्येषु पञ्चभिः सहस्रैः मोटारं क्रीणीयाम । अत्रैव त्वं

समीचीनं शकटमुद्धृत्य निधेहि। विवाहं निर्वर्त्य अस्माकं तिरुपतिक्षेत्रादागमनसमनन्तरं मोटारशकटेनाप्यागतेन भाव्यम् । असमत्सञ्चारकालातिरिक्तसमयेषु वराहस्वामी पङ्कजवल्ली च प्रयाणं कृत्वा सुख्यतु । तस्याः पित्रा दत्तेन वित्तेन क्रीतं शकटं सैव प्रथममनुभवितुमर्हति' इत्यब्रवीत् ।

कोमला— ननु अक्क, एकं हि कार्यं वयं करवाम । अस्माकं बाष्पशकटादवरोहणानुपदमेव वधूवरौ अस्मन्मोटार एव निवेश्य क्षुद्रमेळः महामेळः सङ्गवाद्यं बाणविनोदः इत्येवमादिभिः पुरप्रदक्षिणमानयेम चेत् कियद्रमणीयं भवेत । ननु तथा करवाम ।

पेरुन्देवी— (हर्षेणोत्प्लुत्य) आमरे श्याम, तथा कुर्याम । सम्बन्धि-अय्यङ्गार् निश्चयताम्बूलावसरे इहैव वित्तं किं न दद्यात् ?

श्यामार्यः— स महान् लक्षाधिपतिः । यस्मिन् कस्मिंश्चिदपि क्षणे तस्मिन् विंशतिसहस्री त्रिंशत्सहस्रीति वित्तं करस्थमेव भवेत् । अपि तु स मुहूर्तसमय एव वित्तं 'सम्भाव्य' दद्यात् । स एव क्रमः । ततः पूर्वमपेक्षणं मर्यादाहानिकरम् । ते अस्मासु निहीनबुद्धिं कुर्युः । परं तु वयं एकं कर्म करवाम । अस्माकं एको मोटारशकटोऽपेक्षित इति व्यापारिसङ्घाय आदेशमद्यैव दद्याम। अस्मदागमनदिने तं धूमशकटस्थानक एव आनीय समर्प्य वित्तं गृह्णीतेति तेभ्यो विलिख्य संविधानं कुर्याम । पूर्ववित्तापेक्षायां शतं पञ्चाशतं दत्तवन्तो भवेम ।

पेरुन्देवी— साऽपि समीचीना आलोचना । सम्बन्धि-अय्यङ्गार् जातु वित्तानयनात् प्रमाद्येच्चेत् अस्माभिर्दीयमानं वित्तं किं गतं स्यात् ?

श्यामार्यः— सम्यक् साधु भाषितम् । कुतः सः वित्तरहित आगच्छेत् ? सूर्यस्य दक्षिणोत्तरगमनेऽपि स उक्तां वाचं नातिक्रामेत् । स किं अस्मद्वत् नित्यदरिद्रः ? (नेत्रे चिपिटयित्वा सस्मितं) अपि तु इतः परं मया नित्यदरिद्रे इति भवत्यौ न भाषितव्ये । भवत्यौ अतीव आढ्ये संपन्ने । 'स किं मद्वत् नित्यदरिद्रः' इत्येव वक्तुं युक्तम् । पेरुन्देव्या मोटारे क्रीते दिनेदिने सञ्चार एव । स्वयं अनुजा वधूरिति पुरं 'द्वेधा' कृत्वा आगमिष्यति । किं नु सा ततः परं हस्तेन ग्रहीतुं

अधिकोन्नतैरपि सुदारुणान्वितै-
रसकृद्भ्रमत्पशुगणांघ्रिपीडितैः ।
विधिसिद्धनैकगुणसस्यसम्पदां
विरसैः स्वभावकठिनैरलं खलैः ॥ ११ ॥

तदेवं खलानां सर्वप्रकारपरिहरणं विधाय स्वस्य तैः घनादिबहुलैः कदाचिदुपकारादिसंभवाद्याशङ्कायां तदर्थं तत्कालमात्रसंसर्गे को दोष इत्याशङ्क्य तादृशोपकारसंबन्ध एव मास्तु । क्षणमात्रमपि दुष्टसंबन्धे पश्चान्महाननर्थ एव भवेदित्याह (अधिकेति) । अधिकमुन्नतैरपि घनविद्यादिबहुलैरपि सुदारुणेन अत्यन्तक्रूरकर्मणा क्रूरजनेन वा अन्वितैः अनुसृतैः । स्वयं क्रूरत्वात् क्रूरजनसङ्गाच्च धनविद्यादिकमप्रयोजकं विपरीतावहं चेति भावः । असकृत् भ्रमन्तः स्वपार्श्वे पर्यटन्तः ये पशुगणाः मूढजनसङ्घाः तैः स्वभृत्यशिष्यादिरूपैः अङ्घ्रौ पादे पीडितैः आश्रितैः तेषां स्वपादपतनमनुभवद्भिरित्यर्थः । विरसैः सदा कलहप्रियत्वेन 'परस्परतिरस्कृतिं परिचिनोति वैरायितम्' इत्युक्तरीत्या ऐकरस्यानुभवविरोधिभिः तत्र हेतुः (स्वभावकठिनैरिति) । 'स्वभावो दुरतिक्रम' इति भगवता गीतत्वात् कदाप्यपरित्याज्यकाठिनभावैरित्यर्थः । स्वस्य भावे हृदये काठिनैरिति वा । केचिद्वाचा मृदुळं जल्पन्तोऽप्यविश्वसनीया इति भावः । उक्तं हि— 'स्वभावकठिनस्यास्य कृत्रिमां बिभ्रतो नतिम् । गुणोऽपि परहिंसायै चापस्य च खलस्य च ॥' इति । खलैः दुर्जनैः, अलं पर्याप्तं तत्सम्बन्ध एव मास्त्वित्यर्थः । कथञ्चित्तैः स्वस्योपकारसम्भवे किं कर्तव्यमित्यत्राह (विधीति) । विधिना दैववशात् अदृष्टवशाद्वा सिद्धाः स्वयं प्राप्ताः नैकगुणाः अनेकप्रकाराः सस्यसम्पदः धान्यादिसम्पदः येषां तेषां तथा च यत्किञ्चित्कृष्यादिकमाश्रित्य कर्षणादिव्यापार एव श्रेयान् खलमुखदर्शनादित्यर्थः । तथाह्युक्तं केनचित् कविना अनवरतराजसेवापरिश्रान्तेन, यद्वा विधिसिद्धाः नैके ये गुणाः आत्मगुणाः तद्रूपास्सस्यसम्पदः धान्यसम्पदः येषामिति । तथा च 'आत्माराम आत्मर-

तिराम्रक्रीड' इत्युक्तस्वानुभवैकप्रधानानां अन्यजनसंसर्गलभ्यं किमपि वस्तु नास्तीत्यर्थः । अथवा सस्यसम्पत् आमिति पदच्छेदः भगवत्कटाक्षसिद्धगुणसम्पदेवालमित्यर्थः । तत्सत्त्वे हि 'अभिलाषितदुरापा ये पुरा कामभोगा जलधिमिव जलौघास्ते विशन्ति स्वयं नः ।' इत्युक्तनीत्या सर्वेऽपि पुमर्थाः स्वयमागच्छन्ति न तदर्थं खलादिमुखमवलोकितव्यमिति भावः ।

अन्योऽपि सस्यमर्दनस्थानपरः । विधिसिद्धाः नैकगुणाः बहुविधाः सस्यसम्पदः व्रीहियवादिधान्यस्तम्बाः येषां तेषां पुरुषाणां तादृशधान्यपृथक्कारणार्थम् अनेकानि खलान्यपेक्षणीयानि । व्रीह्याद्यवघट्टनस्थाने खलं घूर्ने स्वयं त्रिष्वितिरत्नमाला । अतस्तैरलं पर्याप्तम् । बहुवचनात् बहुत्वावगमः तानि चाधिकोन्नतानि सस्यादिस्थानापेक्षयात्युन्नतप्रदेशस्थानि सुदारुणा तन्मध्यस्थेन स्थूलतरमेधिदण्डेन अन्वितानि संयुक्तानि असकृत् भ्रमन्तः पलालसंश्लिष्टधान्यलेशविश्लेषणार्थं तदुपरि परिभ्राम्यन्तः ये पशुगणाः वृषभसङ्घाः तेषामङ्घ्रिभिः पीडितानि विमर्दितानि च, विरसानि दृढकुट्टिमरूपतया आर्द्रतारहितानि अत एव स्वभावतः कठिनस्पर्शानि च तथाविधैः खलाख्यस्थानैः अलं पर्याप्तमित्यन्वयः । तदपेक्षावश्यकीति भावः ।

एवं कृतघ्नोपाख्यानगतगौतमाख्यखलविशेषपरतयापि बोधो दृष्टान्तार्थमादरणीयः । तद्वृत्तान्तश्च कथितः पूर्वमेधान् दहन्तीति श्लोके । तदयमर्थः । अधिकं ब्राह्मण्यादिजात्या उत्कृष्टैरपि सुदारुणेन अतिभयङ्करेण प्रत्यहं चक्राङ्गादिपक्षिगणमर्दनतद्भक्षणादिकृत्येनान्वितैः असकृद्भ्रमद्भिः महारण्येषु पर्यटद्भिः तत्रस्थानां पशुगणानां दुष्टमृगाणां अङ्घ्रिणा पादेन करस्थानीयेन पीडितैः, नखादिभिः विक्षताङ्गैः । व्याघ्रादीनां करावपि पुरोवर्तिनौ पादव्यपदेशभाजावेव, 'चतुष्पादः पशव' इत्युक्तेरिति भावः । विरसैः— विषु पक्षिषु रसः-प्रीतिः येषां तैः । सर्वदा पक्षिमांसैकलोलुपैः स्वभावकठिनैः । महारण्यपरिभ्रमणात् परिश्रान्तस्य घनदोहाळिनस्समुचितभक्ष्यभोज्यादिजातं मुक्तावज्रमाणिक्यादिकूटञ्च समर्प्य शीतबाधापरिहारार्थं अङ्गारराशिं

च यथेष्टमुद्दीप्य तत्स्वापसमये स्वयमतिजागरूकतया निरीक्ष्य पुनश्च तत्प्रबोधानन्तरं स्वयं क्षणसुप्तं बकराजं नाळीजङ्घाख्यमनेकधा स्वपरित्रायिणं पाथेयार्थं निहत्याग्नौ प्रदीप्ते प्रक्षिपतो महाकृतघ्नस्य किमिति वक्तव्यं भावकाठिन्यमनन्यसामान्यमिति भावः । तादृशैः खलैरलं तत्स्मरणमपि महापातकापादकमिति यावत् । केषां विधिसिद्धैः नैकैः अनेकविधैः आत्मगुणैः परिपूर्णानां नाळीजङ्घादीनाम् । तमपि कृतघ्नं पुनरपि जीवितः बकस्समरक्षदितोऽप्यधिकधनादिदानेनेति शान्तिपर्वणि कथाश्रवणादिति भावः ।

एवं खरारुद्राग्निरासभा इति कोशवशात् रुद्रादिपरोऽपि कश्चिदर्थः, रलयोरभेदात् खलाः रुद्राः । बहुवचनम् तदवतारभेदप्रदर्शकम् । तैरलं तदाश्रयणादिकं माभूत् । केषां भगवत्कटाक्षसिद्धात्मगुणादिफलसमृद्धानां सस्यं फलम् । वृक्षादीनां फलं सस्यमित्यमरः । सात्विकशिरोमणीनां तामसदेवताश्रयणं निष्फलमेवेति भावः । कीदृशैः अधिकोन्नतैः त्रिमूर्तिघटकतया अत्यन्तमुत्कृष्टैः अधिकं शिरसि उन्नतैः पञ्चाननतया शिरोधिकैरिति वा । सुदारुणैः भूतगणैः अनुसृतैः भूतपतित्वात् । असकृत् भ्रमन्तः ये पशुगणाः चतुष्पाज्जन्तवः तैः अंघ्रौ पीडिताः समाश्रिताः । 'अहमेव पशूनामधिपतिरसानि' इति वरप्रदानलब्धपशुगणाधिपत्याः इति यावत् । तादृशैः विरसैः संहाराधिकृतत्वेन 'राक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारि' इति न्यायेनाविश्वसनीयैः । स्वभावं भवस्येदं भावं तस्येदमित्यण् । स्वस्य यद्भावं रौद्रं कर्म तेन कठिनैः । तच्चोक्तं श्रुतिषु— 'रुद्रा वै घातुकाः, रुद्रो वै क्रूरः, रुद्र एव भूत्वाग्निरनूत्थाय हन्यात् । स ईश्वरो रुद्रो भूत्वा प्रजां पशून् यजमानस्य शमयितोः । नमस्ते रुद्र मा माहिंसीः' इत्यादिषु । एतादृशैः खैरः रुद्रैरलम् ।

एवं पर्वतपरोऽप्यर्थः । अधिकोन्नतैः अत्यन्तमुच्चतरैः । अनेन दुरारोहता द्योतिता । अपिस्समुच्चये । सुदारुणैः अतिक्रूरैः, व्याघ्रादिभिः अन्वितैः, अनेन भयस्थानत्वमुक्तम् । असकृद्भ्रमन्तः आहारार्थं सञ्च-

रन्तः ये पशुगणाः धेन्वजादयः । तेषामङ्घ्रिभिः पीडितैः पाषाणादिभेदना-द्दुर्गीभूतैः । अनेन विषमसञ्चारतोक्ता । विरसैः कूपतटाकादिजलाधाररहितैः । अनेन तृष्णादिशमनाभाव उक्तः । स्वभावकठिनैः पाषाणमयत्वात् कठिनस्प र्शैः खरैः एवंविधक्रौर्यशालिभिः पर्वतैरलं पर्वतमारुह्य जीवनेनालं पर्वताग्रे जीवनं महते क्लेशाय । तच्च मास्तु । केषां विधिसिद्धाः दैवतः प्राप्ताः, अनेकप्रकाराः याःसस्यसंपदः भूप्रदेशस्थसस्यसमृद्धयो येषां तेषां समप्रदेशवर्ति-सस्यवतां पुंसां विषमप्रदेशेषु सस्यादिनिष्पादनेन जीवनं अनावश्यकमेवेति भावः । श्रूयते हि—'अनसावहन्त्यपचितिमेवास्मिन् दधाति । तस्मादनोवा-ह्यᳶ समे जीवनं यत्र खलु वा एतᳶ शीर्ष्णा हरन्ति तस्माच्छीर्षहार्यं गिरौ जीवनम्' इति । सोमलतारूपं राजानं शकटेनानयेयुः । तदा तस्मिन् पूजा कृता भवति । अत एव समप्रदेशे जीवनं शकटवाह्यं धान्याद्यानयन-सौकर्यात् । शीर्षेण सोमलतां वहति चेत् गिरौ जीवनमिवापत्प्रदं, । गिरौ भूमिगतपदार्थानयनस्य भूमौ गिरिपदार्थानयनस्य च शीर्षेणैव वाह्यत्वात्, अतश्च समजीवनशालिनां गिरिजीवनं महाक्लेशायेति भावः ।

एवमेव श्रीमद्धस्तिशैलवृषशैलयदुगिरिप्रभृतिपरतयापि बोधः । क्वचित् भगवत्सेवार्थं पर्वतारोहणमपि श्रेयस्करमेवेत्याह (अधिकेति) । अधि-कोन्नतैरपि आरोहणसौकर्यहीनैरपि सुदारुणा भगवद्रूपेण कल्पवृक्षेण अन्वितैः 'द्विरदशिखरिसीम्ना सन्नवान् पद्मयोनेः कलशजलधिकन्यावल्लरी-कल्पशाखी' । 'भद्रायास्तु मुकुन्दकल्पविटपी शेषाद्रिसङ्गी स न' इति तत्र तत्रोक्तेः । असकृत् भ्रमतां भगवत्सेवार्थमारोहतां पशुगणानां 'पशवः पाशिताः पूर्वं परमेण स्वलीलया । तेनैव मोचनीयास्ते नान्यैर्मोचयितुं क्षमाः ॥' इत्युक्तानां जीवात्मसङ्घानां अङ्घ्रिभिः पीडितैः असकृदारोहणात् विमर्दितैः विरसैः । विः पक्षिपरमात्मनोरिति भट्टबाणवचनात् विशब्दः परमात्मवाची, तेन रसः प्रीतिः येषु तैः, भगवत्सम्बन्धवशात् प्रीतिविषयीभूतैः, स्वभाव-कठिनैः पर्वतैः अलं प्रयासं तादृशपर्वतारोहणमप्यवश्यकर्तव्यं, केषां, विधिना

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २२] कलि ५०४९ सर्वधारि { मकर } साधारण सं २
{ कुम्भ } शास्त्रानुबन्ध सं ३
आहत्य ,, ६

## राज्यतन्त्रम् ॥

शान्ते घोरयुद्धे क्रमेण जनानामाहारक्लेशो निवर्तिष्यत इति प्रायः सर्वेषां मतिरासीत् । धान्यविभजनमपि पर्यत्यजन् । सोऽस्माकं मनोरथोऽत्यन्तं निहतः । पुनरिदानीं धान्यविभजनं प्रवर्तते । कदा अस्य अन्तः ? कदा पूर्ववत् यावदपेक्षं भोजनं सुलभम्, न कोऽपि वक्तुं शक्नोति । न कोऽपि जानाति ।

देवो न वर्षति । क्वचिदल्पम् ; क्वचिदत्यल्पम् क्वचित् तदपि न । अल्पवर्षपातसमनन्तरमेव क्षेत्राणि कृष्ट्वा स्थितं बीजं वपन्ति । पुनर्वर्षाभावेन जलाधाराणां अचिरादेव शोषेण च अङ्कुरमात्रावस्थानि किञ्चिद्वृद्धानि च सस्यानि शुष्यन्ति । हस्ते स्थितं बीजं नष्टम् । कर्षणाय, दोहदाय, रोपणाय, तृणापचयाय च ऋणं कृत्वा विनियुक्तं वित्तं नष्टम् । ऋणं प्रतिदेयम् । चतुष्पदां स्वकुटुम्बस्य च पोषणं कर्तव्यम् । कथमेतन्निर्वर्तताम् ।

राज्यभृतः कूपखननाय जनान् वित्तवितरणेन प्रोत्साहयन्ति । सन्निहिते काले केषुचन मण्डलेषु सहस्रशः कूपाः खाताः । अपि तु दीर्घाग्रहे अगाधखातेष्वपि कूपेषु कियज्जलं लभ्येत । दिने दिने जलोत्सेधः अधोऽधो गच्छति ।

महानदीभ्यः सारणीः प्रवर्तयितुं बहुधा उद्देशान् कुर्वन्ति । समग्रवृष्ट्यभावे महानदीनामपि स्थितिः कीदृशी भवेत् ।

अनेन प्रकारेण कालो यदि गच्छति लोकस्य आयतिः कथं भविष्यतीति चिन्तयतः

वेपथुश्च शरीरे मे रोमहर्षश्च जायते।

सर्वे सम्प्रति महाबुद्धिमन्तः। मतश्रद्धाभरितमप्यात्मानं घोरयन्ति। न तु कश्चित् सुस्फुटामपि वस्तुस्थितिं पश्यति। कूपाश्च नद्यश्च अन्ये च जलाधाराः वृष्ट्या सम्पन्नस्य जलस्य वहनमेव कुर्वन्ति। न स्वयं जलस्योत्पत्तिम्। अत इमे अन्नस्य न मुख्यं कारणम्। पर्जन्यस्तु तथा। अत एव हि भगवता गीयते 'पर्जन्यादन्नसम्भवः' इति। एतेन इदं सिद्धं यत् अन्नकामैः पर्जन्योद्भवे यत्नः कार्य इति।

अथ कथं पर्जन्यस्योद्भवः? तदप्यगायि भगवता—'यज्ञाद्भवति पर्जन्यः' इति। वेदेषु अतिमहता विस्तरेण यज्ञविधानस्य प्रयोजनमद्य याथातथ्येन सर्वेषां सुग्रहम्। न चास्ति सम्प्रति यज्ञानुष्ठानम्। तेन पर्जन्येऽस्मान् वञ्चयति अन्नाय हाहाकारः परितः प्रवर्तत इति किमत्र चित्रम्।

लोकक्षेमकामैः यथाविधि यज्ञानुष्ठानं यथा सर्वतः सम्पद्येत तथा तीव्र उद्यम आस्थेयः। अन्यथा

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥

इति भगवता कृतस्योपालम्भस्य नियतं भाजनं भवेम।

---

# दिनचर्या॥

अस्मद्गृहमागतः कश्चन मान्यः पुरुषः। प्रत्यूषे विंशतिकलाधिकासु चतसृषु घण्टासु कोऽपि शकटः प्रतिष्ठते। तेन सः स्वस्थानं गन्तुमैच्छत्। एकघण्टातः पूर्वं अस्मद्गृहवासिनं कञ्चन विद्यार्थिनं प्रबोध्य द्वितीयकक्ष्याचीटीक्रयणाय स्थानकं प्रति प्रैषयम्। ततः अर्धाधिकघण्टायामतीतायां मान्येन तेन सह स्थानकमगच्छम्।

प्रेषितो बालः उच्चकक्ष्याचीटीक्रयणस्थले तृतीयकक्ष्याचीटीक्रयणस्थल इव बहूनां पृष्ठतः तिष्ठन्नासीत्। 'अत्रापि किं श्रेणिबन्धेन स्थातव्यं

भवति' इति मनाक् विस्मितः पञ्चषान् निमेषान् तूष्णीमतिष्ठम्। बालस्तथैव तिष्ठति। 'किमरे अत्रत्यास्सर्वे द्वितीयकक्ष्याचीटीग्राहिणः' इत्यपृच्छम्। 'आम्' इत्याह। पालकभटोऽपि कश्चित् तत्र अवर्तत।

अनुद्दण्डशीलतया सम्मर्देन सद्वान्तःप्रवेशमनिच्छन् बालस्य हस्तात् रूप्याण्यादाय स्थानकस्यान्तः प्राविशं— द्वारेण चीटीगृहस्याभ्यन्तरं गत्वा चीटीं क्रेतुकामः। तत्र तु कवाटं पिहितं अन्तर्देशाग्लमासीत्। पुनर्बहिरागच्छम्। तत्रत्यानां जनानां हस्ते तृतीयकक्ष्याचीटीमेव अपश्यम्। अगत्या किञ्चिदुद्दण्डतामवलम्ब्य सम्मर्देन गवाक्षं समेत्य चीटीविक्रयिणं प्रति शब्दमकरवम्—किमार्य, द्वितीयकक्ष्याचीट्यपेक्षिणो वयमवतिष्ठामहे। अन्येभ्य इह चीटी दीयत इति। 'भवद्भ्य एव प्रथमं देया। को नेत्याह। कुत्र गन्तव्यम्। दत्त रूप्यम्' इति वदन् सः सपदि चीटीमदात्।

मन्ये अत्र वस्तुस्थितेरवगमे वाचकानां न क्लेशो भविष्यति। एवंविधमन्याय्यं प्रवर्तमानं जानन्तोऽपि वयं तूष्णीं वर्तामहे किमपि कर्तुमशक्ताः।

---

# धैर्यम् ॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani.)

श्रीमहाभारते महाप्रस्थानिकपर्वणि प्रथमद्वितीयाध्याययोः कथाया अयं संग्रहः—

युधिष्ठिरो यदुकुलक्षयं भगवतः कृष्णस्य परमपदावाप्तिं समुद्रे द्वारकाया मज्जनं 'पाण्डवानां स्वर्गतिमुद्दिश्य प्रस्थानस्यायं काल' इति भगवतो व्यासस्य वचनं च अर्जुनेन ज्ञापितः, राज्यविषये मृतबन्धुविषये च कर्तव्यं सर्वं कृतवान्, पौरजानपदजनैः कथंचिदनुमतः, क्षेत्रं क्रीतवता सह क्षेत्रस्यायतनस्वामिभूतपूर्वस्वामिनोः तद्देशभूपस्य च धनेच्छया युगपत् विवादं दृष्टवता सहदेवेन कलियुगप्रवृत्तिं धर्मनाशादिकं चावेदितो दुर्मनाः मम जीवनं पर्याप्तमिति मत्वा आभरणान्यपास्य वल्कलान्यधारयत।

तदाशयविदो भ्रातरो द्रौपदी च तथैव वल्कलान्यधारयन् । ते पाण्डवाः अन्त्येष्टिमनुष्ठाय आत्मनि अग्नीन् समारोप्य तानप्सु विसृज्य द्यूतजयकाल इव द्रौपदीषष्ठाः हस्तिनापुरात् प्रातिष्ठन्त । तान् कश्चित् श्वा अनुययौ । सर्वे पौराः अन्तःपुरजनाश्च तमन्वगच्छन् । तत्र कश्चिदपि एनं निवर्तस्वेति भाषितुं नापारयत् । नगरवासिनः सर्वे नराः ततो न्यवर्तन्त । योगिनो महात्मानो धर्मपुत्रादयो द्रौपदी च कृतोपवासाः यथाक्रमं प्राङ्मुखाः प्रस्थिताः सन्तः अनुगच्छता शुना सह बहून् देशान् सरितस्सागरांश्च अभिगत्य क्रमेण उदयाचलप्रान्तस्थं सलिलार्णवं ययुः । तत्रागतेन शैलाकारेणाग्निना वरुणात् खेनाहृत्य दत्तं गाण्डीवं वरुणाय दत्वा गन्तव्यमित्यावेदितोऽर्जुनः गाण्डीवं अक्षय्ये महेषुधी च जले प्राक्षिपत् । ततस्ते दक्षिणामुखाः किंचिद्गत्वा समुद्रोत्तरतीरेणैव दक्षिणपश्चिमां दिशं गत्वा पश्चिमां दिशं पुनस्समागत्य सागरेण परिप्लुतां द्वारकां दृष्ट्वा पृथिव्याः प्रादक्षिण्यचिकीर्षया उदीचीं पुनरागत्य जग्मुः । दिक्त्रयप्रदक्षिणीकरणानन्तरं ते समाहितमनसो नियमयुक्ताश्च सन्तः तस्यां दिशि महागिरिं हिमवन्तं आलोक्य तमतिक्रम्य वालुकार्णवं महाशैलं मेरुं चावैक्षन्त । योगिषु सर्वेषु तेषु शीघ्रं गच्छत्सु सत्सु द्रौपदी ध्यानात्स्खलितमानसा महीतले निपपात । भीमसेनः तां प्रपतितां दृष्ट्वा धर्मराजमेवमन्वयुङ्क्त– 'राजपुत्र्या तया कश्चिदपि अधर्मः नाचरितः । तस्याः भुवि पतने कारणं ब्रूहि' इति । युधिष्ठिरो भीममित्थमवदत्– 'हे पुरुषसत्तम, अस्याः धनञ्जये विशेषेण महान् पक्षपातः । अत एषा तस्य तत्फलं अद्य भुङ्क्ते' इति । धर्मात्मा स एवमभिधाय स्वर्गान्तरायहेतुः स्नेहो मा भूदिति बुद्ध्या एनामनवेक्ष्य मनस्समाधायाव्रजत् । ततो विद्वान् सहदेवः महीतले न्यपतत् । पतितं तमपि दृष्ट्वा भीमो राजानमिदमपृच्छत्– 'यो माद्र्याः पुत्रः सहदेवः सर्वेष्वस्मासु शुश्रूषुरनहङ्कृतश्चाभवत्, स कस्मात् भुवि निपतितः' इति । युधिष्ठिरः तं इत्थं प्रत्यभाषत– 'विद्वानेष सहदेवः कञ्चिदप्यात्मनः सदृशं प्राज्ञं नामन्यत । तेन दोषेणायं पतितः' इति । स एवमभिधाय तं समुत्सृज्य तदा भ्रातृभिश्शुना च सह अयात् ।

बन्धुप्रियः शूरो नकुलः कृष्णायाः सहदेवस्य च निपतनमवलोक्य आर्तः सन् निपतति स्म । तस्मिन् चारुदर्शने नकुले निपतिते भीमः पुनरपि राजानमिदमब्रवीत्– 'अप्रतिहतधर्मा भ्राता वचनकारकः लोके रूपेणाप्रतिमश्च नकुलो भुवि पतितः' इति । भीमेन इत्थमुक्तो युधिष्ठिरस्त-

मेवं अवदत्— 'रूपेण मत्समः कश्चिदपि नास्तीति अहमेक एवाधिक इति चास्य मनस्यभिप्राय आसीत् । तस्मादयं पतितः । येन यत्कर्म कृतं स तत्फलमवश्यमनुभवेत् । त्वमागच्छ' इति । अर्जुनः प्रपतितान् तान् दृष्ट्वा शोकसंतप्तः पपात । शक्रतेजसि तस्मिन्पतिते म्रियमाणे सति भीमो राजानमित्थमकथयत्—'स्वैरेष्वपि महात्मनोऽस्य अनृतं न स्मरामि । केन हेतुनाऽयं पतितः' इति । युधिष्ठिरः तं प्रति एवमभाषत— 'अर्जुनः एकोऽहं शत्रून् निर्दहेयमित्याचष्ट । एष शूरमानी तन्न कृतवान् । अतोऽपतत् । अयं सर्वानपि धानुष्कानवमेने । भूतिमिच्छता यथा भाषितं तथैव कर्तव्यम्' इति । इत्युक्त्वा युधिष्ठिरोऽगच्छत् । अथ भीमो निपपात । पतितो भीमो धर्मराजमेवमगदत्— 'राजन्, अवेक्षस्व तव प्रियोऽहं पतितः यदि जानासि मत्पतने निमित्तं तत् ब्रूहि' इति । युधिष्ठिरस्तमेतदभणत्— 'भवता अतिभुक्तम् । परानवज्ञाय बलेनात्मानं श्लाघितवानसि तेन क्षितौ पतितोऽसि' इति । स एवमुक्त्वा तमनवलोकयन्जगाम । एकः श्वा तमन्वसरदिति । पञ्चानामपि पाण्डवानां पतित्वे समाने धनञ्जये द्रौपद्याः पक्षपातो दोषः । तत्रास्याः विशेषेण महान् पक्षपातस्तु सुतरां दोषः । सहदेवस्य स्ववैदुष्यानुसंधानमूलकं स्वोत्कर्षपरनिकर्षानुसंधानम् 'एतज्ज्ञानानुष्ठानवत्त्वानुसंधानमूलकानि स्वोत्कर्षपरनिकर्षानुसन्धानानि एषु निपतेयुरित्युपरि पिधानपूर्वकं कृतानि गर्तानि' इत्याचार्यसूक्तेः 'गुरोस्त्वङ्कारस्त्वस्तवश्च वधः' इति पूर्वोपन्यासे प्रदर्शितया रीत्या दोष एव । 'देहे चेत्प्रीतिमान् मूढो भविता नरकेऽपि सः' इति नरकतुल्यतया शरीरमुच्यते । नकुलस्य तद्गतरूपोत्कर्षानुसन्धानप्रयुक्तं स्वोत्कर्षपरनिकर्षानुसन्धानं पूर्ववद्दोष एव । शूरस्यार्जुनस्य प्रतिज्ञाहानिः धानुष्कावमाननरूपाहिंसा च दोष एव । पापहेतुत्वेन 'अत्याशनात्' इत्याद्युपनिषदा योगविरोधित्वेन गीताशास्त्रेण—

> उदरस्यार्धमन्नस्य तृतीयमुदकस्य तु ।
> वायोस्सञ्चरणार्थं तु चतुर्थमवशेषयेत् ॥

इति स्मृत्या च निषिद्धमतिभोजनमात्मवधतयोक्तमात्मश्लाघनं च भीमस्य दोष एव । युधिष्ठिरस्य भ्रातृषु वात्सल्यं द्रौपद्यामनुरागश्च भारते बहुषु स्थलेषु प्रत्यपाद्येताम् ।

एवं सत्यपि तेषां प्राणवियोगकालेऽपिताननवेक्ष्य गमनं तस्य विकारहेतौ सति निर्विकारचित्तत्वरूपं धैर्यमभिव्यनक्ति ।

---

# नाटककथासारः ॥

(T. Venkatacharya, B. O. L.)

(विद्धसालभञ्जिका)

III

पूर्वं मिथ्याविवाहे मेखलानाम्नी काचित् कल्पितकन्यायाः मातृस्थानमधितष्ठौ । सा राज्ञ्याः धात्रेयी—उपमातुः पुत्री । अलीकविवाहेन राज्ञ्या विप्रलब्धः चारायणः प्रतिप्रतारणेन देव्याः मेखलायाश्च व्रीडामापादयितुं संकल्पमकरोत् । तस्मिन् कार्ये राज्ञस्साहाय्यमपेक्षत । सोऽपि ऊरीचकार । राज्ञः निर्देशमनुसृत्य सखी काचित् एकदा रात्रौ मेखलायाः गमागममार्गे स्थितं कमपि वृक्षमधिरुह्य, तत्र सन्निहितायां मेखलायां 'आगामिन्यां पौर्णमास्यां तस्याः अवसानकालः' इत्यभिदधे । मेखला तु अशरीरिणी वाक् एवमभिधत्ते इति मत्वा भीतभीता जीवितलाभोपायं निर्देष्टुं तां सप्रश्रयमयाचत । तदा 'गान्धर्ववेदविचक्षणं ब्राह्मणं महता सत्कारेण अभिनन्द्य तज्जङ्घयोर्मध्यद्वारेण सञ्चरणे पुनर्जीवितलाभः' इति अशरीरिणीरूपेण स्थिता सखी समाधत्त । तेन किञ्चिदाश्वासिता मेखला निरगात् । इदं सर्वं चारायणस्य कृत्यं, राज्ञाप्यनुमतम् ।

कदाचित् राजसमीपे स्थितायां देव्यां मेखला तत्रागत्य स्ववृत्तान्तं तस्यै निवेद्य साश्रुपातं भृशमरोदीत् । सुहृत्कार्यनिर्वाहे कृतमती राजा 'गान्धर्ववेदविचक्षणः स्वाधीन एव चारायणोऽस्ति, अतो न रोदितव्यं' इति अभिधाय रुदतीं तां, विह्वलां देवीं च आश्वासयामास । मेखलायाः स्वसमीपावस्थानसमये तन्नयनार्थं आगतान् कालपुरुषानिव नाटयितुं कांश्चित् पुरुषान् चारायणः गूढं न्ययोजयत् । अथ सा पौर्णमासी उपस्थिता । चारायणः क्वचित् अन्तःपुरैकदेशे राज्ञा सह संलपन्नवर्तत । मेखलां पुरतः कृत्वा राज्ञी तत्रागच्छत् । 'देहि मे धालेयिकां भिक्षां' इति राज-

सुहृदं प्रार्थयत । मेखलापि तत्पादयोः पतित्वा शरणागतं आत्मानं रक्षितुं ययाचे । चारायणः 'सज्जोऽस्मि' इति वदन् तत्प्रार्थितमङ्गीचकार । रहसि तेन नियुक्ताः पुरुषाः तस्मिन् समये सन्निधाय मेखलां नेतुमागतान् यमभटान् आत्मनः प्रकटयाञ्चक्रुः । भयविह्वला सर्वं वास्तवं मन्वाना मेखला तस्य जङ्घयोरन्तरे प्रविवेश । तदवस्थायां तस्यां 'महाराज प्रेक्षस्व विलासिनीमन्मथरथाधिरूढं आत्मनः प्रियवयस्यं' इति प्रहृष्टान्तरङ्गश्चारायणः राजानमवादीत् । 'अलीकविवाहविडम्बितः क्रुद्धोऽहं इदं निरवर्तयम् । अद्य तुष्टं मे मनः । मम भार्यां प्रशस्तालंकरणभूषितां करिष्यामि' इति सास्फोटं मेखलां प्रति वदन् सत्यं प्रकाशयामास । तेन लज्जावनतवदने राज्ञी मेखला च 'किं एवं आचरणं ते युक्तं' इति सकोपं चारायणमपृच्छताम् । 'पूर्वं प्रवर्तितस्य अलीकविवाहस्य अयमेव युक्ततरः प्रतीकारः' इति स प्रत्यवादीत् । तत्र किमपि आचरितुमशक्नुवत्यौ देवीमेखले ततो निष्क्रान्ते ।

तदनु सुहृत्सहितो नरपतिः उद्यानवनं ययौ । अनङ्गपीडितः सन् मित्रसकाशे स्वप्रियामधिकृत्य आलापं प्रावर्तयत् । तत्सदृशीमेव अवस्थामनुभवन्ती मृगाङ्कावल्यपि सख्या सह तदेवोद्यानमाजगाम । तदवगम्य महीपतिः तस्याः विस्रम्भकथितानि श्रोतुकामः निगूढं व्यवहितस्तस्थौ । सा तु विटपान्तरिता मन्मथं विनिन्दन्ती राजानं मनसि कृत्वा तत्तद्बहु प्रालापीत् । 'अनङ्ग, अबलां मां पीडयन् न लज्जसे । जानीयां ते पौरुषं यदि तस्मिन्नपि जने एवं आरभटीचण्डो भवेः' इति मदनं निनिन्द । इदं निशम्य चारायणः 'अहो अनङ्गस्यापि आरभटी इति महाहासो मे' इति वदन् उच्चैर्जहास । तेन संभ्रान्ता मृगाङ्कावली राजानं तत्र सन्निहितं अवागच्छत् । लेखगर्भं किञ्चित् तालीदलसम्पुटं तदभिमुखं अपातयत् । तदादाय भूपतिः—

'विषये सोल्लेखं कतरदिह नाङ्गे तरुणिमा
तथापि प्रागल्भ्यं किमपि चतुरं लोचनयुगे ।
यदादत्ते दृश्यादखिलमपि भावव्यतिकरं'

इति लिखितं पादन्यूनं पद्यमवाचयत् । ततो माधवीमण्डपगतां तामुपसृत्य विरचिताञ्जलिः 'समदुःखसुखोऽयं जनः' इत्यात्मानं न्यवेदयत् । 'न हारलताविरहं अर्हत्येषा' इति कथयन् स्वकण्ठादवतार्य हारं तस्याः कण्ठदेशे व्यधत्त । तया सह संलापं प्रक्रममाणे राजनि तदेव मण्डपं द्रष्टुमागच्छन्तीं देवीं केनचित् निवेद्यमानामवेदीत् । तेन 'नूनं विघ्नवत्यः प्रार्थितार्थसिद्धयः' इत्याकलय्य अतृप्यन् महता क्लेशेन मृगाङ्कावलीं व्यसृजत् ।

---

# प्रभातचिन्ताः ॥

S. Krishna, M. A.

आनन्दमाप्नुह्यधुना मनस्त्वं, निशा प्रभाता प्रकृतिः प्रबुद्धा ।
व्याप्नोति कोऽपि प्रशमस्वभावो माधुर्यभावोऽद्य दिगन्तरेषु ॥ १ ॥

मन्दानिलो वाति विहङ्गमाश्च गायन्ति हर्षाच्छुभकव्यगीतीः ।
आनन्दसंवाहकनादकेन शब्दोऽप्ययं यौति हि विश्वभाजा ॥ २ ॥

पश्याधुना प्लावयते धरित्रीं हिरण्मयै रश्मिभिरेष भानुः ।
सोऽयं प्रकाशः खलु दिव्यकान्तेरतीन्द्रियाया स्फुरदंश एव ॥ ३ ॥

कच्चित्त्वयाऽऽनन्दरसोऽनुभूतः कच्चिच्छ्रुतस्ते प्रणवस्वनोऽयम् ।
दृष्टा हृदावर्जकभास्त्वया किं ? तर्हि त्वमद्यानुगृहीत एव ॥ ४ ॥

आनन्दवेगोऽयमनादिकालादनन्तकालं प्रवहन्नजस्रम्।
श्रद्धालुहृन्निर्वृतिवीचिमालोत्तरङ्गमुत्पन्नशमं करोति ॥ ५ ॥

न केवला मानुषधीः प्रगल्भा स्वप्नेऽपि विज्ञानममुं च वार्ताम्।
न शक्यते पल्वलभेककेन ज्ञातुं प्रभावः पृथुवारिराशेः ॥ ६ ॥

क्लृप्ता व्यवस्था हि नरस्य बुद्धेः सा तास्तरीतुं न कदापि दक्षा।
आश्चर्यरङ्गस्य तिरस्करिण्यो नोत्पाटनं नस्त्वनया प्रदिष्टम् ॥ ७ ॥

क्षुद्रः प्रभुस्तुच्छधनान्मदान्ध इवेयमुद्गच्छति नो मनीषा।
काञ्चिच्च लब्ध्वेक्षणशक्तिमेषा 'ज्ञास्यामि तत्सर्व'मिति प्रचष्टे ॥ ८ ॥

निकाममास्तां खलु भूततत्त्वगवेषणं शास्त्रपरीक्षणे च।
नास्या अतिक्रम्य तु देशकालौ निमित्तमप्युच्चलितुं प्रभावः। ॥ ९ ॥

'अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद्दिवेयुः।'
(ऋग्वेदे १. २४. १०.)
शक्नोषि चेदुत्तरमत्र देहि, क्व यान्ति ? तेषां कुत उद्भवश्च ? ॥

अनादिकालाद्धि मनुष्यलोके उद्भासनाज्ज्योतिष आरभन्त।
मनीषिणो वस्तुनिसर्गवीक्षामद्यापि नास्याः सजयं निवृत्ताः ॥ ११ ॥

यतो हि वाचो मनसा सहैता निवर्तमाना निगमा वदन्ति।
कथं नु तास्तं किल वर्णयेयुर्ऋते पदैश्चिन्तय 'नेति नेति' ? ॥

न खल्वनेनार्हति धीरवज्ञां राजेदियं तु स्वदमे स्वतन्त्रा।
राजेदसौ चाक्षरचिद्विलासो ज्योतिर्विशेषोऽखिलबुद्ध्यतीतः ॥ १३ ॥

---

षेक्स्पियर् कृतं

# यथाभिमतम् ॥

—o◇o—

द्वितीयं प्रेक्षणकम् । प्रासादस्यान्तर्गृहम् ।

ततः प्रविशति राजा, प्रभवः अनुचराश्च ।

राजा— किमिदं संभाव्यं यत् तान् न कोऽपि जानातीति । नैव तद् भवेत् । आस्थानस्थाः केचन खलाः तद्वेदिनः अनुमन्तारश्च भवन्ति ।

प्रथमः प्रभुः— न कमपि जनमहं शृणोमि, यस्तां दृष्टवान् । तत्परिचारिकाः तां शयनमधिशयानामपश्यन् । प्रत्यूषे च स्वामिन्या विरहितं शयनम् ।

द्वितीयः प्रभुः— महाराज, अत्रभवता मुहुरुपहसितः स विदूषकहतकोऽपि नष्टः ।

कुमार्याः धात्री हेस्पेरिसा वदति— सा किल उपशृणोति स्म अत्रभवतः पुत्रीं तत्पितृव्यपुत्रीं च, सिरालं चार्लेस्-इमं यः परिभवति स्म तस्य मल्लस्य अङ्गानि आभिरूप्यं च अतिमात्रं प्रशंसन्त्यौ । सा प्रत्येति यत्र क्वापि गतयोः तयोः सन्निधौ स युवा नियतं वर्तत इति ।

राजा— प्रेषयत कञ्चित् तस्य भ्रात्रे । आनयतात्र तं शूरम् । स चेन्न सन्निहितः तस्य भ्रातरं मत्सकाशमानयत । स उपलब्धव्य इति तमहमादेक्ष्यामि । त्वरितमिदं कुरुत । विद्रुतानामेषां दुर्बुद्धीनां प्रत्यानयनाय अन्वेषणप्रयत्नः कथमपि न मन्दीकर्तव्यः ।

—

तृतीयं प्रेक्षणकम् । आलिवर्-गृहस्याग्रे
प्रविशतः आलॅण्डो आडम् च, मिथः समागच्छन्तौ ।

आलॅण्डो— कस्तत्र ?

आडम्— किं कुमार प्रभो ? अयि मे उदार प्रभो । अयि मे मधुर प्रभो । अये आर्य-रोलन्द्-अस्य स्मृत्यनुवृत्तिकर, कुतः, केन कार्येण, इह त्वमागतोऽसि ? कुतस्त्वं गुणाढ्योऽसि । कुतस्त्वयि जनाः स्निह्यन्ति ? कुतस्त्वमुदारः बलवान् वीर्यवांश्चासि ? कुतस्त्वं तथा स्पृहयालुरभूः मानिनो राज्ञः सम्मानार्थिनं तं मल्लं जेतुम् ? भवत्प्रशंसा भवतः पूर्वं अतिवेगेन गृहमागमत् । प्रभो किमिदं न जानासि यत् केषाञ्चन विषये तदीया गुणसमृद्धयः शत्रुवदाचरन्ति । त्वदीया नान्यथा आचरन्ति । उदार प्रभो, तव गुणाः तवैव प्रशस्तरूपा द्रोहिणः । अहो कोऽयं लोकः यत्र यद् अभिरूपं तदेव तद्वन्तं विषमयं करोति ।

आलॅण्डो— कुतः ? को विषयः ?

---

# राष्ट्रभाषा ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

अभियुक्ततमानां महती विप्रतिपत्तिरत्र विषये परिदृश्यते । आङ्गलभाषाभाषिणो राज्यकर्तारः भारतभूमिं परित्यज्य निष्क्रान्ताः । स्वातन्त्र्यं च राज्यकरणे प्रजापरिपालने भारतीयानां प्रजानामिदंप्रथमतया समजायत । सह च स्वातन्त्र्येण स्वार्थपरायणा अपि बहुलं स्वार्थसाधने पर-

पीडने च स्वभावतः प्रवर्तन्ते । एवमापततामनर्थानां निवारणमेव महत्कर्म समापतति नूतनस्य राज्यनिर्वाहकसदसः कर्तव्यम् । तेषां मध्ये भवतीदमप्यन्यदवश्यानुष्ठेयं यद्राष्ट्रभाषानिर्धारणं नाम ।

'आङ्गलजनानां भारतभूमेः निर्गमनं नूनं स्फुटीकरोति तेषां भाषाया अपि तैः सहैवाभिनिष्क्रमणम् । अनभिमते तेषां राज्यशासने नास्ति कोऽपि हेतुः तदीयाया भाषाया भारतभूमावनुवर्तने' इति मन्यन्ते बहवो भारतवासिनः । 'सर्वदेशव्यापिनी चेयं आङ्गलजनानां भाषा यदृच्छयाऽस्मदीयैर्बलादधीता नाधुना निराकरणमर्हति । भवेदेवैतयाऽप्यस्माकमन्यदेशीयैस्संपर्कसौहृदविज्ञानविवर्धनादिषु महानुपकारः । भवत्वेतस्या अपि पाठ्यतया सर्वप्रकारासु शालास्वनुवृत्तिः' इति कथयन्ति चापरे ।

सति चैवं मतिभेदे अन्य एव महान् संशयः समुत्पद्यते समुचिततमायाः सर्वभारतीयानामनुकूलसंवेदनीयायाः राष्ट्रभाषाया निर्धारणे या आङ्गलभाषायाः पदे अभिषिच्येत ।

स्वतन्त्रे च भारते को वा यथेच्छं चिन्तनं भाषणं वा प्रतिरोद्धु प्रभवति । प्रख्याततमा विद्याव्यासङ्गिनो राज्यकर्तारोऽमात्याः संरक्षकपदाधिरूढाः महापुरुषाश्च विषयेऽस्मिन् स्वाभिमतीः प्राकाशयन् ।

संस्कृतम्, प्राकृतानि, देशीभाषाः इति त्रिधा भाषाप्रवाहः चिराद्भारतेऽनुवर्तते । तत्र चिरन्तनादनिर्धारितप्रायादेव कालात्संस्कृतभाषायाः काश्मीरादारभ्य कुमारीक्षेत्रान्ताया भारतभूमेरेकीकरणयोग्यतया अभियुक्ततमैर्विद्यावद्भिरादरणं, तस्यामेव भाषायां लिखितानां ग्रन्थानां रामायणमहाभारतार्थशास्त्रनीतिशास्त्रधर्मशास्त्रनाट्यशास्त्रादीनां सर्वेषां कलात्वेन विद्यात्वेन चाभिमतानामान्येषामनन्तानां निबन्धानां च समग्रेऽपि भारते संचरणञ्च स्फुटमवगमयति यत्संस्कृतभाषा शतद्वयसंवत्सरेभ्यः पूर्वं सर्वभारतीयानां सम्पर्कसाधनं समभूदिति ।

प्राकृतानि तु व्यवह्रियमाणभाषावस्थातः प्रच्याविताान्यपि सर्वभारतीयविद्यागृहेष्वधीयमानानि संस्कृतवद्व्यवहारोपयोगीनि नाभूवन् ।

देशीभाषाश्च भूयसा कालभेदेन भिन्नभिन्नानि रूपाण्यादधत्यः तत्तद्देशीयविद्वज्जनमात्रसंवर्धिताः पण्डितपामरसाधारणा अभूवन् तेषु तेषु देशेषु।

स्वतन्त्रश्च भारतीयानां क्षेत्रं जीवब्रह्मणोरवस्थानमिव भेदाभेदमावहत् राष्ट्रभाषानिर्धारणे महतीं विप्रतिपत्तिं समुपस्थम्भयति। सर्वभारतसाधारणी तु देशीभाषा भवितुं नार्हति। यतो हि सा तत्तद्देशीयैरेवावगम्यते न सर्वैः। संस्कृतभाषा तु सर्वभारतव्यापिन्यपि सामान्यजनैः आङ्गलभाषाभिमानिभिः आङ्गलभाषारसमेव निस्सपत्नमनुभवद्भिश्च महापुरुषैर्नावगम्यत इति न राष्ट्रभाषापदमर्हतीति भूयांसो मन्यन्ते।

हिन्दी हिन्दुस्तानी वा भूयसामुत्तरभारतवासिनां व्यवहारसाधनं सुलभावगमा च भवतीत्युत्तरभारतीयानां तस्याः राष्ट्रभाषात्वेनादरणे नास्ति महती विप्रतिपत्तिः। उत्तरभारतीयाश्च न तथा संस्कृतपक्षपातिनः यथा स्वीयासु देशीभाषासु समादरवन्तः। संस्कृतस्य राष्ट्रभाषात्वं न ते चिन्तयन्ति अनुमोदन्ते वा। स्वीयविभागेषु देशीभाषाया एव सर्वांशतोऽपि संरक्षणं यथा नापह्रियेत तथा ते प्रयतन्ते। दक्षिणभारतीयानां गतिस्त्वस्मिन् विषये सुतरां शोचनीया दृश्यते। तैश्चाधुना गतेऽप्याङ्गलेयानां राज्यशासने अपरिचितैव नूतना काचिद्भाषा सर्वभारतसाधरणी राष्ट्रभाषा ग्राह्या भवति। जानन्त्येव बहवो दक्षिणभारतीया हिन्दीभाषाम्। परन्तु सर्वासु शालासु राजकीयनियमानुसारेणेयमध्येया भवति बालकैः। नास्ति भेद एतस्मिन्नंशे सर्वदेशीयानां भारतीयबालकानां विना हिन्दीमातृभाषाभाषिणो बालकान्।

सति चैवं स्वदेशीभाषया साकं हिन्दीभाषाऽपि दक्षिणोत्तरदेशीयैर्भारतीयैरवश्याध्येया राज्यकर्तृभिश्च स्वदेशार्थे देशीभाषा सर्वभारतीयेषु संव्यवहारेषु हिन्दीभाषा च व्यापारयितव्येति नूनमङ्गीकर्तव्यं भवति। एतेन च न कोऽपि भारतीयः देशाद्देशमटन् भाषाऽपरिज्ञानकृतं वैधुर्यं प्राप्नुयात्। परदेशीयाः जनाः भारते प्रविश्य भाषाया अपरिज्ञानकृतं वैधुर्यमनुभवेयुः।



---

# प्रकृतिभेदः (3) ॥

—:❀:—

— ननु भोः, कथं तदीयाराधनम् ? मन्ये, आढ्यैरुदारैः क्रियमाणमत्युत्तममभूदिति।

प्रथमः— कः संशयः। तथा अभूत्।

द्वितीयः— सामान्यतः सर्वत्र एवं भवति। किमत्र विशेषवक्तव्यम्। नाहमत्र कमपि विशेषं पश्यामि।

तृतीयः— गच्छत रे जडाः। किमिति वृथा दाक्षिण्यं दर्शयथ ? वस्तुतत्त्वं कुतो न ब्रूत। अपक्वमेकम्। अतिपक्वमन्यत्। तिन्त्रिणीसत्त्वे न लवणम्। लवणसत्त्वे न तिन्त्रिणी। तिन्त्रिण्योदनस्य तैलमपर्याप्तम्। मुद्गान्ने आज्यगन्धोऽपि नास्ति। भक्ष्याणि प्रायो न परिविष्टानि। परिविष्टमत्यल्पम्। आढ्याः किल, उदाराः किल। गच्छत रे। शतमीदृशान् दृष्टवानस्मि। ...............

---

समस्ववादस्य प्रवर्तकः कारल् मार्क्स्महाशयः 1853 वर्षे 'न्यूयार्क्-डैली-ट्रिब्यून' इत्यस्यां आङ्गलपत्रिकायां कांश्चन स्वकीयान् लेखान् प्राकाशयत्।

तत्रैकस्मिन्नेष विषयः स्थितः—

"आङ्गलेयानामाधिपत्यात् भारतदेशस्य पुरातनतत्त्वानि प्राचीनाचाराश्च तिरोधानं गच्छन्ति। एतेन भारतीयानां प्राक्तनं पावनचरितं विच्छिन्नं भवति।

"भारतदेशे गुणकर्मविभागश एव वर्णास्समकल्प्यन्त। भारतीयाः जनाः निसर्गशान्ताः परस्परं स्निग्धाश्च वसन्ति। तत्र अधमवर्णेष्वपि विनयः शान्तिः सन्तुष्टिश्च दृश्यन्ते।

"अस्माकं भाषाणां मतानां च भारतदेश एव मूलम्। भारतदेशे क्षत्रियाः पराक्रमे पुरातनैः जर्मन्देशवीरैस्सदृशाः। ब्राह्मणाः प्रतिभाविलासे प्राचीनान् ग्रीकूज्ञानिनोऽपि अतिशेरते।

"एतादृशमहत्वभरितं भारतं पुनरपि उत्कृष्टां दशां समधिगमिष्यतीति मे निश्चयः।" इति।

रे. शौरिराजः।

---

# पुस्तकपरामर्शः॥

सङ्कल्पसूर्योदयः। श्रीवेङ्कटनाथप्रणीतः। अहोबलकृतया प्रभाविलासाख्यया नृसिंहराजकृतया प्रभावल्याख्यया च व्याख्यया समेतः। पण्डित श्री वे. कृष्णमाचार्यैः संशोध्य परिष्कृतः। मद्रपुरी अडयार्-पुस्तकालये प्रकाशितः। सम्पुटद्वयात्मा। पञ्चदशरूप्यमूल्यः।

श्रीदेशिकप्रणीतमिदं नाटकं बहुधा प्रकाशितम्। इदं तु प्रकाशनं अगाधशास्त्रवैदुष्यैः विमर्शनकलाकुशलैः सहृदयवरैः श्रीकृष्णमाचार्यैः सम्पादितं बहुभिः परिष्कारैः समुज्ज्वलं पूर्वेभ्यः सर्वेभ्यो दूरं विशिष्यते। समग्रं व्याख्यानद्वयं संयोजितं, येन नूनं ग्रन्थमवलोकयतां महानुपकारः संपत्स्यते। उपोद्घातानुक्रमणीप्रभृतिकं च नवीनरीत्या सम्पाद्य पुष्कलं सम्पादितम्। उदाहृतानां प्रमाणवाक्यानां आकरप्रदर्शने यो महान्

TIRUPATI

श्रम ऊरीकृतः सोऽत्यन्तं विदुषामभिनन्दनीयः । विशेषतश्चेदं वक्तव्यं यत् स्वतन्त्रग्रन्थभावार्हे सुव्युत्पन्नगभीरपदगुम्फे महति उपोद्घाते न परं प्रकृतनाटकगोचरान् विविधान् विषयान् अपि तु विशिष्टाद्वैतसिद्धान्तप्रमेयसारं, प्रायः कृत्स्नं श्रीदेशिकदिव्यचरितं, एतदीयसर्वग्रन्थस्वरूपविवेकं च प्रतिपाद्य सुधियामग्रणीः सम्पादकः लोकस्य बहूपकृतवान् भवतीति ।

'श्रीदेशिकदर्शनरत्नदीपैः' 'सम्प्रदायरक्षाधुरन्धरैः' कलाकलापरसिकैः श्री वि. वि. श्रीनिवास अय्यङ्गार्-एभिः लिखिता प्रौढरम्या 'पुरावाक्' च प्रकाशनस्य रामणीयकं परिपोषयति ।

---

Bulletin of the Government Oriental Manuscripts Library, Madras, Edited by Sri T. Chandrasekharan, Curator. (Vol. I. No. 2.) Price Rs. 2.

पूर्ववत् अस्यामपि सञ्चिकायां बहुभाषामयाः बहवोऽप्रकाशितपूर्वा ग्रन्थाः प्रकाशिताः । तत्र श्रीचन्द्रशेखरार्येणैव सम्पादितः श्रीदोड्डयाचार्यकृतः श्रीभाष्योपन्यासः अधिकरणार्थसङ्ग्रहपरः (इह भागशः प्रकाशितः) नूनं विशिष्टाद्वैतमतेन अधिकरणार्थसारं जिज्ञासमानानां महते उपकाराय कल्पेत ।

---

Registered No. M 2300.

Book XXII ॥ श्रीः ॥ Nos. 7, 8, 9 & 10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


| | | | |
|---|---|---|---|
| पु. २२] कलि | ५०४९ सर्वधारि<br>५०५० विरोधि | { मीन<br>वृषभ } | साधारण सं ७, ९ |
| | विरोधि | { मेष<br>मिथुन } | शास्त्रानुबन्ध सं ८, १०<br>आहत्य ,, १० |


# THE UDYANA PATRIKA.

## A SANSKRIT MONTHLY

March, April, May & June 1949.

For the rate of subscription please see inside

# UDYANA PATRIKA.


Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.


## विषयाः ॥


शास्त्रानुबन्धः— कुवलयानन्दः । २७७—२८४

1 मेनका ।
2 सुभाषितनीवी ।
3 राष्ट्रभाषा (2) ।
4 मिथ्यागौरवम् ।
5 केचन विशेषाः ।
6 नाटककथासारः ।
7 यथाभिमतम् । [नाटकम]
8 गानम् ।
9 प्रकृतिभेदः ।
10 पुस्तकपरामर्शः ।
11 प्रतिबोधनम् । [wrapper]

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI. 53 LIBRARY.

अथ अनुज्ञा ।

दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात् ।
विपदस्सन्तु नश्शश्वद्यासु सङ्कीर्त्यते हरिः ॥

यथा वा—

मय्येव जीर्णतां यातु यत्त्वयोपकृतं हरे ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ॥

इयं हनूमन्तं प्रति राघवस्योक्तिः । अत्र प्रत्युपकाराभावो दोषः । तदभ्युपगमे हेतुर्गुणो विपत्त्याकाङ्क्षाया अप्रसक्तिः । सा च व्यतिरेकमुखप्रवृत्तेन सामान्येन विशेषसमर्थनरूपेणार्थान्तरन्यासेन दर्शिता ।

यथा वा—

भजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं
किमित्यमरसम्पदः प्रमथनाथ नाथामहे ।
भवद्भवनदेहलीविकटतुण्डदण्डाहति-
त्रुटन्मकुटकोटिभिर्मघवदादिभिर्भूयते ॥

इति अनुज्ञा ।

---

अथ अनुज्ञा ।

**दोषस्येति** । पूर्वत्र दोषस्याप्राप्तिः । इह तु दोषस्याप्राप्तस्य अभ्यर्थनेति सङ्गतिः । तत्रैव दोष एव । तत्रैव गुणदर्शनात् दोषस्याभ्यर्थनाऽनुज्ञालङ्कार इति योजना । 'भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय' इत्यादिवारणाय दोषस्येति । असम्भवशङ्कावारणाय तत्रैवेत्यादि । यासु विपत्सु ।

**मय्येवेति** । हरे कपे जीर्णतां जरणम् । प्रत्युपकारार्थी प्रत्युपकारं कर्तुकामः । उ(प्रत्यु)पकारेति । [नन्वत्र विपत्त्याकांक्षाया अप्रसक्तिर्न]... दर्शितेत्यत आह—सा चेति । **व्यतिरेके**ति । प्रत्युपकारमनिच्छुः विपत्तिं नाभिकाङ्क्षति इति वक्तव्ये तथोक्तत्वादिति भावः ।

**भजेमेति** । असुरसम्पदामित्यत्र 'आशिषि नाथः' इति षष्ठी ।

अथ लेशः ।

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् ।
अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ॥
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ।

दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वकल्पनं च लेशः । उदाहरणम् । राज्ञोऽभिमते विदुषि पुत्रे चिरं राजधान्यां प्रवसति तद्दर्शनोत्कण्ठितस्य गृहे स्थितस्य पितुर्वचनं अप्रस्तुतप्रशंसारूपम् । तत्र प्रथमार्धे इतरविहङ्गानामवक्तृत्वदोषस्य स्वच्छन्दचरणानुकूलतया गुणत्वं कल्पितम् । द्वितीयार्धे मधुरभाषित्वस्य गुणस्य पञ्जरबन्धहेतुतया दोषत्वं कल्पितम् । न च अत्र व्याजस्तुतिराशङ्कनीया । नह्यत्र विहङ्गान्तराणां स्तुतिव्याजेन निन्दायां शुकस्य निन्दाव्याजेन स्तुतौ च तात्पर्यम् । किं तु पुत्रदर्शनोत्कण्ठितस्य पितुर्दोषगुणयोर्गुणत्वदोषत्वाभिमान एवात्र श्लोके निबद्धः ।

---

प्रमथनाथेति शिवामन्त्रणम् । नाथामहे आशास्महे । 'आशिषि नाथः' इति तङ् । भवनदेहलीभवनेति पाठः । देहलीनिवासेत्यर्थः । विकटेति पाठे कुपितेत्यर्थः । तुण्डुः नन्दिकेश्वरः । मघवदादिभिः इन्द्रादिभिः । भावे लट् । अत्र पिशाचप्रकृतौ नन्दिकेश्वरस्य समस्तदेवतानियमनाधिकारप्राप्तिलक्षणगुणदर्शनादभ्यर्थना ।

इति अनुज्ञा ।

अथ लेशः ।

गुणदोषप्रसङ्गात् सङ्गतिः । 'भवन्ति नरकाः पापात्' इत्यादेः दोषे दोषत्वकल्पनस्य 'नयेन श्रीः श्रिया' इत्यादेर्गुणे गुणत्वकल्पनस्य च व्युदासाय व्युत्क्रमोक्तिः । गुणस्याल्पत्वापत्त्यालेशः ।

न हीति । पुत्रविरहक्लेशे निन्दास्तुत्योरप्रसक्तेरिति भावः ।

यथा वा—

सन्तस्सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा।
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ॥

दण्डी त्वत्रोदाजहार—

युवैष गुणवान्राजा योग्यस्ते पतिरूर्जितः।
रणोत्सवे मनस्सक्तं यस्य कामोत्सवादपि ॥

चपलो निर्दयश्चासौ जनः किं तेन मे सखि।
आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ॥

अत्राद्यश्लोके राज्ञो वीर्योत्कर्षस्तुतिः। कन्याया निरन्तरसंभोगनिर्विविक्षोर्दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धया सख्या राजप्रकोपपरिजिहीर्षया स एव दोषो गुणत्वेन वर्णितः। उत्तरश्लोके सखीभिरुपदिष्टं मानं कर्तुमशक्तयापि तासामग्रतो मानपरिग्रहानुगुणं प्रतिज्ञाय तदनिर्वाहमाशङ्कमानया सखीनामुपहासं परिजिहीर्षन्त्या नायिकया नायकस्य चाटुकारितागुण एव दोषत्वेन वर्णितः।

---

सन्त इति। यन्त्रणं नियमः। असच्चरित्रपरिहारव्यसनिन इति यावत्। कृतेन सता असता वा कर्मणा न व्याकुलः हर्षशोकशून्यः।

युवेति। ऊर्जितः बलवान्। चपल इति। आगःप्रमार्जनमपराधापनयः।

नन्वाद्यश्लोके वीर्योत्कर्षस्य स्वत एव गुणत्वेन दोषस्य गुणीकाराभावाल्लक्षणासङ्गतिरित्यत आह-अत्रेति। वीर्योत्कर्षेण प्रकृते यथा दोषस्यात्तथाऽऽह-निरन्तरेति। निर्विविक्षोरिति। अनुबुभूषोरित्यर्थः इदं कन्याविशेषणम्। पुनस्तस्य गुणीकारे हेतुमाह-राजेति। चाटुकारितागुणस्य दोषीकारे हेतुमाह-सखीनामिति। तदुपपादनाय सखीभिरित्यादि। राज-

न चाद्यश्लोके स्तुतिर्निन्दापर्यवसायिनी द्वितीयश्लोके निन्दा स्तुतिपर्यवसायिनीति व्याजस्तुतिराशङ्कनीया। राजप्रकोपादिपरिहारार्थमिह निन्दास्तुत्योरन्याविदितं लेशत एवोद्घाटनेन ततो विशेषादिति। वस्तुतस्त्विह व्याजस्तुतिसद्भावेऽपि न दोषः। न ह्येतावता लेशमात्रस्य व्याजस्तुत्यन्तर्भावः प्रसज्यते। तदसङ्कीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात्। नापि व्याजस्तुतिमात्रस्य लेशान्तर्भावः प्रसज्यते। भिन्नविषयव्याजस्तुत्युदाहरणेषु

'कस्त्वं वानर ? रामचन्द्रभवने लेखार्थसंवाहकः'

'यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा'

इत्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य चाभावात्। तत्रान्यगुणदोषाभ्यामन्यत्र गुणदोषयोः प्रतीतेः।

विषयैक्येऽपि—

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारिः
दिङ्नागानां मदजलमषीभाञ्जि गण्डस्थलानि।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्ता-
न्याभासन्ते वद धवलितं किं यशोभिस्त्वदीयैः॥

इत्याद्युदाहरणेषु लेशास्पर्शनात्। अत्र हीन्दुलक्ष्मादीनां

---

प्रकोपादीत्यादिपदेन सख्युपहाससङ्ग्रहः। इदमन्याविदितमित्यत्र अन्वेति। लेशत एवेति। ईषदेवेत्यर्थः। व्याजस्तुतौ त्वन्यविदितं सम्यगेव उद्घाटनमिति भावः। लेशतोऽपि नोद्घाटनमिति वा। ननु सर्वस्वकारादिमते तत्र अप्रस्तुतप्रशंसाया एवाभ्युपगमान्न व्याजस्तुतेर्विविक्तविषय इत्यत आह विषयैक्येऽपीति।

इन्दोरिति। उर्वीवलयतिलकेति वर्ण्यराजामन्त्रणम्। अनुलिप्तानीत्यत्र 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति नपुंसकैकशेषः। एकवद्भावस्य वैकल्पिकत्वाद्बहुवचनम्। किं धवलितं न किञ्चिदित्यर्थः।

धवलीकरणाभावदोष एव गुणत्वेन न पर्यवस्यति। किं तु परिसङ्ख्या-रूपेण ततोऽन्यत्सर्वं धवलितमित्यन्यो गुणः प्रतीयते। क्वचिद्व्याजस्तुत्युदाहरणे गुणदोषीकरणसत्त्वेऽपि स्तुतेर्विषयान्तरमपि दृश्यते। यथा—

सर्वदा सर्वदोऽसीति मिथ्या संस्तूयसे बुधैः।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः॥

अत्र हि वाच्यया निन्दया परिसङ्ख्यारूपेण ततोऽन्यत्सर्वमर्थिनामभिमतं दीनारादि दीयते इति स्तुत्यन्तरमपि प्रतीयते। एवं च येषूदाहरणेषु 'कस्ते शौर्यमदो योद्धुम्' इत्यादिषु गुणदोषादिषु गुणदोषीकरणादिकमेव व्याजस्तुतिरूपतयावतिष्ठते, तत्र लेशव्याजस्तुत्योस्सङ्करोऽस्तु। इत्थमेव हि व्याजस्तुत्यप्रस्तुतप्रशंसयोरपि प्राक्सङ्करो दर्शितः।

इति लेशः।

## अथ मुद्रा।

सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः।
नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा॥

---

परिसङ्ख्यारूपेणेति। परिसङ्ख्यान्यायेनेत्यर्थः। ततश्च यथा 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यत्र स्वार्थापरित्यागेन अर्थान्तरपरिग्रहः तथा अत्रापीति भावः।

सर्वदेति। पृष्ठं पश्चाद्भागम्। वक्षः परिरम्भमिति यावत्। स्तुत्यन्तरमपीति। गुणदोषीकरणमपिना समुच्चीयते।

इति लेशः।

अथ मुद्रा।

सूच्येति। पूर्वत्र दोषादेर्गुणादित्वकल्पनम्। इह तु प्रकृतपदस्य अन्यपरत्वकल्पनमिति सङ्गतिः। मुद्रेति। लक्ष्यनाम। 'कृत्वा हाटक-

अत्र नायिकावर्णनपरेण युग्मविपुलापदेनास्या अनुष्टुभो युग्मविपुलानामत्वरूपसूच्यार्थसूचनं मुद्रा। यद्यप्यत्र ग्रन्थे वृत्तनाम्नो नास्ति सूचनीयत्वम्। तथाप्यस्योत्तरार्धस्य लक्ष्यलक्षणयुक्तच्छन्दश्शास्त्रमध्यपातित्वेन तस्य सूचनीयत्वमस्तीति तदभिप्रायेण लक्षणं योज्यम्। एवं नवरत्नमालायां तत्तद्रत्ननामनिवेशनेन तत्तन्नामकजातिसूचनम्। नक्षत्रमालायामग्न्यादिदेवतानामभिः नक्षत्रसूचनमित्यादावयमेवालङ्कारः। एवं नाटकेषु वक्ष्यमाणार्थसूचनेष्वपि।

इति मुद्रा।

---

ताटकेयहरिणे शार्दूलविक्रीडितम्' इत्यानुषङ्गिकसूचनवारणाय–सूच्येति। केवलच्छन्दोमात्रपरग्रन्थव्युदासाय–प्रकृतेति। नितम्बे गुर्वी पृथुला। दृग्युग्मे विपुला विशाला। युग्मविपुलेति। यद्यप्यत्र युग्मविपुलालक्षणं नास्ति 'यस्यां लस्सप्तमो युग्मे सा युग्मविपुला मता(?)' इति हि तल्लक्षणम। तत्र 'अब्धेर्यो' इत्यनुवर्त्य प्रथमतृतीयपादयोः चतुर्थवर्णात्परेण यगणेन भवितव्यमिति श्रीनाथादिभिर्व्याख्यातम्। अत्र च ततः परो भगण एव तृतीयचरणे कृतः। तथापि ततः परं भगणविन्यासेन भविपुला। अन्यत्र युग्मविपुला इति तयोः सङ्करेऽपि युग्मविपुलायाः अक्षतेः। न च द्वितीयतृती(तुरी)यचरणयोः चतुर्थात्परं जगणविन्यासात्पथ्यावक्त्रमिदं स्यादिति वाच्यम्। उत्तरार्धहोमन्यायेन पथ्यावक्त्रेण विशेषप्रवृत्तेनापि युग्मविपुलाऽनवस्कन्दनस्यापि सम्भवात। अत्र ग्रन्थ इति। चन्द्रालोकग्रन्थ इत्यर्थः। योज्यमिति। इदं तु व्यक्तमुदाहरणं 'माभूत्सङ्गो जननिजनैस्तैर्मत्ता येषां मतिरिह वित्तैः' इति। नेत्रीति(?)। नायिकेत्यर्थः।

इति मुद्रा।

अथ रत्नावली ।

क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः ।
चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥

अत्र चतुरास्यादिपदैर्वर्णनीयस्य राज्ञः ब्रह्मविष्णुरुद्रात्मतापि प्रतीयत इति प्रसिद्धसहपाठानां ब्रह्मादीनां क्रमेण निवेशनं रत्नावली ।

यथा वा—

रत्याप्तप्रियलाञ्छने कठिनतावासे रसालिङ्गिते
प्रह्लादैकरसे क्रमादुपचिते भूभृद्गुरुत्वापहे ।

---

अथ रत्नावली ।

क्रमिकमिति । पूर्वत्र सूच्यार्थस्य एकस्य न्यासः ; इह तु प्रसिद्धानां बहूनामिति सङ्गतिः । क्रमिकपदं प्रायिकाभिप्रायम् न तु व्यावर्तकमिति स्फुटीभविष्यति । प्रकृतार्थानां प्रसिद्धसहपाठानामर्थानाम् । 'वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः' इत्यादि वारणाय पूर्वदलम् । तेनैव उदाहरणेष्वव्याप्तिरपि निरस्ता(?) । 'कृत्तद्धितसमासाश्च' इत्यादिव्युदासायानन्तरदलम् । चतुरास्यः चतुरवदनः । पतिः पालकः ।

नन्वत्र वर्ण्यगतानां चतुरवदनत्वादीनामप्रसिद्धसहपाठत्वाल्लक्षणासङ्गतिरित्यत आह—अत्रेति । ब्रह्मेति । रूढिबलादिति भावः । अपिना योगलब्धानां चतुरवदनत्वादीनां समुच्चयः ।

रत्याप्तेति । रताबाप्तं प्रियस्य लाञ्छनं नखक्षतादिरूपं येन सः । तथा अन्यत्र रतिदेव्या आप्तस्य प्रियस्य मदनस्य । अनन्यभार्यात्वसूचनायाप्तपदम् । लाञ्छनभूते । मत्स्यस्य मदनकेतुत्वादिति भावः । कठिनताया आवासभूते । उभयत्र तुल्यम् । कूर्मपृष्ठस्यातिकठोरत्वादिति भावः । रसेन रागेण रसया भूम्या च आलिङ्गिते । महावराहस्य भूम्युद्धारकत्वादिति । प्रह्लादः आह्लादकरणम् । ण्यन्ताद्भावे घञ् । तत्र एको रसो आसक्तिर्यस्य । परेषां सुखोत्पादनैकप्रवृत्त इति यावत् । नृसिंहस्य प्रह्लादासक्तिः प्रसिद्धा । क्रमादुपचिते । स्पष्टम् । भूभृतः पर्वतस्य गुरुत्वं पृथुत्वं क्षत्रिय-

कोकस्पर्धिनि भोगभाजि जनितानङ्गे खलीनोन्मुखे
भाति श्रीरमणावतारदशकं बाले भवत्याः स्तने ॥

यथा वा—

नीराब्जानां नयनयुगलद्राघिमा दत्तपत्रः
कुम्भावैभौ कुचपरिकरः पूर्वपक्षीचकार ।
अविश्रान्तिर्मदनधनुषो विभ्रमानन्नवादी-
द्वक्त्रज्योत्स्ना शशधररुचं दूषयामास यस्याः ॥

अत्र पत्रदानपूर्वपक्षोपन्यासानुवाददूषणोद्भावनानि बुधजनप्रसिद्धक्रमेण न्यस्तानि । प्रसिद्धसहपाठानां प्रसिद्धक्रमानुसरणेऽप्ययमेवालङ्कारः ।

यथा वा—

यस्य वह्निमयो हृदयेषु जलमयो लोचनपुटेषु मारुतमयः श्वसितेषु क्षमामयोऽङ्गेष्वाकाशमयस्त्रान्तेषु पञ्चमहाभूतमयो मूर्त इवादृश्यत निहतपतिषु सामन्तान्तःपुरेषु प्रतापः ॥

---

गौरवं च अपहन्तीति तथा । भार्गवरामस्य सकलक्षत्रियघातकत्वादिति भावः । यद्यपि 'क्लेशतमसोः' इत्यनुशासनादन्यस्मिन्नुपपदे डप्रत्ययो दुर्लभः तथाऽपि 'स्रगियं यदि जीवितापहा' इत्यादाविव 'अन्येभ्योऽपि दृश्यते' इत्यनेन निर्वाह इत्याहुः । अवश्यं स्पर्धत इति स्पर्धी । आवश्यके णिनिः । कोकेन स्पर्धी कोकस्पर्धी । न तु सुप्यजाताविल्यादिना णिनिः । कोकपदस्य जातिवाचकत्वात् । राघवस्य कोकशत्रुत्वं प्रसिद्धम् । भोगस्सुखं फणिकायश्च । बलरामस्य फणिपतित्वादिति भावः । जनितानङ्गे । स्पष्टम् । कृष्णस्यानङ्गपितृत्वादिति भावः । खे आकाशे लीनः उत्सेधशालीति यावत् । तथात्वेऽप्युन्मुखः न त्वधोमुखः । खलीनेन मुखपाशेनोन्मुखः उद्धतमुखः ।

नीरेति । द्राघिमा दैर्घ्यम् । पत्रं दलम् एभौ इभसंबन्धिनौ । परिकर उपकरणम् । पत्रदानं प्रतिज्ञानप्र(पत्र)दानम् । दूषणोद्भावनं सिद्धान्तोपन्यासः । श्रीहर्षचरितगद्यमुदाहरति यस्येति । क्षमामय इति । भूपृष्ठ-

शक्यते ? एकस्मिन् दिने किमस्मान् तस्मिन् मोटारशकटे उपवेशयेत ? नैव उपवेशयिष्यति। कोमला अस्माभिः सह संभाषणमपि न कुर्यात्। स्वमहिमानं प्रकरिष्यते।

कोमला - (महता सन्तोषेण उत्साहेन च) अरे श्याम, त्वं कदापि त्वदीयां अल्पां बुद्धिं न जहासि। अद्य प्रासादे क्रीते कं आवां तुल्य-वत आनीतवत्यौ ? कस्य आतिथ्यमकार्ष्व ? न खलु त्वं तत् स्मरसि। भवन्तं विना किमावयोः क्षणकालोऽपि गच्छेत् ? गच्छ रे उन्मत्त। किमिदं "क्षुद्रं क्षुद्रं भाषितं; शृङ्गारभाषितं" भाषसे ? किं नाम इयदै-श्वर्यमस्माकमागतमिति असूयसि ?

पेरुन्देवी — चेचे ! न श्यामं तथा मन्यस्व। सहस्रमपि मनुष्याः सन्तः किं आस्माकश्यामतुल्या भवेयुः। मा स्म अचमत्कृतं प्रलपः। अरे श्याम, कुतस्ते अयं संशयः ? किं तेन, यदि वयं प्रासादमक्रीणीम ? किं तेन, यदि मोटारं क्रीणीमः ? सर्वं केन सम्पन्नम् ? त्वां विना इदं सर्वं कथमागच्छेत् ? तव विस्मरणे किं भोजनं लभ्येत ? आवां अकृतज्ञे सूकर्याविति न मन्येथाः। आवामपि किं उपमाण्डलिक-गृहस्था इव अल्पे, अहङ्कारशालिन्यौ ?

कोमला— अत एव किल ईश्वरः उपमाण्डलिकमुखे सम्प्रति प्रस्थमृ-त्तिकां आदाय प्रास्य घट्टयति स्म। तस्य कटिं प्रति एकं प्रहारं प्राह-रत्। तस्य उद्योग एव न्यवर्तत। 'मुखतण्डुले'भ्योऽपि यथा गतिर्न भवेत् तथा चोरः गृहं सम्मृज्य गतः। स्वयं सौन्दर्ये उत्तमा विद्यु-ल्लतेति गर्वेण विद्योतितवत्याः गणिकारण्डायाः स्वर्णाम्बायाः नासा-कर्णं छित्वा 'शूर्पणखाभङ्गं' चकार। कथमपि सतां मनुष्याणां इयान् अहङ्कारो नोचितः।

पेरुन्देवी— सा किमेतैर्दिनैः जीवितवती अथवा मृता ? त्वं हि एतद् गृहीत्वा तृप्यसि। मम परं अद्यापि तृप्तिर्न भवति। यद् वृत्तं तत् सर्वं कामं साधु। सा खलु कनकी रण्डा वर्तते। सा यच्चोरस्य हस्ते अलग्ना रक्षिता बभूव सैव मे मनसो महती अपूर्णता भवति।

चोरः तस्याः कनकीरण्डायाः वस्त्रमपहृत्य द्रौपदीदशां नीत्वा तथैव दिगम्बरां चत्वरे दीपस्तम्भे बध्वा गतवान् अभविष्यच्चेत् तन्मे परमसन्तोषाय अभविष्यत् । जना आगत्य प्रेक्षणकं प्रेक्षेरन् ।

कोमला— तस्मिन् समये मया गन्तव्यम् । खात्कृत्य तस्या मुखे निष्ठीवनं कृत्वा आगन्तव्यम् । किमरे श्याम, तस्य उपमाण्डलिकोद्योगः उच्छिन्नः । कटिवस्त्रमप्यविहाय हि चोरः कृत्स्नमुण्डनमकरोत् । इतः परं 'पिण्डाय' स किमरे कुर्यात् ?

श्यामार्यः— सा चिन्ता किमित्यस्माकम् ? तेषां सम्बन्धो विलुप्तोऽभूत् । अनुपदमस्माकं शोभनः कालश्च समागतः । तेषु यत् किमपि कृच्छ्रं प्राप्नुवत्सु किमस्माकम् ?

पेरुन्देवी— तस्याः कनकीरण्डाया अहम्भावः अद्यापि न क्षीणः स्यात् । तया तेन च अस्मिन् पुरे आगन्तव्यम् । अस्मत्प्रासादद्वारे स्थित्वा भिक्षितव्यम् । तदा मम हस्तेन एकमुष्टिं तण्डुलं दत्वा 'सम्बन्धिनौ, किं सुखिनौ ? अस्मद्द्वारसम्मार्जनाय एका कर्मकरी मोटारशोधनाय एकः पुरुषश्च अपेक्षितौ । किं युवामागच्छथः ?' इति पृष्ट्वा उदरज्वलनं शमयेयम् ।

कोमला— मेनका अवर्तिष्यत चेत् ते मद्रमागच्छेयुरपि । इतःपरं नैव ते अत्र आगमिष्यन्ति ।

श्यामार्यः— मेनका किं शिङ्गपुरे वर्तते उत नात्रि प्रयान्ती भवति ? तां अद्य पश्येम चेत् साधु भवेत् । तुरुष्कीव द्विपस्त्या संवृता स्यात् ।

कोमला— तां चेत् तुरुष्कीं कुर्वन्ति किं नामधेयं कृत्वा तां आह्वयेयुः ।

पेरुन्देवी— 'सम्मार्जनी बीबी' इति नाम कृतं चेत् तत् तस्या अनुरूपं भवेत् । नैनामहम्मदस्य मुखविलासः तव विदितश्चेत् एवं नाम कर्तव्यमिति तस्मै लिख ।

कोमला— अस्तु । इयन्ति हि दिनानि सा तुरुष्कस्य गृहे वर्तते । अजमांसं गोमांसं सर्वं भुक्तवत्येव हि स्यात् ।

पेरुन्देवी— कः सन्देहः । इयद्भिर्दिनैः तस्या जन्म हतं, विध्वस्तं भवेत् ।

अहं चेत्, प्रथमदिन एव जिह्वामुत्पाट्य परित्यक्तजीविता अभवि-ष्यम्। मानशून्या सा रण्डा चण्डालस्यापि गृहे भुक्त्वा आगता भवेत्।

श्यामार्यः— इतःपरं सा कथमपि गच्छतु। वराहस्वामिनं गृहीतवान् 'शनिः' उपरतः। अस्माकं प्रासादः आगच्छतु। शोभनः कालश्च भविष्यति। अभिनवा स्नुषा आगमिष्यति। तया विपुलं स्वं च लप्स्यते।

कोमला— अभिनवमागमिष्यन्ती कथं किल भविष्यति? विनायकनि-र्माणप्रवृत्त्या वानरनिर्माणकथारीतिं विना अनयाऽपि वा साध्व्या खलु भाव्यम्। इयमेव मे चिन्ता भवति।

पेरुन्देवी— ननु रे श्याम, मम काचिदालोचना भवति। तथा खलु कुर्याम। अस्मद्वराहस्वामी तावत् पूर्ववन्न वर्तते। स्वयमेव गृहस्य स्वामीति स इदानीं प्रदर्शयितुमारब्धवान्। तदनुगुणं नवीना गृहि-ण्यपि तस्य 'उपधानमन्त्रो'पदेशकारिणी भवेच्चेत् अस्माकं सम्भ्रमः सङ्कुचितः स्यात्। तस्मात् तावुभावपि वयं औषधेन वा मन्त्रेण वा वशीकुर्याम। नैनामहम्मदस्य गृहमागतवन्तं मान्त्रिकं कञ्चिदानयसि? तस्मै एकं द्वे वा शते दत्त्वा कार्यं समापयेम।

कोमला— (सन्तुष्टा) आम् अयि। सैव समीचीना आलोचना। तथैव कुर्याम। पश्चात् मेनकासमाचारे प्रकटीभूतेऽपि वराहस्वामी अस्मान् किमपि न करिष्यति। अस्मद्वचनमनुसरन् प्रश्रितो वर्तेत।

श्यामार्यः— इयमालोचना दिनद्वयात् पूर्वमेव मम अभवत्। सपदि अहं नैनामहम्मदस्य गृहं गतवानासम्। स गृहे न वर्तत इत्यवोचन्। मान्त्रिकः तत्र नादृश्यत। अन्यत्र कुत्र स वर्तत इत्येतदपि न ज्ञायते। पुनः सकृत् गत्वा विचारयिष्यामि। अद्य वराहस्वामी आग-मिष्यति। यत् किमपि कार्यं अस्माभिर्जागरूकैः कर्तव्यम्। कोमले, घण्टाः कतीति पश्य। सम्प्रति पञ्चसु घण्टासु आगन्तव्यमिति मां भिषगब्रवीत्।

कोमला— नन्वरे श्याम, अद्य वराहस्वामिनि आगच्छति सति सा हूण-
धाऽप्यपि किं सह आगच्छेत् ?

श्यामार्यः — आम् ।

कोमला— तस्यै किमस्माभिरेव भोजनं दातव्यम् ।

पेरुन्देवी — तस्यै चण्डालगर्दभ्यै अस्माभिः कुतो भोजनं दातव्यम् ? सहजातानां अस्माकं अभूता श्रद्धा भारवहनं च किमस्याः बालिकाया आगच्छत् ? किमपि अस्माकमपि कार्यं भवत्विति तव अनुमतिमकरवन् । सा चेदागच्छति द्वे दिने क्वापि कोणे निपत्य स्थिता विनश्यतु । अतीते जन्मनि तस्यां वयं ऋणं कृतवत्यः । सा तत् प्रत्यादत्ताम् ।

कोमला— अरे श्याम, घण्टाः अर्धाधिकाश्चतस्रो भवन्ति ।

श्यामार्यः— 'साधु । अहं गत्वा वराहस्वामिनमादाय अर्धघण्टया आगच्छामि ।' इत्यभिधाय निरगच्छत् । ततः स्त्रियौ उभे अपि कुतूहलेन मार्गं पश्यन्त्यौ आस्ताम् । सम्प्रति पादाधिकाः पञ्च घण्टा अभवन् । द्वारे मोटारशकटस्य आगतस्य ध्वनिरश्रूयत । सद्यः सोदर्यौ द्वे अपि द्रुतेन बहिरधावताम् ।

---

## 26 षड्विंशोऽधिकारः ।

द्वारमागत्य स्थिते मोटारे निहितायां कस्याञ्चित् प्रेङ्खोलिकायां वराहस्वामी शायित आसीत् । श्यामार्यः प्राजकस्य (Driver) समीपे उपविष्ट आसीत् । पश्चात् स्थिते प्रधानासने भिषक्-हूणी हूणधात्री च उपविष्टे अभवताम् । शकटे अन्तरागत्य स्थिते सति सर्वे अधः अवातरन् । वराहस्वामिना अधिष्ठिता प्रेङ्खोलिका सद्यः अवतारिता सौकर्यवत् किञ्चिदन्तर्गृहमनीयत । तत्रत्यायां कस्याञ्चित् खट्वायां मन्दममुच्यत । तैः सह अभ्यधिकानि भेषजानि च आगच्छन् । तदानीं हूणी भिषक् वराहस्वामिनः नाडीं परीक्ष्य ततः कानिचित् भेषजानि सज्जीकृत्य पाययामास ।

ब्रह्मणा सिद्धं यत् नैकगुणं अनन्तमहागुणशालि, सस्यं, महाफलं श्रीमद्वरद-रूपं, तत्सम्पदामिति बहुव्रीहिः, यद्वा विधिना सिद्धैश्च नैकगुणं अनेक-गुणविशिष्टं 'स्वयमुदयिनस्सिद्धाद्याविष्कृताश्च शुभालया' इत्युक्तप्रकारेण सिद्धादिप्रतिष्ठया महोत्कर्षशालि यत् सस्यं फलम् 'जीमूताय चतुर्मुखा-ध्वरफलीभूताय तस्मै नमः' इत्युक्तं भगवद्रूपफलम् तच्छालिनां, तथा च भगवत्सेवार्थं पर्वतारोहणं कर्तव्यमेवेति फलितम्। अथवा शसयोर-भेदात् शस्या प्रशस्या सम्पत् 'अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम्' इत्युक्तं महाधनम्, तद्वतां; 'अविन्धनधनञ्जयप्रशमदं धनं दन्धनम्' इति न्यायेनान्येषामत्यल्पधनत्वावसायात् धनञ्जयविवर्धनं धनमित्युक्त-मेव धनं प्रशस्यतममित्यर्थः।

अन्योऽपि कुम्भकर्णपरतयाप्यर्थः। स च अधिकोन्नतः आकाशपर्य-न्तोन्नतमहाकायः, अत एव कुम्भकर्णकुलगिरिदळनदम्भोळिभूतेत्यन्यत्र कीर्तितं यं दृष्ट्वा हि सर्वेऽपि वानरा महाभूतभ्रमात् पलायांचक्रिर इति भावः। सुदारुणेन अतिक्रूरहृदयेन रावणेनान्वितः, अनुगन्ता, संयुक्त इत्यर्थः। प्रथमं निषेद्धापि अन्ततो रावणोक्तिमेव शरणीचकारेति न त्वयं विभीषणवदेकान्तनिषेधनिष्ठ इत्यर्थः। असकृत् भ्रमन्तः स्वनिद्रा-भञ्जनाय स्वदेहोपरि परिभ्रमन्तः ये पशुगणाः अजादयस्तीक्ष्णखुराः तेषा-मङ्घ्रिभिः पीडितः, विघट्टितः, विरसः विभीषणवत् भगवत्संश्लेषरसान-भिज्ञः, स्वभावतः कठिनदेहश्च तादृशेन क्रूरेण कुम्भकर्णेन भाग्यवशासि-द्धमहागुणसमृद्धफलसम्पदां 'भवद्गतं मे राज्यं च जीवितं च सुखानि च' इति सकलभोग्यवस्तुसमुदायत्वेन भगवन्तमध्यवस्यतां विभीषणादीनां, अलं तत्सम्बन्ध एव मास्त्वित्यर्थः। अतिदारुणरावणसम्बन्धमपरित्य-जता भ्रात्रापि किं कार्यमित्यर्थः।

एवं काणादादिकुतर्कपरोऽप्यर्थः। खरैः अतिक्रूरैः असारैर्वा, खलं भूस्थानकल्केष्विति विश्वः। कुतर्कैः कीदृशैः अधिकोन्नतैरपि अष्टादश-विद्याभ्यर्हिततमामान्वीक्षकीं प्रणिनायेति उत्कृष्टतया पठितैरपि सुदा-रुणान्वितैः दुरवगाहप्रमेयबहुळैः, उच्यते हि— 'गदाधरविनिर्मिता कठि-

नतर्कदुर्गाटवीनवीनपदवी' इति। अत एव असकृत् भ्रमन्तः भ्रान्तिमन्तः ये पशुगणाः मूढजनाः न्यायशास्त्रे अप्रविष्टबुद्धयः तेषामङ्घ्रिप्रपीडितं परस्परपादप्रहारः येषु तैः तच्छास्त्राभ्यसनस्य परस्परतिरस्कार एव फलमिति भावः। उक्तं हि— 'कनत्कथककत्थनक्रमविकल्पितप्रक्रमा जगद्विपरिवर्तिनी जनपदेषु जोघुष्यते' इति 'वदन् शुष्कं तर्कं परपरिभवार्थोक्तिभिरसौ नयत्यायुस्सर्वं निहतपरलोकार्थयतनः' इति च। अत एव विरसैः रसविधुरैः 'नमः प्रामाण्यवादाय मत्कवित्वापहारिणे' इत्युक्तरीत्या काव्यादिसर्वरसविरोधिभिरिति वा। उक्तं हि—'कर्कशतर्कविचारव्यग्रः किं वेत्ति काव्यहृदयानि। ग्राम्य इव कृषिविलग्नश्वश्रूचलनयनाकटाक्षवलितानि।' स्वभावतः कठिनैः कठोरतरैः, दुश्श्रवशब्दबहुलैः कुतर्कशत[श]र्करानिकरकर्कशा पद्धतिरित्युक्तेः; घटः पट इतीतरे कटु रटन्ति नैयायिका इति च। विश्वगुणादर्शेऽपि 'प्रयत्नरस्तोकैः परिचितकुतर्कप्रकरणाः परं वाचो वश्यान् कतिपयपदौघान् विदधतः। सभायां वाचाटा श्रुतिकटु रटन्तो घटपटान् न लज्जन्ते मन्दा स्वयमपि तु जिह्रेति विबुधः।' इत्युक्तविशेषणपौष्कल्यमुक्तं तर्कशास्त्रे। तादृशैः कुतर्कैरलं; तदभ्यसनं माभूत्। केषां दैववशसिद्धशमदमादिफलसम्पदां, शमदमादयो हि शास्त्रफलं, 'शमार्थं सर्वशास्त्राणि' इत्युक्तेः। अतश्शमविरोधिपरस्परपादप्रहारफलं शास्त्रं महापचारावहत्वात् स्वस्वरूपविरुद्धमित्यर्थः।

एवं स्वर्गादिप्राकृतफलसाधको वेदभागोऽप्यनेन व्याख्यातः। तथा हि—वेदभागाः 'वेदाक्षराणि यावन्ति' इत्युक्तात्युत्कृष्टवेदराशिघटका अपि सुदारुणैः अतिक्रूरैरर्थैरन्विताः। तदेवाह असकृदिति। असकृत् भ्रमतां इतस्ततस्सञ्चरतां पशुगणानां अजधेन्वादीनां अ[ा]ङ्घ्रिपादपर्यन्तं पीडितं सर्वावयवविशसनं येषु तथोक्ताः न केवलं पशूनां यथेच्छप्रचारभङ्गमात्रं क्रियते। किं त्वामूलाग्रं विशसनमनुशिष्यत इति भावः। अत एवाह उपरिचरः— 'पशुयज्ञैः कथं हिंस्रैः मादृशो यष्टुमर्हति' इति। अत एव विरसैः वैरस्योत्पादकैः रसरूपब्रह्मकथाविधुरैर्वा, स्वभावतः कठिनैश्च पूर्वमीमांसापरिश्रममन्तरेण दुरवगाहसूक्ष्मप्रमेयैः, एतेन स्वल्पाङ्गवैकल्ये-

ऽपि 'पशुवधपरिशेषान् पण्डितो नामयज्ञान्' इत्युक्तप्रत्यवायबाहुल्यं दुष्परिहरमिति सूचितं, खलैः असारभागैः अलं पर्याप्तं केषां भगवत्कटाक्षलब्धशमदमादिरूपकर्मफलसमृद्धानां 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादिभिरनभिसंहितफलमनुष्ठितानां कर्मणां शमदमाद्युत्पादनद्वारेण ज्ञानयोगोपयोगिताप्रतीत्या तादृशशमदमादिफलशालिनां कर्मभागोऽकिञ्चित्कर एवेति भावः । अतस्तेषामुत्तरभागाभ्यसनमात्रं भवत्विति फलितार्थः ।

एवं स्वर्गादिपरतयापि । अधिकं सुखं, कशब्दस्सुखवाची, उन्नताः उत्कृष्टाः 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं तत् स्वर्गाख्यं परमं सुखम्' इत्युक्तेः । तैः, सुदारुणा सर्वफलप्रदेन कल्पवृक्षेण अन्वितैः, असकृत् भ्रमन्तः घटीयन्त्रवदारोहावरोहपरम्परामनुभवन्तः, यद्वा रसकृदिति पदच्छेदः, रसकृत्सु रसवृद्धिकारिषु, नन्दनोद्यानादिषु भ्रमन्तः पर्यटन्तः ये पशुगणाः 'यथा पशुरेवं स देवानाम्' इति श्रुतिप्रतिपन्नदेवगणभारवहनादिकार्यलब्धपशुनामभाजः स्वर्गगामिपुरुषाः तेषामङ्घ्रिणा पीडिताः विमर्दिताः तैः, विरसैः 'स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः' इत्युक्तपतनकालस्मरणजनितदुःखभूयिष्ठैः स्वभावतः कठिनैः 'निर्धूतेतरपारतन्त्र्यनिरयाः' इत्युक्तेतरपारतन्त्र्यदुःखबहुलैः, आदित आरभ्य दुःखात्मकत्वमनेनोक्तं कालक्रमेण रसहानिः विरसैरित्युक्तमिति न पौनरुक्त्यं, खलैः खे लीयमानैः स्वर्गादिभिः असारैर्वा 'नार्थे नस्तृणमन्यदन्यदपि वा' इत्यनेन तृणप्रायतोक्तेः । तादृशैः स्वर्गादिलोकैरलं केषां विधिसिद्धात्मगुणविवेकादिशालिनां नित्यानन्दमहापुरुषार्थे अल्पयत्नसिद्धे परिमितसुखदोषबहुलस्वर्गाद्यपेक्षाऽनुचितैवेति भावः ।

एवं नवग्रहपरतयापि । अधिकोन्नतैरपि परमोच्चस्थानस्थितैरपि, सुदारुणेन क्रूरतरेण पापग्रहेण अन्वितैः सम्बद्धैः, असकृत् भ्रमन्तः गगनतले पर्यटन्तः ये पशुगणाः मेषवृषभादयः छत्रिन्यायेन पशुघटितसमुदायाः पशुशब्देन बोध्यन्ते । तेषां अङ्घ्रिषु सपादनक्षत्रद्वयरूपतत्तद्राशिघटकपादेषु पीडितं सम्बन्धो येषां तैः तत्तद्राशिसङ्क्रमशालिभिरि-

त्यर्थः । विरसैः परस्परशात्रवादिमद्भिः । स्वस्य भावः स्थानं तेन कठिनैः स्वयं शुभा अपि स्वाधिष्ठानस्थानभेदात् पापफलप्रदा अपि जायन्त इत्युक्तमेव पूर्वम् । तादृशैः खलैः गगनचारिभिः ग्रहैरलं केषां विधिना पूर्वकर्मवशेन सिद्धाः प्राप्ताः नैकगुणाः अनेकप्रकाराः सस्यसम्पदः फलसम्पदः येषां तेषां तत्तत्कर्मानुगुणफलसम्भवज्ञानवतां, तथा च सर्वं कर्मानुगुणमेव फलतीति निष्कृष्टज्ञानवतां बहुविधोत्सर्गापवादादिबहुळनवग्रहादिविचारो नावश्यक एवेति भावः । अत एव वेदान्तिनश्शुभाशुभप्रसङ्गेषु भगवत्सङ्कल्पविभवमेवोद्गिरन्तीति ॥ ११ ॥

---

मुक्ताहारनिषेविता अपि न तद्वृत्त्यै दिशन्त्यन्तरं
बन्धे गाढविमर्दनेऽपि न जहत्यन्योन्यसंपीडनम् ।
उष्णे शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णतां
कामान्तःपुरचेटिकाकुचतटीकाठिन्यवन्तः खलाः ॥ १२ ॥

उक्तं हि पूर्वश्लोके स्वभावकठिनैरिति तत्प्रकारं च सदृष्टान्तं विशदयति—मुक्तेति । मुक्ताहारं यथा तथा परित्यक्तभोजनादिव्यापारं यथा तथा निषेविता अपि, अहोरात्रं कैश्चित् समाश्रिता अपि तद्वृत्त्यै तेषां जीवनाय, अन्तरं अवकाशं न दिशन्ति न प्रयच्छन्ति, यद्वा तेषां वृतिः आवरणं तस्यै अन्तरं अधोवस्त्रमपि न दिशन्ति, 'अन्तरं बहिर्योगोपसंव्यानयोः' इति सूत्रेण तदर्थलाभात्। तथा च भोजनार्थमाहारं आच्छादनार्थमधोवस्त्रमपि वा न ददतीत्यर्थः। अथवा तेषां वृतिः वरणं इष्टप्रार्थनं तस्यै अवकाशं न ददति बहिर्द्वारे अहोरात्रं निषेविता अपि तेषां स्वसेवामपि न प्रयच्छन्तीत्यर्थः । अन्तः प्रवेशमपि नानुमन्यन्त इति यावत्। तत्र हेतु र्मनःकाठिन्यमेवेति भावः । तर्हि तेषां निर्बन्धकरणेन पीडाभिसन्धिः परित्याज्यतामित्यत्राह बन्ध इति । बन्धनञ्च कारागृहादौ निर्बन्धकरणं गाढविमर्दनं च सम्यक् प्रहरणादिकं तस्मिन् कृतेऽपि अन्योन्यसंपीडनं

61


# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्बेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २२] कलि ५०४९ सर्वधारि { मीन वृषभ } साधारण सं ७, ९
५०५० विरोधि
विरोधि { मेष मिथुन } शास्त्रानुबन्ध सं ८, १०
आहत्य ,, १०


## राष्टभाषा (2) ॥


(Pandit K. S. Ramaswami Sastri, Baroda.)


संस्कृताभिमानिनस्तु बहवो दक्षिणोत्तरभारतीया एवं मन्यन्ते यन्नूतनायां हिन्दीभाषायामभ्यसनीयायां कुतो वा तादृश्येव संस्कृतभाषा सर्वभारतीयाभिमता राज्यशासने प्रजाशिक्षणे च मुख्यतया नाद्रियत इति । विश्वविद्यालयविभागेषु च विना संस्कृतमन्यत्र न तावानुच्चकक्ष्यारूढो ग्रन्थसङ्ग्रह इति उच्चतमाभ्यासः संस्कृते भवत्विति ते मन्यन्ते ।

सर्वमिदं तु पुनः पुनश्चिन्त्यमानं महान्तं व्यामोहमेव जनयति । अर्थनिश्चयश्च दूरे । राज्यशासितारश्चान्यस्मिन्नेवावश्यनिर्वर्तनीये मतिं विदधति । अथवा मन्यन्ते लोकसभया निर्णेयमर्थमेनम् ।

सति चैवं भारतीयैर्बालकैः प्रथमवर्गादारभ्य क्रमशः चतस्रो भाषाः अध्येया भवन्ति । अन्ये चातिप्रवृद्धाः गणितेतिहासविज्ञानभूगोलपरिज्ञानादयः प्रभेदा अतिभारभूता भूयसाऽनुपयोगिनो भाविनि जीवितसमये भवन्ति मुख्यतयाऽध्येयाः परीक्षार्हाश्च सम्पादयितव्याः । इयं च विद्यमाना स्थितिर्बालकानां शक्तेरुत्साहस्यायुषश्च धनस्य च महान्तमाघातमुपजनयन्ती प्राक्तनराज्यशासितणां कर्मनिर्वर्तनाय केवलमुपयुक्ता-

सीत् । सा चेदानीं शोचनीया स्थितिः स्वतन्त्रे भारते नूनं परिवर्तनमर्हति । यत्तेषां बालकानां भाविजीवनसमये बहूपयुक्तं भवेत् तदेव तेभ्यः शिक्षणीयम् । येषाञ्च गणितविज्ञानादिषु सुलभप्रचारा बुद्धिर्भवति तेषां कृते तत्प्रधानाः पाठशालाः मध्यमवर्गीयाः संविभज्य ते बालकास्तत्र नियोजयितव्याः ये भाविनि काले अतीव लोकोपयोगिनो भवेयुः ।

चतसृषु च पूर्वोक्तासु भाषासु साहित्यस्य सम्यगध्यापनं भाषाद्वयस्य प्राधान्यं अन्ययोर्गौणतेत्येवं शिक्षणाय पृथक् पाठशाला भाषाप्रधानाः अन्येषु भूगोलपरिज्ञानादिविषयेषु सामान्यतः शिक्षां विदधत्यः संपादयितव्याः । इतश्चांगलादिभाषापरिज्ञानं विशिष्टरूपेण गृहीत्वा कतिपये विद्यावन्तः देशान्तरेषु भारतीयानामुपयोगीनि कर्माणि सगौरवं विदध्युरिति नांगलभाषाया अद्यापि भारते सर्वजनाध्येयता कैश्चिदांगलभाषापण्डितैरभिधीयमाना युक्ततमा प्रतिभाति । नात्युपयुक्तानां देशान्तरीयभूगोलेतिहासादीनां विपुलस्य च गणितस्य विस्तृततमं वर्णनमवश्याध्यापनं च यद्बालकेभ्यः क्रियते विशिष्य च बालिकानां तत्केवलं तेषां परीक्षायामनुत्तीर्णतासंपादनायैवेति नूतने राज्यविपरिवर्तनेऽपि कथमेतदद्याप्यनुवर्त्यत इति विद्याधिकृतैर्विभावनीयम् । प्राप्तेऽपि स्वातन्त्र्ये अविद्यातिमिरान्धतां निवर्तयितुं न पुरतोऽवतरन्ति परदेशीयभाषयैव प्राप्तप्रागल्भ्या विद्यावन्तः । आङ्गलभाषाया निराकरणे संभाव्यमाने आत्मनाशमेवापतन्तमद्यापि ते चिन्तयन्ति । स्वतन्त्रभारते च तत्तद्देशीयभाषया तृप्ता बहवः सामान्यजनाः स्त्रियश्च । हिन्दीभाषायामवगतायां विशिष्टतमं परिज्ञानं संपादितं मन्येरन् । आङ्गलसंस्कृतयोरवगमनेन सर्वदेशोपयोगिता भारतीयसंस्कारानुवृत्तिश्च सुदृढा भवतीति भाषारसिकैर्विभावनीयम् । इत्थं च त्रिविधाः पाठशालाः भारतीयानां बालकानां बालिकानाञ्च संविधातव्या भवन्ति । प्रावेशिकी मध्यमा उत्तमा चेति । षष्ठवर्षमनुभवंश्च बालको विद्यागृहं प्रविष्टः सप्तदशवर्षाण्यधीत्य सर्वमध्ययनं समापयेत् । त्रयोविंशतितमे च वर्षेऽधीताशेषविद्यो भवेत् ।

प्रावेशिकीषु शालासु सप्त वर्षाणि । यत्र चतुर्षु वर्षेषु देशीभाषाया

हिन्दीभाषायाश्च प्रारंभः क्रियेत सह सामान्यगणितेन । ततस्त्रिषु वर्षेषु संस्कृताङ्गलगणितविज्ञानेतिहासादीनामारम्भो भवेत् । हिन्दीभाषा तु भूगोलेतिहासपाठेषु व्यापारयितव्या न स्वातंत्र्येण साहित्याध्यापने । देशीभाषायां तु साहित्यं संस्कृतेऽपि नीतयः पाठरूपेणाध्यापयितव्याः ।

एवं प्रावेशिकविभागे समाप्ते मध्यमवर्गः प्रारभते, यत्र षड्-वर्षाण्यपेक्ष्यन्ते । एतदर्थे च त्रिधा पाठशालाः संविधातव्याः । गणितेति-हासविज्ञानेषु प्राप्तप्रागल्भ्यानां छात्राणां कृते तन्मात्राध्यापनाय शाला काचित् प्रथमा, यत्र सामान्यतो देशीभाषा पठ्येत । गणितादयश्च आङ्गल-भाषयैव शिक्ष्येरन् । हिन्दीसंस्कृतयोरस्यां शालायां न भवेत्समावेशः ।

द्वितीया तु शाला देशीहिन्दीभाषयोः प्राधान्येन संस्कृताङ्गलयो-र्गौणतयाऽध्यापनायापेक्ष्यते । अत्र गृहीतविद्याश्च स्वप्रदेशे समस्तभा-रते च व्यवहरेयुः । गणितादिकञ्च सामान्यत एतेभ्यो बोधनीयम् ।

तृतीया चाङ्गलसंस्कृतयोः प्राधान्येनाध्ययने अन्येषां च विषयाणां यथोचिताध्यापने च समुपयुक्ता संविधातव्या । अत्राधीतविद्या भारतस्य विदेशीयसंपर्कसाधनायोपयुक्ता भवेयुः, तथा स्वदेशेऽपि ।

उत्तमासु तु शालासु गणितविज्ञानविभागः आङ्गलभाषया भवितु-मर्हति । सति संभवे हिन्दीभाषया देशीभाषया च । भूगोलेतिहासादयश्च हिन्दीभाषयैव ।

अन्यत्सर्वं देशीसंस्कृतभाषासु भवेदिति विषयोऽयं गहनतमोऽपि विद्यावतां पुरतः विशेषतो विचाराय यथोचितपरिवर्तनाय च सप्रमोदं समुपस्थियते ।

---

# मिथ्या गौरवम् ॥

धूमशकटे प्रयान्त आस्म । तत्र एकस्य शकटस्य एकस्मिन् भागे अन्योन्याभिमुखं आसनफलकद्वयमासीत् । एकैकस्मिन् चतुर्णामुपवेष्टु-मवकाशः पर्याप्तः । अथापि यथाशीलं प्रयाणिसङ्घातस्य अतिमहत्त्वात्

सर्वेषु शकटान्तरेष्विव अत्रापि एकैकस्मिन् फलके अष्टावरा उपविष्टा अभवन्। फलकद्वयान्तराले अतिनिबिडं तिष्ठन्तो बहवः। सम्मर्दः सुमहान्। स्वच्छन्दं श्वसितुमपि न सौकर्यम्। स्थानकेषु शकटे स्थिते घर्ममसहमाना जनाः कदा शकटश्चलिष्यतीति पर्युत्सुका अभवन्।

प्रतिस्थानकं शकटारोहिणो जनाः सुबहवः। द्वारं द्वारं गत्वा प्रतिरुद्धाः अन्ते क्वचित् युद्धेन प्रवेशं लभमाना आसन्। अनेन क्रमेण कस्मिंश्चित् स्थानके अस्मदास्थितं शकटं कश्चिदारोहति स्म। नातिह्रस्वः नात्युच्चः। नातिकृशः नातिस्थूलः। कृत्तकेशः कृतमुखक्षौरः शून्यललाटः आकूर्परकञ्चुकः चण्डातकी अनावृतजानुः वस्त्रपट्टसंवीतजङ्घः गुल्फपदत्रपिहितचरणः उष्णीषपिटकं हस्तेन धरन् सः गाढसम्मर्दतया अतिक्लिष्टवृत्तिषु तत्रत्येषु उपविष्टेषु अनुपविष्टेषु च सर्वेषु स्वयमासनापेक्षी साचि साचि दृष्टिं परितः प्राहिणोत्। न क्वचित् अङ्गुलमात्रमपि स्थानमदृश्यत। एवं व्यग्रः कतिपयान् क्षणान् गमयामास। 'मयाऽपि नाम कथं तिष्ठतैव भवितव्यम्' इति स्वगौरवभङ्गबुद्धिरुद्भूता तं बलवत् पीडयति स्म इति अशान्तिबहुलात् तस्य आकारात् स्फुटमज्ञायत।

अथ प्रधाने कस्मिंश्चित् स्थानके शकटः अतिष्ठत्। एकतरफलके उपविष्टः कश्चित् शनैरुत्थाय यत्नेन मार्गं कृत्वा इक्षुयन्त्रस्तम्भान्तराले इक्षुदण्ड इव अतिनिबिडं तिष्ठतां मनुष्याणां अन्तराले पीडितगात्रः प्रविश्य फलाहारक्रयणाय शकटादवारोहत्। 'अयं समयः' इति कृत्वा सः आसनान्वेषी स्वस्य पुरतस्तिष्ठतो जनान् प्रणुद्य उपद्रवन् आगत्य बहिर्गतस्य स्थाने पार्श्वद्वयवर्तिजनस्कन्धसङ्घर्षसङ्कटं कथञ्चिदुपविष्ट आसीत्। अथ शकटस्य प्रस्थानकाले आगते बहिर्गतः पूर्ववदेव अतिश्रमेण प्रत्यावृत्य स्वस्थानमन्येनाक्रान्तं पश्यन् विषण्णोऽभवत्। क्रुधा ज्वलन् अब्रवीच्च-'कथमार्य, यः कश्चिदिव फलाहारक्रयणाय गतवतो मम स्थाने उपविष्टोऽसि? नैतन्न्याय्यम्। विसृज मे स्थानम्।' इति। किमुत्तरं ब्रूयात् तपस्वी? गात्रं किञ्चिच्चलयति स्म; वह्नचमत्कारश्च्योति किञ्चित् स्मितमकरोच्च। न तु स्थानादुदतिष्ठत्। स्थानी च पूर्वमेव पीडितान् जनान् अतितरां पीड-

यन् स्वयमपि तत्र उपवेष्टुं प्रारभत। स्वस्थानाक्रमिणं प्रति तस्य मुखे अभिव्यक्ता अवज्ञा 'किमयं मनुष्यकोटिगणनामर्हति ?' इति तदीयमाशयं अनक्षरमावेदयति स्म। तिष्ठता तेन स्वगौरवं रक्षितं स्यात्। उपविष्टेन तु नाशितम्।

---

# केचन विशेषाः॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

**काँश्चिद्विषयानधिकृत्य विदुषां विचारः प्रावर्तत। तत्र यस्सिद्धान्तः संवृत्तः सोऽत्र सङ्क्षिप्यते।**

तैत्तिरीयोपनिषदि शिक्षावल्यां 'ऋतञ्च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने च। ... ... सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः।' इत्ययं नवमोऽनुवाकः। अत्र शङ्करभाष्यम् — 'विज्ञानादेवाप्नोति स्वाराज्यमित्युक्तत्वात् श्रौतस्मार्तानां कर्मणामानर्थक्यं प्राप्तमित्येतन्माप्रापदिति कर्मणां पुरुषार्थं प्रति साधनत्वप्रदर्शनार्थमिहोपन्यासः। ऋतमिति। व्याख्यातम्— स्वाध्यायः अध्ययनं, प्रवचनं अध्यापनं ब्रह्मयज्ञो वा। एतान्यृतादीन्यनुष्ठेयानीति वाक्यशेषः। ... ... सर्वैरेतैः कर्मभिर्युक्तस्यापि स्वाध्यायप्रवचने यत्नतोऽनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्यायप्रवचनग्रहणम। स्वाध्यायाधीनं ह्यर्थज्ञानम। अर्थज्ञानाधीनं च परं श्रेयः। प्रवचनं तदविस्मरणार्थं धर्मवृद्ध्यर्थं च। ततः स्वाध्यायप्रवचनयोरादरः। सत्यमिति। सत्यमेवानुष्ठेयमिति ... राथीतर आचार्यो मन्यते। तप इति। तप एव कर्तव्यमिति ... ... पौरुशिष्टिराचार्यो मन्यते। स्वाध्यायप्रवचने एवानुष्ठेये इति नाको नामतः मुद्गलस्य अपत्यं मौद्गल्य आचार्यो मन्यते। तद्धि

तपः। यस्मात् स्वाध्यायप्रवचने एव तपः तस्मात् ते एवानुष्ठेये इति। उक्तानामपि सत्यतपस्स्वाध्यायप्रवचनानां पुनर्ग्रहणमादरार्थम्' इति। अत्र रङ्गरामानुजमुनिभाष्यम् — 'ब्रह्मविद्याङ्गमनुष्ठेयं कर्माह ऋतं चेत्यादिना। ऋतं सूनृता वाणी। स्वाध्यायः वेदाध्ययनम्। प्रवचनं अध्यापनम्। ऋत-स्वाध्यायप्रवचनानि नित्यानुष्ठेयानीति वाक्यार्थः।...स्वाध्यायप्रवचने एव प्रधानं तदेव प्रथमं तप इति नाको मौद्गल्यो मन्यत इत्यर्थः' इति। एत-द्भाष्यैतदनुसारिग्रन्थेषु विशदेषु जागरूकेष्वपि एनमनुवाकमुपादाय एत-दनुवाकस्थानि स्वाध्यायप्रवचनपदानि मनसिकृत्य 'वेदपुरुषः तत्त्वज्ञानो-पदेशमेवोत्कृष्टं धर्मं निरधारयत' इति केचिद्वदन्ति।

अथ अवत्यन्ताः परस्मैपदिनः इति प्रक्रम्य पठितो गत्यर्थश्चरधातुः परस्मैपदी। अस्मात् 'उदश्चरस्सकर्मकात्' 'समस्तृतीयायुक्तात्' इति सूत्रा-भ्यामात्मनेपदमनुशिष्यते। अतः 'आचिनोति' इत्याचार्यलक्षणपद्ये 'स्वयमाचरते' इत्यत्र आङ्पूर्वाच्चरधातोरात्मनेपदं नोपपद्यते। अत्र स्वरित-ञित्त्वाभावेन 'यजते, कुरुते' इत्यादाविव 'स्वरितञितः कर्त्रभिप्राये क्रिया-फले' इति सूत्रानुशिष्टात्मनेपदं न प्रवर्तते। 'अपि माषं मषं कुर्यात् छन्दो भङ्गं त्यजेद्गिराम्' इति न्यायेन 'षष्ठं गुरु विजानीयात्' इति छन्दोलक्षण-भङ्गभयात् 'जयतां राघवस्सङ्ख्ये पौलस्त्यान् रजनीचरान्' इतिवत् व्यत्य-येनात्मनेपदं प्रायुज्यत। अतः आचरत इत्यत्र 'ईदृशधर्मानुष्ठानं स्वार्थ-मित्येतन् ते इत्यात्मनेपदप्रत्ययः प्रदर्शयति' इति व्याख्यानस्य नावसरः। क्रियाफलस्य कर्तृगामित्वं तु स्वयं शब्देन प्रतीयेतेति न विवक्षितार्थ-हानिः।

काव्यप्रदीपादौ दोषप्रकरणे दूषकताबीजं तत्र तत्रोच्यते। दूषक-शब्दो दैवादिकात् दुषवैकृत्ये इति धातोर्णिचि गुणे दोषि इत्यत्र 'दोषोणौ' इति सूत्रेणोपधाया ऊकारे ण्वुलकादेशे णिलोपे निष्पद्यते। तस्मात् दूषकताबीजमित्येव वक्तव्यम्। शब्दार्थादिदोषनिरूपणावसरे चित्त-दोषरूपचित्तविरागस्यावकाशाभावात् 'वा चित्तविरागे' इति सूत्रेण पक्षे दोषकताबीजमिति न भवत्येव।

केषुचित् शाकुन्तलपुस्तकेषु द्वितीयाङ्के 'स्रोतस्स्रोतोवहो यथा' इति

पाठो लक्ष्यते। अन्येषु तत्पुस्तकेषु तत्र 'स्रोतस्स्रौतोवहं यथा' इति पाठो दृश्यते। अत्र स्रोतोवह इति पाठो न युज्यते। स्रोतो वाहयतीति विग्रहे णिजन्ताद्विचि स्रोतोवाह इति भवितव्यम्। स्रोतश्शब्दे उपपदे वहेर्ण्वि-प्रत्ययो नास्तीति परिभाषेन्दुशेखरतोऽवगम्यते। स्रोतोवट्छब्दसाधुत्व-समर्थनपरं 'स्रोतोवहः अन्येभ्योऽपि दृश्यते इति कर्तरि विच्' इति व्याख्यानं तु कालिदासेनान्यत्र नदीप्रतिपादनाय स्रोतोवट्छब्दस्याप्रयो-गात् स्रोतोवहाशब्दस्य प्रयोगात् न घटते। तस्मात् स्रोतोवहाया इदं स्रौतोवहमित्यर्थकमणणन्तं स्रौतोवहमिति पदमेवात्र समञ्जसम्।

शाकुन्तले प्रवेशितयोः कण्वमारीचयोः ध्याने सति सर्वं प्रत्यक्षं भवति न तु सर्वदा प्रत्यक्षम्। चतुर्थाङ्के निबद्धः 'अथ केनाख्यातोऽयं तातकाश्यपस्य वृत्तान्तः। अग्निशरणं प्रविष्टस्य छन्दोवत्या वाचा। (सहर्षं) कथय, कथय। दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः। अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥' इति प्रियंवदानसूयासंवादः अन्यच्च अज्ञातज्ञापितशकुन्तलावृत्तान्तस्य कण्वस्य ध्याने सत्येव सर्वं प्रत्यक्षं भवतीत्यत्र प्रमाणम्। अत एव सप्तमाङ्के कण्वविषये 'तपः प्रभावात्प्रत्यक्षं सर्वमत्रभवतः' इति मारीचवाक्ये तपःप्रभावादिति प्रतीकं धृत्वा 'सति ध्याने सर्वं प्रत्यक्षमित्यर्थः। अतो नात्र सन्देष्टव्य-मिति भावः' इति सारार्थदीपिकायां तद्वाक्यस्य भावोऽवर्ण्यत। मारी-चस्य ध्याने सत्येव सर्वं प्रत्यक्षमित्यत्र 'यदैवाप्सरस्तीर्थावतरणात् प्रत्या-देशविक्लबां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादव-गतोऽस्मि दुर्वाससश्शापादियं तपस्विनी सहधर्मचारिणा त्वया प्रत्यादिष्टा नान्यथेति। स चायमङ्गुलीयकदर्शनावसानः' इति तदीयवाक्यं प्रमाणम्। किं बहुना। वसिष्ठस्यापीदृश्येव स्थितिः। अत एव श्रीरामस्य भावि-वनगमनमनवगत्य यौवराज्याभिषेकाय स प्रायतत। रघुवंशे प्रथमसर्गे 'इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः। क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः॥ सोऽपश्यत् प्रणिधानेन सन्ततेस्तम्भकारणम्। भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत॥' इति श्लोकाभ्यां वसिष्ठस्यातीन्द्रियज्ञानं ध्या-

नादेव प्रत्यपादयत। कण्वादीनामस्माकं चायं विशेषः। कण्वादीनां ध्याने सति अतीन्द्रियज्ञानं भवति नास्माकमिति। 'यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः' इत्युक्तं सार्वज्ञ्यं तु तेषामपि मुक्तावेव भवेत् न संसारदशायाम्। अतः कण्वो ध्यानाभावात् शकुन्तलाया भाविप्रत्याख्यानमविदित्वैव तां दुष्यन्तं प्रति प्रैषयदिति वचनं समञ्जसमेव भवति। बुद्धिपूर्वकशकुन्तलाप्रेषणवचने तस्य,शापवृत्तान्तमप्रतिपाद्य बुद्धिपूर्वकशकुन्तलाप्रत्याख्यानवचने दुष्यन्तस्यैव निर्दयत्वं प्रसजेत्।

शिक्षाशब्दो नानार्थकः। शिक्षविद्योपादाने इति धातोः 'गुरोश्च हलः' इत्यप्रत्यये टापि शिक्षाशब्दो निष्पद्यते। अयं रूढ्या विद्याङ्गेष्वन्यतमं बोधयति। शक्लृ शक्तौ शक मर्षणे इत्याभ्यां सन् प्रत्यये 'अप्रत्ययात्' इति अकारप्रत्यये टापि अपरशिक्षाशब्दो निष्पद्यते। विद्योपादानार्थकशिक्षधातोः धातूनामनेकार्थत्वेन दण्डनार्थत्वात् ततो निष्पन्नस्य शिक्षाशब्दस्य दण्डरूपेऽप्यर्थे प्रयोगो भवति। पञ्चनदविद्याशालाभूतपूर्वप्रथमाध्यापकसेतुमाधवाचार्यविरचिता अमुद्रिता भावबोधिनीनाम्नी शेखरव्याख्या विराजते। तत्र 'तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्' इति शेखरवाक्ये तच्छब्दस्येति प्रतीकमुपादाय 'साक्षिणो विचार्य तस्य शिक्षा विधेयेत्यादौ बुद्धिस्थत्वादिनां परामर्शादिति भावः।' इति व्याख्यायत। अस्मिन् वाक्ये उपादीयमानस्य शिक्षाशब्दस्य दण्डादन्योऽर्थो वर्णयितुं न शक्यते। अत्र व्याख्याने अन्यदीयः प्रामाणिकप्रयोग एव प्रादर्श्यत। अतोऽत्र व्याख्यातृकल्पितवाक्यत्वबुद्ध्या अप्रामाणिकत्वशङ्का नावकाशं लभते। शिक्षधातोरत्रार्थे भगवतः श्रीवेङ्कटनाथस्य बहवः प्रयोगा उपलभ्यन्ते। श्रीमद्रहस्यत्रयसारान्तर्गते अपराधपरिहाराधिकारे, उपरिशिक्षाकरणार्थम्, कठिनप्रकृतीनां शिक्षारूपदण्डविशेषं, शिक्षकस्य शेषिणः समीपे, अपराधक्षापणाभावेऽपि शिक्षारूपदण्डविशेषो नास्ति, कौटिल्ये सति शिक्षयाप्यनपयन् इति, चरमश्लोकाधिकारे, शिक्षा कठिनचेतसाम् इति च प्रयोगा दृश्यन्ते। दण्डरूपार्थे शिक्षाशब्दप्रयोगः सुप्रसिद्ध एवेत्युपपादनं नापेक्षते।

---

65

# नाटककथासारः ॥

(T. Venkatacharya, B. O. L.)

IV

अलीकविवाहविडम्बितः क्रुद्धश्चारायणो देवीं मेखलाञ्च प्रतिप्रतारयामास। तस्मिन् अवसरे राजापि सन्निहित आसीत्। परं तु तदर्थं स्वसुहृदं किमपि नावादीत्। स्वप्रतारणे प्रवृत्तं चारायणं नाशिक्षयदिति राज्याः राजनि कोपो बभूव। तेन चारायणस्य पुरतः स्वभर्ता कथञ्चित् वञ्चयितव्य इति तया निश्चितम्। मातुलपुत्र्याः पुत्र इति प्रथितायाः "मृगाङ्कवर्मा" इति नाम बभूव। तस्य पूर्ववत् देवी महिलावेषमकारयत्। "मृगाङ्कावली" इति स्त्रीजनोचितं नाम कार्यनिर्वाहार्थं चक्रे। कृतमहिलावेषेण मातुलपुत्रेण सह विवाहसम्पादनेन महीपतिं प्रतारयितुं सङ्कल्पयामास। "एषा मृगाङ्कवर्मणः स्वसा। नाम्ना मृगाङ्कावली। स्नेहेन भ्रातरं द्रष्टुमिहागता। "ज्यौतिषिकैः 'चक्रवर्तिनः कस्यचित् गृहिणी भविता' इति कथिता इयं त्वया सदृशवराय दापयितव्या' इति वार्ता मम मातुलान्या हारलतया प्रहिता। भवन्तमन्तरेण नान्यः अस्याः सदृशः पतिः इति मेऽभिप्रायः। अत इमां परिणयतु आर्यपुत्रः" इति सन्देशं विचक्षणाख्यसखीमुखेन स्वभर्त्रे प्रैषयत्।

इतःपूर्वमपि बह्वीभिः कन्याभिः राज्ञः विवाहं देवी स्वयमेव निरवर्तयत्। तेन मृगाङ्कावलीविवाहेन राज्ञी आत्मानं वञ्चयिष्यति इति मतिस्तस्य नाभूत्। अतः वस्तुतः विवाहो भविता इति मत्वा नरपतिः तत्प्रार्थनामभ्युपेयाय।

ग्रीष्मतापं सोढुमशक्तो विद्याधरमल्लः विनोदार्थं सुहृदा सह वासगृहात्प्रतस्थे। मध्येमार्गं क्वचित् वयस्याभिस्साकं दोलया क्रीडन्तीं मृगाङ्कावलीं ददर्श। "अस्या आत्मा ते दापित इति विचक्षणामुखाज्ज्ञायते, अपि तद्वास्तवं" इति चारायणो राजानं पप्रच्छ। "स्वप्नलब्धः तस्यै

प्रतिदत्तः हारः, पूर्वलेखे यः पादेन अपूर्णः आसीत् स श्लोकश्च आपूर्य अद्य पुनस्तया उपहारीकृतः" इति स प्रत्यवादीत्।

"विधत्ते सोल्लेखं कतरदिह नाङ्गं तरुणिमा
तथापि प्रागल्भ्यं किमपि चतुरं लोचनयुगे।
यदादत्ते हृदयादखिलमपि भावव्यतिकरं
मनोवृत्तिर्द्रष्टुं मुखरयति हृदयं प्रतिजनम्॥"

इति पूर्णं तस्याः श्लोकं अनुवाच्य श्रावयामास। एवं संलपतोस्तयोः चेट्यः काश्चिदेत्य "आसन्नं लग्नं, विवाहचतुष्किका अध्यास्यतामिति देवी विज्ञापयति" इति न्यवेदयन्। राजा च यथानिर्देशमधिष्ठाय राज्ञीं प्रतिपालयामास।

पुरा नर्मदातः स्नातोत्थितां चण्डमहासेनस्य पुत्रीं कुवलयमालां दृष्ट्वा महीपतिस्तस्यामनुरक्तो बभूव। इदं विज्ञाय देवी सापत्न्यनिवारणमभिप्रेत्य कुवलयमालां स्वमातुलपुत्राय दापयितुमैच्छत्। तेन, कृतवधूवेषं मातुलपुत्रं तत्पत्नीत्वेन संकल्पितां कुवलयमालां च सह कृत्वा देवी विवाहार्थं सन्नद्धं राजानमुपागच्छत्। "हुतवहे हूयन्तां लाजाः" इति कथयन्ती मृगाङ्कावल्याः पाणिं ग्रहीतुं भर्तारं प्रार्थयत। नरपतिरपि अग्निसाक्षिकं तां परिणिनाय। मातुलपुत्रीं पुत्र इत्येव अद्यापि जानती भ्रान्ता देवी पार्श्ववर्तिनीं कुवलयमालां विलोक्य "पश्य पश्य त्वद्भर्तारं राज्ञा परिणीयमानं" इति सान्तर्हासमवोचत्। सत्येवं प्रतीहारी काचित् प्रविश्य "देव देवीमातुलस्य चन्द्रवर्मणः प्रधानदूतेन सह आर्यभागुरायणः द्वारे तिष्ठति" इति व्यजिज्ञपत्। "अविलम्बितं प्रवेशय" इति देवी तामादिदेश। भागुरायणपुरस्सरं प्रविष्टो लाटपतेर्दूतः चन्द्रवर्मप्रेषितं सन्देशमवेदयत्। "पुरुषवेषेण त्वत्सकाशे वर्तमाना सा मम सुतैव पुत्राभावात् पुरुषवेषमापाद्य तां पुत्र इति प्रथितवान्। अमात्यभागुरायणेन पुत्रावकल्पच्छद्मना त्वन्नगरमानायिता। दैवानुग्रहात् अद्य मम पुत्रो जातः। अत इतःपरं सा यथास्वरूपं स्थापनीया। दैवज्ञाश्च एनां चक्रवर्तिनः पत्नीं भवित्रीं कथयन्ति। तेन, सरूप-

वराय त्वयैव देया" इति देव्यै मातुलस्य सन्देश आसीत्। अमुं सन्देशमाकर्ण्य "अहो दैवदुर्ललितस्य चेष्टितं! यत् मया परिहासक्रीडाच्छलेन परिकल्पितः अलीकविवाहः सत्यः संवृत्तः" इत्यन्तश्चिन्तयन्ती देवी पश्चात्तापमयासीत्। किन्तु स्वदोषं गोपयितुकामा "मातुलसन्देशमन्तरेणापि मया परिणायितैव एषा" इति प्रकटमवादीत्।

सर्वमिदं अमात्यभागुरायणेन निर्वर्तितम्। स खलु नृपतेर्वासमन्दिरं अपूर्वं किञ्चित् शिल्पिपुंगवैः निरमापयत्। विचक्षणाख्यसखीद्वारा "इह वासगृहे मन्मथोऽवतरिष्यति। तस्य कण्ठे त्वया हारसमर्पणे तव तादृशः कान्तो भविष्यति" इति कथयित्वा मृगाङ्कावलीं प्रोत्साहयामास। सापि सहर्षं तदङ्गीचकार। कदाचिद्रात्रौ तस्मिन् वासगृहे राजनि स्वपति सति मृगाङ्कवलीहस्तेन यथासंकल्पं तस्य कण्ठे हारन्यासमकारयत्। एवं वस्तुतो वृत्तं हारवृत्तान्तं राजा स्वप्नरूपममंस्त। तदनु दोलया क्रीडन्तीमपि तां अमात्य एव सखीद्वारा राज्ञः दृष्टिपथमगमयत्। तस्यां नरपतेरतिशयितां अनुरक्तिं सम्पादयितुं स्फटिकमन्दिरे चित्रसालभञ्जिकादिरूपेणापि तां स एवाकारयत्। अन्ते च तदिच्छानुसारेण विवाहः समाप्तिमियाय। इत्थं स्वमतिविभवेन संकल्पितं मृगाङ्कावलीविवाहं निर्वर्त्य भागुरायणः आनन्दस्य परां कोटिमध्यगच्छत्।

समयं प्रतीक्षमाणश्चारायाणः राज्ञः किञ्चिदधिकं साहाय्यमकरोत्। तत्र पुरुषवेषे स्थितायाः मृगाङ्कावल्याः भार्यारूपेण कुवलयमाला देव्या निर्णीता। अद्य मृगाङ्कावली नरपतेः पत्नी सम्पन्ना। एवं सति "भार्यादयः यत् किञ्चित् धनादिकं आहरन्ति, तत् स्वामिनं गच्छति" इत्यर्थमभिदधतीं

"भार्या दासश्च पुत्रश्च निर्धनाः सकला अपि।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥"

इति स्मृतिं प्रदर्श्य, "मृगाङ्कावल्याः पत्नीत्वेन निश्चितायाः कुवलयमालाया अपि राज्ञा सह विवाहसम्पादनं न्याय्यम्" इति चारायणो भागुरायणं चोदयामास। तेन अमात्येन नियुक्ता देवी तस्याः विवाहमपि

निर्वर्तयामास। अत्रान्तरे श्रीवत्सनाम्नः सेनापतेः सकाशादागतः कुरङ्गाख्यो लेखवाहकः सेनापतिदत्तं लेखमानिनाय। तमनुवाच्य भागुरायणः "कार्णाटान्ध्रपाण्ड्यप्रभृतयो राजानः अस्मत्सेनया विजित्य वशीकृताः" इत्याह्लादिनीं वार्तां न्यवेदयत्। एवं चक्रवर्ती सम्पन्नः केरलपतिः प्रजाः अमात्यान् सामन्तान् सर्वांश्च अनुरञ्जयन् सकलसुखान्यनुभवन् नीतिपूर्णेन वर्त्मना महीं पर्यपालयत।

---

षेक्स्पियर् कृतं

# यथाभिमतम्॥ [II. 3.

—— o◇o ——

आडम्— अये दौर्भाग्यशालिन् युवन्, अस्य गृहस्य अन्तः नागच्छ। अस्मिन् गृहे त्वद्गुणासहिष्णुः शत्रुर्वसति। त्वद्भ्राता—अथ वा न त्वद्भ्राता, अपि तु पुत्रः, अथ वा न पुत्रः, नाहमेनं तस्य पुत्रमभिधास्यामि यमद्य तत्पितृत्वेन निर्देक्ष्यन्नासम्,—त्वत्प्रशंसावचनानि श्रुतवान्; अस्यां रात्रौ यत्र त्वं शेषे तं निवासं दग्धुमिच्छति। त्वयि अन्तःस्थिते तस्मिन् यत्ने विफले तव शिरश्छेदाय उपायान्तरं करिष्यति। तस्य संकल्पान् अहं उपाश्रौषम्। नेदं वासस्थानम्। अपि तु सूना। अस्मात् जुगुप्सस्व, बिभेहि। न प्रविश।

आलेण्डो— आडम्, कुत्राहं गच्छानि?

आडम्— यत्र क्वापि। अत्र तु नागच्छ।

आलेण्डो— किं मया गत्वा आहाराय भिक्षाटनं कर्तव्यम्? अथ वा उग्रं खड्गं धारयता जनसम्पातवति मार्गे अधमा चोरवृत्तिरवलम्बनीया? इदं विना किमन्यत् कर्तुं शक्यमिति नाहं जानामि। इदं तु नाहं करिष्यामि। यत् शक्यं तत् किमपि करिष्यामि। काममहं आत्मानं पात्रीकरिष्यामि दुर्जातेन घातुकेन भ्रात्रा क्रियमाणस्य द्रोहस्य।

आडम्— नैव तथा कर्तुमर्हसि। अन्तकाले अत्यन्तमशक्तौ जातायां आत्मनो धारणाय यत्नेन अवशेष्य सञ्चितानि त्वत्पितृसेवाकरणेन मया लब्धानि वेतनानि पञ्च शतानि स्वर्णानि मयि सन्ति। तानि त्वं गृहाण। यः गृध्राणामाहारं कल्पयति, यः चटकानां अपेक्षां अवहितः पूरयति, स मां वार्धके रक्षतु। इमानि सुवर्णानि। सर्वमिदं अहं ते ददामि। अहं ते प्रेष्यो भवानि। वृद्धो दृश्यमानोऽपि दृढः ओजस्वी चाहं अस्मि। यतः नाहं बाल्ये रूक्षोष्णानि मद्यानि उपयुक्तवानासम्। नापि निर्लज्जः कार्श्यदौर्बल्यहेतून् (स्त्रियः) अनुद्रुतवानासम्। तन्मे वयः वर्षर्तुरिव भवति यः शीतः अथापि वत्सलः। अनुमन्यस्व मां त्वामनुगन्तुम्। सर्वेषु तव कार्येषु अहं युवेव परिचर्यां करिष्यामि।

आर्लण्डो— अये गुणवन् वृद्ध, पूर्वकाले यत् स्वधर्म इति सन्ततं सेवामकुर्वन् न तु लाभमुद्दिश्य तत् त्वयि स्फुटं दृश्यते। न त्वं अस्य कालस्य अनुगुणः, यत्र केवलं प्रतिप्रयोजनाय परिश्रमं कुर्वन्ति। लब्धे फले तमेव सफलं परिश्रमं परित्यजन्ति। न तत् तथा त्वयि भवति। अथापि तपस्विन् वृद्ध, त्वमद्य जीर्णं वृक्षं संस्कर्तुं प्रवर्तसे, यस्ते परिश्रमस्य प्रतिकाराय केवलं पुष्पमात्रमपि न दर्शयिष्यति। यथा त्वमिच्छसि तथैव कुरु। आवां सहैव प्रयाव। तारुण्ये यत् त्वया आर्जितं तस्य व्ययात् पूर्वं अल्पमपि कञ्चन जीवनोपायं संपाद्य सन्तुष्येव।

आडम्— भर्तः, प्रतिष्ठतां भवान्। आर्जवेन भक्त्या च अहं चरमश्वासावधि त्वामनुवर्तिष्ये। मम सप्तदशात् वयसः प्रभृति अद्यावधि प्रायः अशीतिवर्षः अहमत्र अवात्सम्। नेतःपरमिह वत्स्यामि। बहवः सप्तदशसु वयस्सु जीविकां गवेषयन्ति। अशीतितमे वयसि कालातिक्रमो महान्। अथापि यद्यहं भर्तुरनृणो मरिष्यामि, न तु ऋणी, ततो महत्तरो मे दैवानुग्रहो नास्ति।

---

# गानम् ॥

S. Krishna, M. A.

—❀—

जाग्रति मे हृदये नन्दकिशोरे प्रेम्णि
का वा याच्ञा ? का वा तृष्णा ? जाग्रति—

गृहकृत्यव्याकुलां बहुखेदविह्वलां
इतिकर्तव्यतामूढां
मुग्धां मामाहूतो नन्दकिशोरः
भीरुं मामाहूतो नन्दकिशोरः जाग्रति—

यमुनापुलिने सान्द्रमनोरमे
चन्द्रिकाचुम्बितवालुके
मुग्धां मामाहूता मुरली सरलां,
भीरुं मामाहूता मुरली तरलां जाग्रति—

आह्वयति तस्मिन् नन्दकिशोरे
मुरलीचुम्बितबिम्बोष्ठे
का शक्ताऽवस्थातुं तरला ललना ?
विद्रुता यमुनापुलिने साहं जाग्रति—

एवं संगायति शिवरामकृष्णः
नन्दकिशोरे धृतचेताः ।
प्रीत्यै तत्स्यादिदं नन्दकिशोरस्य
श्रीजयदेवस्तुतानुरक्तेस्तस्य जाग्रति—

———

# प्रकृतिभेदः ॥

I

दधिविक्रयिणी — अम्ब, अम्ब ।

गृहिणी — (महानसे स्थिता) का तत्र ?

दधिविक्रयिणी — अहमम्ब । दधि गृहाण । पात्रमानय ।

शिशुः — (आधाव्य हस्तं प्रसार्य दधिभाण्डोपरि निधाय) अये, दधि मे देहि, अये, देहि मे दधि । उँ

दधिविक्रयिणी — तिष्ठ । अम्बा आगत्य दधि गृह्णातु । पश्चात् ददामि ।

(तथा तस्यां गृहीतवत्याम्)

जात, इदं ददामि । गृहीत्वा पिब ।

(गृहीत्वा पीत्वा)

शिशुः — अये पुनः किञ्चित् देहि मे । किं अत्यल्पं दत्वा जिगमिष्यसि ।

(गृहिणी स्मयते)

---

II

दधिविक्रयिणी — (गृहान्तरं गत्वा) अम्ब, अम्ब, पात्रमानय । दधि गृहाण ।

(गृहिण्यामागत्य गृह्णत्यां तया सह स्थितः)

शिशुः — अये दधिकारिणि, अपि किञ्चिद्दधि मे दास्यसि ।

गृहिणी — जात, न तां किमप्यर्थयस्व । दुश्शीलमेतत् । अस्माकमपेक्षायां मूल्यं दत्वा क्रीत्वा भोक्तव्यम् । एता हि जीवनाय दध्यादिविक्रयं कुर्वन्ति । ताभ्यो याचनं अत्यन्तमनुचितम् ।

---

# पुस्तकपरामर्शः ॥

(1)

महाभाष्यम् । भगवत्पतञ्जलिविरचितम् । कैयटकृतेन प्रदीपेन, अन्नम्भट्टकृतेन एतद्व्याख्यानेन उद्योतनेन च सहितम् । प्रथमाह्निकचतुष्टयरूपं प्रथमभागमात्रम् । आलेख्यशेषैः पि. पि. सुब्रह्मण्यशास्त्रिभिः श्री ए. शङ्करार्यैश्च सम्पादितम् । राजकीयतालपत्रग्रन्थालयाध्यक्ष श्री टि. चन्द्रशेखरार्यलिखितेन अङ्गलोपोद्घातेन सहितम् । मूल्यं 20-12-0।

अतिगम्भीरं प्रदीपं महाभाष्यं च विस्तरेण विवृण्वत् इदमुद्योतनं अन्वर्थाभिधानमिति न सन्देहः । महाभाष्यस्य कैयटग्रन्थस्य च यथावस्थितार्थावगमे अतिसरलमिदमपूर्वं व्याख्यानं महदुपकरोति । तत्र तत्र प्रसक्तानंशान् वाक्यपदीय-श्लोकवार्तिक-तन्त्रवार्तिकादिभ्यः अभियुक्तोक्तिसंवादोल्लेखेन क्वचित्स्वतन्त्रतया च विमृशन्नयं नैयायिकसुधीमणिः बहुषु तन्त्रेषु स्वमनीषोन्मेषं प्रकटयति । वैयाकरणानां सिद्धान्तभूतं स्फोटतत्त्वं सरलया शैल्या सङ्ग्रहेण प्रतिपाद्य दुरवगाहेषु व्याकरणनिबन्धनेष्वकृतपरिश्रमाणामपि तत् सुगममापादयति । अपभ्रंशानां साक्षाद्वाचकत्वावाचकत्वविचारं प्रासङ्गिकं वाक्यपदीयादिप्रमाणप्रदर्शनेन सम्यङ्निर्वहति । उपोद्घाते दर्शितरीत्या 'अथातो धर्मजिज्ञासा' इत्यादिप्रणेतृसूत्रकारान्तरवत् पाणिनिरेव स्वशास्त्रस्य प्रयोजनं कस्मान्न सूत्रयामास इत्यादिकं स्वयमेवाशङ्क्य श्रीमदन्नम्भट्टः परिहरति । प्रथमस्य पस्पशाह्निकमिति व्यवहारे भावं अन्ते प्रतिपादयति । (पस्पशाह्निकमधिकृत्य विस्तृतो लेखः अस्याः पत्रिकायाः 1941 वत्सरे, नवम्बर्मासीयसञ्चिकायां प्रकाशितः सत्यामपेक्षायां दर्शनमर्हति ।)

तदेतादृशमुद्योतनं सम्पूर्णं प्रकाश्येत चेत् महाभाष्यं अधीयानानां, अध्यापयतां, अन्येषां च तदवगमकुतूहलिनां अवाग्विषयो महानुपकारः स्यादिति तत्प्रकाशनं च क्रमेण सम्पद्येतेति सोत्कण्ठं प्रतीक्ष्यते । मूल्यं परं बहूनां अतीव दुर्भरमिति भाति ।

T. Venkatacharya.

(2)

**महात्मविजयः** । विद्यासागर के. एल्. व्यासराजशास्त्रिणा विरचितः । आङ्गलभाषानुवादसहितः । R. S. Vadhyar & sons, Kalpathi, Palghat अतो लभ्यः ।

कीर्तिशेषं महात्मानं गान्धिमधिकृत्य लिखितमिदं अष्टोत्तरशतपद्यात्मकं खण्डकाव्यं अतीव अस्माकं हृदयमावर्जयति । एकैकमपि पद्यं लालित्ये गाम्भीर्ये औचित्ये रसे च पुष्कलं भवति । एकैकमपि पद्यं कर्तुरुत्तमकविगोष्ठीगणनीयतां बलात् सम्पादयितुं क्षमं दृश्यते ।

ततो महात्मन्यपनीयमाने सङ्ख्यातिगैः सम्मिलितैर्जनौघैः ।
को वेत्ति का स्यादधिका विसृष्टा किं पुष्पवृष्टिः किमु बाष्पवृष्टिः ॥

हरिरिव पुरुषाणामुत्तमश्चक्रपाणि-
हर इव जितकामो योगिनामग्रगण्यः ।
विधिरिव विबुधाग्र्यः सत्यलोकाधिनेता
जयतु जगति गन्धिर्व्याससगीतप्रभावः ।

इतीदृशानि पद्यानि पठतः कस्य सहृदयस्य असूयाभरितस्यापि उत्तमाङ्गं स्वयं श्लाघापरवशतया न कम्पेत ।

---

(3)

**न्यासविंशतिः** । श्रीमन्निगमान्तमहादेशिककृता । पण्डित वे. अनन्ताचार्यकृतद्राविडविवरणसमेता । Krishnapuram, Akbarabad Post, Madras अत्र लभ्या । एकरूप्यमूल्या ।

संस्कृतविद्यार्थिनां, सम्प्रदायश्रद्धाशालिनां श्रीवैष्णवानां च उपयोगार्हान् बहून् ग्रन्थान् लिखितवन्तः सम्यङ् मुद्रयित्वा प्रकाशितवन्तश्च इमे महापण्डिता आचार्याः अद्य सुकरानुष्ठानतया अत्यन्तादृतस्य प्रपत्तिमार्गस्य तत्त्वं सङ्क्षिप्य, तथाऽपि स्पष्टतया, बोधयन्तीं इमां श्रीदेशिककृतिं असंस्कृतविदामप्युपकाराय सरलया शैल्या द्राविडभाषायां विवृत्य प्रकाशयन्तीति लोकहितप्रवणानामभिनन्दनीयमेतत् । मुद्रणं सर्वमनोहरम् ।

---

(4)

**संस्कृतशिक्षा** । पुनर्मुद्रिता । तिरुवादि श्रीनिवासमुद्रणालये सुलभा । मूल्यं 14 आणकाः । संस्कृतव्युत्पत्तिमिच्छतामत्यन्तमुपयुक्ता ।



---

KENDRIYA SANSKRIT VIDYA PEETHA, TIRUPATI. ९८



(5)

ராமராஜ்யம். முதல் புஸ்தகம்-அரசாங்கம். விலை அணா 12.
ராமராஜ்யம், 93. G. தெற்குமாடவீதி, திருப்பதி.
என்ற விலாஸத்திற்கு எழுதவும்.

"तत्रभवद्भिः प्रेषितं 'रामराज्यम' इत्यभिख्यं द्राविडपुस्तकं मया कृत्स्नमनुवाचितं महतीं प्रीतिमावहति स्म । ... ... यदि च पाठशालासु एतत् पाठयितुमधिकारिणः सम्मन्यन्ते ततो महदुपकृतं पठितॄणां बालानां भवेदिति तर्कयामि, तथा च प्रयतितव्यमित्यभ्यर्थये ।"

14—6—49 **T. E. Satakopachariar.**
Advocate, Tirupapuliyur.

தேவரீர் அன்பு கூர்ந்தனுப்பிய 'ராமராஜ்யம்' கிடைத்தது. கவனித்துப் படித்தேன் மிகவும் நல்ல சொற்களால் ஆகி ஆன்றோர் துணிந்த அறநெறி பிறழாமலும் சிதையாமலும் எளிய நடையில் இனிய செஞ்சொற்களால் அமைந்திருக்கிறது ...

28—5—49 **N. R. Krishnaswami Iyangar,**
Advocate, Madura.

I got the copy of Ramarajya kindly sent by you and thank you for the same. I went through it and found that you are capable of writing in very simple and beautiful Tamil. ... I was struck by the fearless way in which you have couched the entire subject and felt that if only we had more of such capable advocates of our ancient systems we will not have come to this pass. I hope you will not think me to be presumptuous if I tell you that the matter and the manner left nothing to be desired except that you aught to make these publications regular feature in the near future

29th May 49 **D. Ramaswamy Iyangar.**
Advocate, Madras.

Registered No. M 2300

Book XXII || श्रीः || Nos. 11 & 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥



| | | | | |
|---|---|---|---|---|
| पु. २२] कलि | ५०५० विरोधि | कर्कट सिंह | साधारण सं | ११ |
| | | | शास्त्रानुबन्ध सं | १२ |
| | | | आहत्य ,, | १२ |



# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

July & August 1949.

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण) ।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Tiruvadi P. O., Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
Sri Venkateswara Oriental Institute,
TIRUPATI.

# विषयाः ॥

शास्त्रानुबन्धः— कुवलयानन्दः । २८५—२९४

1 मेनका ।
2 सुभाषितनीवी ।
3 संस्कृतसेवा ।
4 श्रीरुक्मिणीविवाहः ।
5 वाणिज्यम् ।
6 यथाभिमतम् । [नाटकम्]
7 समुद्रवर्णनम् ।
8 प्रकृतिभेदः ।
9 पुस्तकपरामर्शः ।
10 विषयसूची ।

71
INDRIYA SANSKRIT VIDYA PEETHA LIBRARY TIRUPATI.

एवमष्टलोकपालनवग्रहादीनां प्रसिद्धसहपाठानां यथाकथञ्चित् प्रकृतोपमानोपरञ्जकतादिप्रकारेण निवेशने रत्नावल्यलङ्कारः। प्रकृतान्वयं विना क्रमिकतत्तन्नाम्नां श्लेषभङ्ग्या निवेशने क्रमप्रसिद्धिरहितानां प्रसिद्धसहपाठानां नवरत्नादीनां निवेशनेऽप्ययमेवालङ्कारः।

इति रत्नावली।

अथ तद्गुणः।

तद्गुणस्स्वगुणत्यागादन्यदीयगुणग्रहः।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा।

यथा वा—

वीर त्वद्रिपुरमणी परिधातुं पल्लवानि संस्पृश्य।
न हरति वनभुवि निजकररुहरुचिखचितानि पाण्डुपत्त्रधिया॥

इति तद्गुणः।

---

लुठनकृतधूलिसम्बन्धातिशयादिति भावः। पृथिव्यादिपञ्चभूतानां क्रमभेदेन न्यासः। यथा कथञ्चिदिति। क्रमेणाक्रमेण वेत्यर्थः। 'इन्द्रो वह्निः पितृपतिः' इत्यादिवारणायाह—प्रकृतेति। उपमानता यस्य वह्निमय इत्यादौ उपरञ्जकता चतुरास्य इत्यादौ।

इति रत्नावली।

अथ तद्गुणः।

तद्गुण इति। गुणप्रसङ्गाल्लेशेनैव सङ्गतिः। मध्यमौ तु प्रासङ्गिकौ। तद्गुण इति लक्ष्यनाम। वक्ष्यमाणानुगुणालङ्कारवारणाय स्वगुणत्यागादिति। 'घटः [पाव]कादमेचकः' इत्यादिवारणाय उत्तरदळम्। 'घटः पाकेन पाटलः' इत्यादिव्युदासायान्यदीयेति। वीरेति। स्पष्टम्।

इति तद्गुणः।

अथ पूर्वरूपम् ।

पुनस्स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतम् ।
हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ॥

यथा वा—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥

अयमेव तद्गुण इति केचिद्व्यवजह्रुः ।

पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि ।
दीपे निर्वापितेऽप्यासीत्काञ्चीरत्नैर्महन्महः ॥

लक्षणे चकारात्पूर्वरूपमिति लक्ष्यवाचकपदानुवृत्तिः ।

---

अथ पूर्वरूपम् ।

**पुनश्चे**ति । सङ्गतिव्युत्पत्ती स्फुटे । अत्र स्वगुणत्यागा[द]न्यदीयगुणग्रहे सति पुनः स्वगुणप्राप्तिः पूर्वरूपालङ्कार इत्यर्थः । तेन 'कपोलः पाण्डिम्न मतिशयमवाप प्रतिदिनम्' इत्यादिनिरासः ।

एकोऽपि त्रय इव भाति कन्दुकोऽयं
कान्तायाः करतलरागरक्तरक्तः ।
भूमौ तच्चरणनखांशुगौरगौरः
खस्थस्सन्नयनमरीचिनीलनीलः ॥

इत्यादिव्युदासाय स्वेति ।

**विभिन्ने**ति । सूर्यस्य रथ्याः अश्वाः । गरुडाग्रजेन अरुणेन विभिन्नवर्णाः स्वतो हरितत्वे स्वर (प्यरु) [णी] कृताः । वंशकरीरवत् वंशाङ्कुरवत् नीलैः हरितैः अत्रत्यैः मरकतैरित्यर्थः । वंशपदमत्राम्लानताद्योतनाय । रुचा किरणेन पुनः स्वां रुचं हरितवर्णमिति यावत् । आनिन्यिरे नीताः । 'एरनेकाच' इति यण् ।

काव्यप्रकाशमतमाह—**अयमि**ति । **पूर्वे**ति । "दीपमुद्योजयेद्याव-

यथा वा—

द्वारं खड्गिभिरावृतं बहिरपि प्रस्विन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः ।
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मन्दिरे
राजन् सैव चिरन्तनप्रणयिनी शून्येऽपि राज्यस्थितिः ॥

इति पूर्वरूपम् ।

अथ अतद्गुणः ।

सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।
चिरं रागिणि मच्चित्ते निहितोऽपि न रज्यसि ॥

यथा वा—

गण्डाभोगे विहरति मदैः पिच्छिले दिग्गजानां
वैरिस्त्रीणां नयनकमलेष्वञ्जनानि प्रमार्ष्टि ।
यद्यप्येषा हिमकरकराद्वैतसौवस्तिकी ते
कीर्तिर्दिक्षु स्फुरति तदपि श्रीनृसिंहक्षितीन्द्र ॥

---

न्निर्वाणस्तावदेवसः" इत्यादि वारणाय पूर्वदळम् । 'अविकारात् (रा?) सतां बुद्धिस्सदास्ये(स्त्ये)व स्वरूपिणी' इत्यादिवारणाय उत्तरदळम् । महः तेजः ।

द्वारमिति । खड्गिभिः खड्गमृगैः खड्गपाणिभिश्च । कञ्चुकिभिः सर्पैः वेत्रपाणिभिश्च । महिषीभिः महिषस्त्रीभिः लुलायाभिः अभिषिक्ता[भि]श्च ।

इति पूर्वरूपम् ।

अथ अतद्गुणः ।

सङ्गतेति । सङ्गतिर्व्युत्पत्ती स्फुटे । 'प्रसङ्गादन्येन प्रकटमणिवर्णो मणिवरः' इत्यादिवारणाय सङ्गतेति । गण्डेति । पिच्छिले मलिन

ननु चान्यगुणेनान्यत्र गुणोदयानुदयरूपाभ्यामुल्लासावज्ञालङ्काराभ्यां तद्गुणातद्गुणयोः को भेदः । उच्यते । उल्लासावज्ञालक्षणयोः गुणशब्दो दोषप्रतिपक्षवाची । अन्यगुणेनान्यत्र गुणोदयानुदयौ च न तस्यैव गुणस्य संक्रमणासंक्रमणे । किं तु सद्गुरूपदेशेन सदसच्छिष्ययोर्ज्ञानोत्पत्त्यनुत्पत्तिवत्तद्गुणजन्यत्वेन सम्भावितयोर्गुणान्तरयोरुत्पत्त्यनुत्पत्ती । तद्गुणातद्गुणयोः पुनः गुणशब्दो रूपरसगन्धादिगुणवाची । तत्रान्यदीयगुणग्रहणाग्रहणे च रक्तस्फटिकवस्त्रमालिन्यादिन्यायेन अन्यदीयगुणेनैवानुरञ्जनाननुरञ्जने विवक्षिते । तथैव चोदाहरणानि दर्शितानि । यद्यप्यवज्ञालङ्कृतिरतद्गुणश्च विशेषोक्तिविशेषावेव, 'कार्याजनिर्विशेषोक्तिस्सति पुष्कलकारणे ।' इति तत्सामान्यलक्षणाक्रान्तत्वात् । तथाप्युल्लासतद्गुणप्रतिद्वन्द्विना विशेषाकारेणालङ्कारान्तरतया परिगणिताविति ध्येयम् ।

इति अतद्गुणः ।

---

इति तात्पर्यम् । यद्यपीत्यस्य पूर्वार्धे अन्वयः । तदपि तथापि । हिमकरकराणामद्वैतस्याभेदस्य । सौवस्तिकी स्वस्तिकारिणी । द्वारादित्वादैजागमः ।

**दोषप्रतिपक्षे**ति । श्लाघ्यधर्मवाचीत्यर्थः । भेदान्तरमप्याह—**अन्ये**ति । साक्षाज्जन्यस्य अनुत्पत्त्ययोगादाह—**सम्भावितयो**रिति । **अलङ्कारे**ति । तथा च विशेषोक्तिलक्षणे दोषेतरकार्याजनिरिति विवक्षणीयमिति भावः । **परिगणितावि**ति । प्राचीनैरिति शेषः ।

इति अतद्गुणः ।

अथ अनुगुणः ।

प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसन्निधेः ।
नीलोत्पलानि दधते कटाक्षैरतिनीलताम् ॥

यथा वा—

कपिरपि च कापिशायनमदमत्तो वृश्चिकेन सन्दष्टः ।
अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ॥

अत्र कपित्वजात्या स्वतःसिद्धस्य वैकृतस्य मद्यसेवादिभिरुत्कर्षः ।

इति अनुगुणः ।

अथ मीलितम् ।

मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते ।
रसो नालक्षि लाक्षाया श्चरणे सहजारुणे ॥

यथा वा—

मल्लिकामालभारिण्यस्सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥

---

अथ अनुगुणः ।

प्रागिति । सङ्गतिव्युत्पत्ती स्फुटे । अनुगुण इति लक्ष्यनाम । "कान्तायाः करतलरागरक्तरक्तः" इत्यादिवारणाय प्राक्सिद्धेति । 'दिने दिनेत्यन्ततनुः' एधि रेऽधिकमित्यादिवारणाय परसन्निधेरिति । गुणपदं धर्ममात्रपरमित्यभिसन्धायाह—कपिरिति । कापिशायनं—मधु । वैकृतं विकारः ।

इति अनुगुणः ।

अथ मीलितम् ।

मीलितमिति । पूर्वत्र अन्यगुणेन स्वगुणोत्कर्षः । इह तु भेदतिरोधानमिति सङ्गतिः । भेद एवेत्यवधारणेन स्वरूपव्यवच्छेदः । स्वरूपप्रतिभासस्य सत्त्वात् । स च भेदाभेदौदासीन्येन पुरोवर्तितया ।

मल्लिकेति । मल्लिकायाः [मालाः] बिभ्रतीति । 'इष्टकेषीकामा-

अत्राद्ये चरणालक्तकरसयोररुणिमगुणसाम्याद्भेदानध्यवसायः। द्वितीयोदाहरणे चन्द्रिकाभिसारिकाणां धवलिमगुणसाम्याद्भेदानध्यवसायः।

इति मीलितम्।

## अथ सामान्यम्।

सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते।
पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम्॥

यथा वा—

रत्नस्तम्भेषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः।
लङ्केश्वरस्सभामध्ये न ज्ञातो वालिसूनुना॥

मीलितालङ्कारे एकेनापरस्य भिन्नस्वरूपानवभासरूपं मीलनं क्रियते। सामान्यालङ्कारे तु भिन्नस्वरूपावभासेऽपि व्यावर्तकविशेषो नोपलक्ष्यत इति भेदः। मीलितोदाहरणे हि सहजारुण्याच्चरणादेर्वस्त्वन्तरत्वेनागन्तुकं यावकारुण्यं न भासते। सामान्योदाहरणे तु पद्मानां मुखानां च व्यक्त्यन्तरतया भानमस्त्येव। यथा रावणदेहस्य तत्प्रतिबिम्बानां च। किं त्विदं पद्ममिदं मुखमयं बिम्बोऽयं प्रतिबिम्ब इति विशेषः परं नोपलक्ष्यते। अत एव भेदतिरोधानान्मीलितं तदतिरोधानेऽपि साम्येन व्यावर्तकानवभासे सामान्यमित्यु-

---

मालानां चिततूलभारिषु' इति मालाशब्दस्य ह्रस्वः। सूत्रे हारिष्विति पाठपक्षे अत्रापि हारिण्य इति पाठः। सर्वाण्यङ्गानि व्याप्नोतीति सर्वाङ्गीणम्। 'तत्सर्वादेः' इत्यादिना खप्रत्ययः। न लक्ष्यन्ते अर्थात् अभिसारिकात्वेन।

इति मीलितम्।

अथ सामान्यम्।

**सामान्यमि**ति। पूर्वालङ्कारवारणाय **विशेषे**ति।

**रत्ने**ति। स्पष्टम्। लक्ष्यनामान्वर्थयितुं भेदं दर्शयति—**मीलिते**ति। उपपादयति **मीलितमि**ति। **अस्त्येवे**ति। संख्यायाः नियामकत्वादिति

भयोरप्यन्वर्थता। केचित्तु, वस्तुद्वयस्य लक्षणसाम्यात्तयोः केनचिद्बलीयसा तदन्यस्य स्वरूपतिरोधाने मीलितम्। स्वरूपप्रतीतावपि गुणसाम्याद्भेदतिरोधाने सामान्यम्। एवं च।

अपाङ्गतरले दृशौ तरलवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम्।
इति स्फुरितमङ्गके मृगदृशां स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते॥

इत्यत्र मीलितालङ्कारः। अत्र हि दृक्तारल्यादीनां नारीवपुस्सहजधर्मत्वान्मदोदयकार्यत्वाच्च तदुभयसाधारण्यादुत्कृष्टतारल्यादियोगिना वपुषा मदोदयस्य स्वरूपमेव तिरोधीयते। लिङ्गसाधारण्येन तद्ज्ञानोपायाभावात्। 'मल्लिकामालभारिण्यः' इत्यादिषु तु सामान्यालङ्कार इत्याहुः। तन्मते 'पद्माकरप्रविष्टानाम्' इत्यादौ भेदाध्यवसायेऽपि व्यावर्तकास्फुरणेनालङ्कारान्तरेण भाव्यम्। सामान्या-

---

भावः। काव्यप्रकाशमतमाह—केचित्त्विति। 'समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते। निजेनागन्तुना वाऽपि तन्मीलितमिति स्मृतम्॥' इति तदीयलक्षणमर्थतोऽनुवदति वस्तुद्वयस्येति। लक्षणेति। लिङ्गसाम्यादित्यर्थः। तयोः द्वयोर्वस्तुनोः तिरोधानं अज्ञानम्। 'प्रस्तुतस्य यदन्येन गुणसाम्याविवक्षया। ऐकात्म्यं बद्ध्यते योगात्तत्सामान्यमिति स्मृतम्॥' इति लक्षणमनुवदति—स्वरूपेति।

अपाङ्गेति। इति पूर्वार्धोक्तरीत्या मृगदृशामङ्गके लीलया स्वत एव स्फुरितम्। भावे निष्ठा।

उत्कृष्टेति। मदोदयात्प्रागेव वपुर्धर्मत्वेन अवगमोऽत्र उत्कर्षः। नन्वत्रापि ज्योत्स्नाभिसारिकान्यायेन स्वरूपप्रतिभासेऽपि भेदमात्रं तिरोधीयतामित्यत आह—लिङ्गेति। निरुक्तसामान्यवारणाय भेदेति। विशेषकव्युदासाय व्यावर्तकेति। गौरवाल्लक्ष्यनामादर्शनाच्चाह—सामान्येति।

लङ्कारावान्तरभेदेन वा। पूर्वस्मिन्मते स्वरूपतिरोधानेनालङ्कारान्तरेण भाव्यम्। मीलितावान्तरभेदेन वा।

इति सामान्यम्।

## अथ उन्मीलितविशेषकौ।

भेदवैशेष्ययोः स्फूर्तावुन्मीलितविशेषकौ।
हिमाद्रिं त्वद्यशोमग्नं सुराश्शीतेन जानते॥

लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च॥

मीलितन्यायेन भेदानध्यवसाये प्राप्ते कुतोऽपि हेतोर्भेदस्फूर्तौ मीलितप्रतिद्वन्द्व्युन्मीलितम्। तथा सामान्यरीत्या विशेषास्फुरणे प्राप्ते कुतश्चित्कारणाद्विशेषस्फूर्तौ तत्प्रतिद्वन्द्वी विशेषकः। क्रमेणोदाहरणद्वयम्। तद्गुणरीत्यापि भेदानध्यावसायप्राप्तावुन्मीलितं दृश्यते।

---

पूर्वस्मिन्निति। चन्द्रालोकमत इत्यर्थः। अपाङ्गतरले दृशावित्यादाविति शेषः।

इति सामान्यम्।

अथ उन्मीलितविशेषकौ।

भेदेति। सङ्गतिव्युत्पत्ती स्फुटे। वैशेष्यं विशेषः। स्वार्थे ष्यञ्। वैशिष्ट्ययोरिति पाठेऽप्ययमेवार्थः। 'पद्माकरप्रविष्टानाम्' इत्यादिवारणायाह—मीलितेति। इदं प्रायिकाभिप्रायम्। निष्कर्षस्तु भेदानध्यवसायपूर्वकतत्स्फूर्ताविति। 'सरसिजमिदमाननं च तस्याः' इत्यादिवारणाय संशयप्रत्यक्षवारणाय चाह—सामान्येति। तद्गुणेति। विजातीयगुणकृतभेदानध्यवसायप्राप्तावित्यर्थः।

न यः कोऽपि तेन सम्भाषणं कर्तुमर्हतीति खण्डितमादिदेश। धात्रीं प्रति 'भोजनकालं विना कालान्तरेषु वराहस्वामिनः परिसरमपरिहृत्य स्थिता घण्टागणनया औषधानि ददती आस्स्व' इत्यभिधाय श्यामार्यं सहोदर्यौ त्रीनपि बहिर्गमयित्वा वैद्यशालामभजत।

वराहस्वामिनः प्रज्ञा द्वित्रेभ्यो दिनेभ्यः पूर्वमेव सुप्रसन्ना बभूव। जानुनि यत्र अस्थि भग्नं तत्र तु व्रणः अद्यापि अशुष्क आसीत्। तदीयस्य देहस्य अत्यन्तरिक्तरक्तत्वात् सः स्वशिरस उन्नयनेऽप्यशक्तः श्रान्तःश्रान्तः शिश्ये। तादृश्यां अतिदुर्बलायां स्थितौ वैद्यशालाखट्वातः प्रेङ्खोलिकां नीतत्वात् शकटगमनेन चलितत्वात् प्रासादं प्राप्य प्रेङ्खोलिकातः खट्वां नीतत्वाच्च सः, भिषजि तूष्णीं प्रासादात् प्रयातायां, निमीलितनेत्रः निद्राण आसीत्। वराहस्वामिना सह स्वयं धारालं भाषितुं शक्यमिति कुतूहलेन धावित्वा आगते द्वे अपि सोदर्यौ तं सादरं परिपालयन्तीभ्यां उभाभ्यामपि तूष्णीभ्यां तदुपसर्पणावकाशमदत्त्वा कृतेन आदेशेन कुपिते मुखं विकृत्य अन्यत्र अगच्छताम्। वराहस्वामिना सह एकान्ते विमुक्ता श्वेता धात्री कस्याञ्चित् चतुष्पद्यामुपविष्टा औत्सुक्येन श्रद्धया च वराहस्वामिन्यवदधाना तस्य हस्तपादं प्रेम्णा संवाहयन्ती च प्रबुद्धे तस्मिन् तेन सह सम्भाषमाणा चावर्तत। यत् सा सङ्कोचलेशं विना वराहस्वामिनः शरीरं स्पृष्ट्वा परिमृश्य पत्नीवत् तस्यापेक्षितं सर्वं कार्यमकरोत्, यच्च तत् सर्वं सः जुगुप्सालेशं विना प्रत्यग्रहीत्, यच्च सा गन्धर्वीव अतिरूपलावण्यवती बभूव, तत् पश्यन्त्योर्द्वयोरपि सोदर्योर्मनसि असूयाग्निरुदतिष्ठत्। सर्वं कर्तुमर्हयोरात्मनोः दूरेऽवस्थितिं यस्याःकस्याश्चिदन्यस्याः स्त्रियाः निकाममन्तरङ्गभावेन निरन्तरं तेन साकमवस्थितिं च दृष्टवत्योस्तयोरुदरमज्वलत्। यथाकथञ्चित् सा निष्कासयितव्येति निश्चितवत्यौ द्वे अपि सोदर्यौ तदावासं गृहं मुहुरागत्य तौ किं कुरुत इति पश्यन्त्यौ मिलित्वा मिलित्वा मिथ उपांशु भाषमाणे, कवाटस्य बहिः गूढं स्थित्वा तयोः संलापं सावधानं शृण्वत्यौ, श्वेतकन्यां प्रति कडुकडिति भाषमाणे च अवर्तेताम्। प्रासादागमनानन्तरं वराहस्वामिनः गृहपक्वमन्नमदीयत।

पेरुन्देवीकोमलाभ्यां तस्मै आहारे दीयमाने सा श्वेतकन्या बहिः प्रेषिता । सा तेन स्वल्पेन कालेन स्वकीयं वासस्थानं गत्वा आहारादिकमवसाय्य आगता भवेत् । ततः सा नक्तन्दिवं वराहस्वामिनः समीपे स्थित्वा तस्य व्यथामपनीय विनोदयन्ती अवर्तत । लोके स्त्रियो यावत्योऽपि वञ्चनशीला इति इत्वर्य इति च मत्वा निर्विण्णस्य स्त्रीवातस्पर्शोऽपि स्वस्य मा भूदिति मतिं कृतवतो वराहस्वामिनो मनः सा सुन्दरी शोभनैः स्वगुणैः हार्दैरुपचारैश्च सर्वथा विपर्यास्य तं नवीनं मनुष्यं परिणमितवती बभूव । तस्य पत्नी मेनका नाटककारेण पलायितेति तस्य स्थितां मतिं च निरास्थत् । कथं नु मेनका नष्टेत्ययमेकः सन्देहः परं तस्य मनस्यवर्तत । तथा सा धात्री कृतवती । मेनकाविनाशस्य किं सोदर्यौ निमित्तम् ? उत स्वयं मेनकैव ? अथ वा अन्यो यः कोपीति समीचीनं प्रमाणमन्तरेण त्वरितं न निश्चेतव्यमिति न्यायोपन्यासेन धात्री तस्य मतिमन्यथयामास ।

तस्यां स्थितौ वराहस्वामी गृहिण्या अदर्शनं प्रति तात्त्विकं विवरं कदा लभ्येतेति पर्युत्सुकः तस्याः वियोगेन भृशं विषण्णश्च आसीत् । तस्यां श्वेतवनितायां तस्य मनसि जातो गाढोऽनुरागः क्रमेण रूढमूलोऽभवत् । सा उत्तमा स्त्रीति श्वेतजातौ जाताऽपि दुर्लभगुणशालिनी अभिजाता कन्येति चामन्यत । उज्ज्वलं तदीयं सौन्दर्यं च तस्य मनो विद्राव्य मृदूचकार । क्षणकालमपि तस्या अदर्शनं तस्य मनो न सेहे । भोजनकालेऽपि कथं सा सह न वर्तत इत्यदूयत । आपत्काले आत्मानं परित्रातवती दैवी कन्येत्येव स ताममन्यत । तां विना तावता कालेन वैद्यशालायामेव मृतोऽभविष्यमित्यचिन्तयत् । पूर्वं कस्मिंश्चिदधिकारे भिषक् हूणी धात्र्यै क्रुध्वा वराहस्वामिगृहादन्यत्र गृहान्तरे नियोक्ष्य इति यदा धात्रीं तर्जयामास तदा तत्प्रति वराहस्वामी भृशं खिन्न आसीदिति ह्युक्तम् । ततःपरं सा तां हूणीमुपसृत्य तस्याः कोपं शमयित्वा तेन सह स्थातुमनुमतिं लेभे । तस्मात् दिनात् प्रभृति तयोर्मैत्री प्रवर्धमानैवासीत् । अन्ततः प्रासादमागतौ तौ अवियुक्तौ अन्तरङ्गसुहृदौ अभूताम् । तया

सह स्थितिरेव तस्य परमपवमासीत्। तच्छुश्रूषैव तस्या आनन्दोऽभवत्। किञ्च हूणी भिषक् मेनकानुबन्धिनो विषयान् कथमपि ज्ञातवतीति प्रतिभातत्वात् वराहस्वामिनः तस्या धाव्याः साहाय्येन तद्वृत्तान्तो ज्ञातव्य इति अभिप्रायः। प्रासादमागतयोस्तयोः त्रीणि दिनान्यभवन्। तस्या अभिरूपाया अविच्छिन्नप्रयत्नेन तस्य व्रणा अपि प्रायः शुष्का अभवन्। न परं खट्वायामेव उत्थाय उपविश्य अपि तु भूतले पादं निधाय स्थित्वाऽपि परीक्षामकरोत्। अद्यापि जानुनि व्यथायाः मनाक् स्थितत्वात् तावता शयनपरित्यागस्तस्य अकर्तव्योऽभवत्। भिषक् हूणो हूणी च अह्नः सकृत् तत्र आगत्य तस्य स्थितिं परामृश्य उचितान् आदेशान् धात्र्यै दत्त्वा अगच्छताम्।

तृतीये दिने वराहस्वामिनि भुञ्जाने सा धात्री स्वावासं गत्वा भोजनं निर्वर्त्य प्रत्यागच्छत्। तदीयं सुन्दरं मुखं यथाशीलं सद्यो विकसितसरसिजसदृशमवर्तत। किन्तु वराहस्वामिनः स्थितौ काचन विक्रिया उत्पन्ना। तस्य मुखे महद्व्यसनं चिन्ता उद्वेगश्चादृश्यत। तस्य देहः पटपटेति स्फुरन् ददृशे। तानि चिह्नानि लघु गृहीतवती सा धात्री स मेनकां स्मृत्वा व्यथत इति मन्यमाना 'दिने दिने भवद्देहं स्वस्थं भवन्तं पश्यन्ती कियदहं प्रहृष्टाऽभवम्। अद्य खलु देहः भृशं फुरफुरायमाणो दृश्यते। को हेतुः' इति विनीता पप्रच्छ। स तु अतीव विषण्णः 'यावद् यावत् त्वं मम शरीरस्य स्वास्थ्यलाभेन हृष्यसि तावत् तावदहं व्यसनी भवामि। व्याधिर्मे कथं न वर्धेत इति सर्वेश्वरं प्रार्थये' इत्यब्रवीत्।

तदाकर्णितवती मुग्धा सा कन्या स्वासन्निधानसमये सहोदर्यौ किमपि पैशुन्यमाचरितवत्याविति सपदि निश्चित्य स्मितं कृत्वा उपसृत्य 'क्षिप्रं स्वास्थ्यप्रतिलम्भे पत्नीमन्विष्य तस्या विनाशवृत्तान्त उपलब्धव्य इति अद्यावधि उक्तवन्तः सन्तो भवन्तः कथं खलु विपरीतं भाषन्ते। विनष्टां प्रति किं काचन वार्ता लब्धा। कुत एवं व्यथितव्यम्? शरीरस्य सम्यक् स्वास्थ्यप्रतिलम्भसमये किमेवं आयासनं युक्तम्।' इति पृच्छन्ती तस्य पादं गृहीत्वा संवाहयामास। वराहस्वामिनो दुःखमव

धेत ; नेत्रयोरश्रु उदतिष्ठत्। 'आः। विषयं किमित्यहं ब्रूयाम्। स्मृतः स्मृतः मयैव सोढुं न शक्यते। तं चेत् शृणोषि विस्मिता स्याः।' इत्यवदत्।

धात्री— स किं विनष्टभार्यानुबन्धी विषयः।

वराहस्वामी— न न। एते किल मम विवाहान्तराय संविधानं कृतवन्तः। श्वः किल निश्चयताम्बूलं वर्तिष्यते। इतः पञ्चषेषु दिनेषु किल 'तिरुप्पदि'-अत्र विवाहो भविष्यति। अद्य किल सम्बन्धिगृहमनुष्याः कन्या च आगता भविष्यन्ति। एतदर्थमेव किल मामियत्या त्वरया प्रासादं आनयन्ति स्म।

तदाकर्णितवती धात्री विभ्रान्ता मोहं विषादं च प्राप। मेघावृतस्येन्दोरिव तस्या मुखस्य शोभा तिरोदधे। मनः उत्तप्तमिव अभात्। अथापि कथञ्चिदात्मानं पर्यवस्थापितवती 'न खल्वद्यापि भवतां शरीरं स्वस्थम्। कथं नाम भवतां इदानीं तिरुप्पति-नयनम्? पुनरपि खलु शरीरमस्वस्थं भवेत्। इदं कार्यं किमद्य कर्तुं युक्तमिति प्रथमं भवद्भिः भिषजा हूणेन सह अवश्यं समालोचयितव्यमिति भाति। भित्तिं कृत्वा हि चित्रलेखनं कार्यम्। शरीरप्रतिसमाधानानन्तरं हि भवद्भिः विवाहं कृत्वा सुखं जीवितुं शक्यम्' इत्युवाच।

वराहस्वामी—'विवाहकरणे मम इच्छायां सत्यां खलु वैद्यहूणसमालोचनस्यावश्यकता भविष्यति। का अद्य स्थितिः, यस्यामहं वर्ते। प्रथमभार्याया नष्टायाः पञ्चदश दिनानि न भवन्ति। सा किं जीवति अथवा मृता। न ज्ञायते। मृतेति कृतेऽपि आशौचमप्यद्य न निवृत्तं स्यात्। अपि च प्रथमभार्यया जात एव व्यसने अनिवृत्ते, मयि च जीविताय प्रयस्यति किं अपरा गृहिणी काचिदपेक्ष्यते? मदीयमेनकातुल्या च गृहिणी न भविष्यति। तया यं क्लेशमहमनुभवामि तं च अन्यो यः कोऽपि नानुभविष्यति।' इत्युवाच।

तदाकर्णितवती धात्री नानाविधाभिश्चिन्ताभिर्व्यथिता, तं प्रति स्मितं कुर्वती 'नष्टां मेनकां प्रति इयती अनुकम्पा अनुतापश्च यद्भवत्सु दृश्यते

परस्परपीडां न जहति। साधुगुणो न जायत इत्यर्थः। 'किं मर्दितोऽपि कस्तूर्या लशुनो याति सौरभम्।' इति न्यायात् 'व्यसनेन तु मूर्खाणां निद्रया कलहेन वा।' इत्युक्तेश्च। तत्रापि विशेषमाह उष्णा इति। उष्णे क्रूर-पुरुषे प्राप्ते सति शीतलतामुपेत्य तद्भयात् मृदुलस्वभावतामधिगत्य शिशिरे साधुपुरुषे प्राप्ते सति उष्णतां भजन्ति। तत्रैव स्वक्रौर्यं सर्वं प्रकटयन्ति। समाधानकरणेपि न शाम्यन्तीत्यर्थः। उक्तं हि – 'अपूर्वः कोऽपि कोपाग्निस्सज्जनस्य खलस्य च। एकस्य शाम्यति स्नेहात् वर्धतेऽन्यस्य वारितः॥' इति। अलकाश्च खलाश्चैव मूर्धभिस्सुजनैर्धृताः। उपर्युपरि सत्कारेष्याविष्कुर्वन्ति वक्रताम्॥' इति च। तत्र च शीतलताया न दुर्गुणत्वम् अपि तूष्णताया एवेति सूचनाय शीतलताया अनुवादतया उष्णतायाश्च विधेयतया निर्देशः न तु व्युत्क्रमेणेति द्रष्टव्यम्। तादृशाः खलाः दुर्जनाः कामस्य मन्मथस्य अन्तःपुरे अवरोधे याश्चेटिकाः अल्पचेट्यः तासां कुचतटी स्तनप्रदेशः तत्र यत् काठिन्यं कठिनस्पर्शः क्रौर्यञ्च तद्वन्तः। कुचतटीशब्देन तद्गतकाठिन्यं लक्ष्यते। कुचतटीव काठिन्यमिति विग्रहात् तादृशकाठिन्यसदृशकाठिन्यवन्त इत्यर्थो लभ्यत इति। यद्यपि काठिन्यमात्रे कुचतटीसादृश्यमनेन प्रतीयते। न तु पादत्रयोक्तार्थेषु। तथापि पादत्रयार्थानां उक्तकाठिन्यविवरणरूपतया सर्वत्र तल्लाभ इति बोध्यम्। यद्वा काठिन्यवन्त इति पृथक्पदम्। ततश्च काठिन्यवन्तः खलाः कुचतटी कुचतटीरूपा इत्यन्वयात् मुखं चन्द्र इतिवत् तत्तुल्यतालाभः पादत्रयार्थेष्विति द्रष्टव्यम्। अत्र च नीळातुङ्गस्तनगिरितटीति गिरिसादृश्योक्तिमहिम्ना तुङ्गत्वविपुलत्वकाठिन्याद्यवगमः कुचतटीषु प्रसिद्धः। तत्रापि चेटिकाकुचतटीनामनवरतकरमर्दनादिविरहात् काठिन्यातिशय इति केचिदाचक्षते। ज्योतिश्शास्त्रपरामर्शे तु स्तनमार्दवस्य शुभग्रहफलताप्रतीतेरुत्कृष्टस्त्रीणां मृदुस्पर्शतैव स्तनतटीनामवगम्यते। यथोक्तम्। ... ...। तथा च तत्किङ्करीस्तनतटसादृश्यं सम्यगुक्तमिति ध्येयम्। अतश्चैवमर्थः। मुक्ताफलमयैः हारैः निषेविता अपि विभूषिता अपि तद्वृत्त्यै तादृशमुक्ताहारस्थित्यै अन्तरं स्थानं न दिशन्ति। 'अनयोरनवद्याङ्गिस्तन-

योर्जृम्भमाणयोः । अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥' इति स्वस्यैवाव-काशालाभात् खिद्यमानयोः स्तनयोः 'स्वयं तरितुमक्षमः' इति न्यायेनान्या-वकाशदानं कथं युज्यत इति भावः । 'मृणालसूत्रमपि ते न संमाति स्तना-न्तरे ।' इति ह्युक्तम् । बन्धे कञ्चुलिकादिभिर्दृढबन्धने गाढं विमर्दनेऽपि कराभ्यां निपीडनेऽपि अन्योन्यसंपीडनं वैपुल्यात् परस्परोपमर्दनं न जहति न त्यजन्ति । उष्णे ग्रीष्मादिसमये शीतलतां शीतस्पर्शवत्तां उपेत्य प्राप्य शिशिरे हेमन्तादिकाले प्राप्ते सति उष्णतां ऊष्मलतां भजन्ति प्राप्नु-वन्ति । 'शीतकाले भवत्युष्णमुष्णकाले च शीतलम् । कूपोदकं वट-च्छाया नारीणां कुचमण्डलम् ॥' इति । वरवर्णिनीनां तु सर्वाङ्गेष्येतदनु-शिष्यते । 'शीते सुखोष्णसर्वाङ्गी ग्रीष्मे तु सुखशीतला । भर्तृरक्ता तु या नारी सा भवेद्वरवर्णिनी ॥' इति । खलाः असाराः । अत्र च खलानामति-नीचानां उत्तमस्त्रीकुचसादृश्यकथनमप्यधिकोपमा भवेदिति भिया तत्किङ्क-रीकुचतटसादृश्यमुपवर्णितमिति द्रष्टव्यम् । एवं सामान्यतः स्त्रीजनहृदय-मेवातिक्रूरम् । तत्रापि कौमारकालदुर्मृतकामान्तःपुरस्त्रीहृदयम् । ततोऽपि तादृश-भर्तृधनादिहीनतत्पत्नीजनसविधकिङ्करत्वकृत-नित्यपरतन्त्रतादुःख-भागिचेटिकाहृदयमत्यन्तक्रूरतममित्यर्थोऽप्यनेन ध्वन्यत इति बोध्यम् । अत्र चोष्णे शीतलतामित्यादिभिः क्षणे क्षणे खलानां स्वभावविपर्यासोप-वर्णनात् सर्वत्रैकरूपत्वमेव सत्पुरुषलक्षणं प्रतीयते । तच्च समुद्रे दृश्यत इति समुद्रवदेकरूपतया स्थातव्यं महद्भिरित्यर्थोऽपि प्रतिपाद्यत इति ध्येयम् । ततश्चात्र नञ्पदपूरणेन तत्तत्स्थले तत्परित्यागेन च समुद्रपरोऽपि बोधो भवति ।

तथा हि — मुक्ताहारैः मुक्ताफलपंक्तिभिः निषेविताः सर्वत्र व्याप्ता अपि तद्वृद्ध्यै तादृशमौक्तिकगणावस्थित्यै अन्तरं पूर्णावकाशं दिशन्ति प्रयच्छन्ति बन्धे सेतुपथबन्धने गाढविमर्दने मन्दराद्रिमन्थेन विमथने च अन्योन्यसंपीडनं जलानां परस्परसुसंश्लेषं जहति मध्ये सेतुपर्वतादि-व्यवधानेन विभक्तजला भवन्ति । उष्णे ग्रीष्मकाले शीतलतामुपेत्य स्थिताः शिशिरकाले प्राप्ते उष्णतां न भजन्ति । सर्वदा शीतलस्वभाव-

त्वात्। पल्वलाद्यल्पजलानां शीतकाले शीतता उष्णकाले उष्णता च दृष्टा। समुद्रादिजलानां तु सर्वदा शीतस्वभावतैव। वैपरीत्यं तु खलानां विस्मयावहमेवेति हृदयम्। एवं तटीकाठिन्यवन्तोपि न। तटाकादीनामपि कठिनतीरवत्त्वमस्ति समुद्राणान्तु न तदपीत्यर्थः।

एवमत्र विशेषणमहिम्ना पञ्चभूतधर्माः खलेष्वतिदिश्यन्ते। तेन च खलानामचेतनतुल्यतैव न तु चिद्धर्मः ज्ञानादिलेश इति सूचितम्। तथा हि मुक्ताहारादिनिखिलद्रव्यसंयुक्तमपि गगनं तद्वृत्त्यै तदीयस्थित्यै आधेयतारूपायै अवकाशं न दिशति। गगनस्य सर्वद्रव्यानाधारत्वात्। यद्यपि गगने गच्छति शकुनिरिति प्रयुज्यते। तथापि न तस्य गगनमाधारः, अपि तु पक्षाभिघातोपनीतो वायुरेव। अन्यथा पक्षाभिहतिमन्तरेण गगनगमनप्रसङ्गात्। यद्वा तस्मिन् वृत्तिस्तद्वृत्तिः। मुक्ताहारादिपदार्थानामुपरिगगनसत्त्वेऽपि न तस्य तत्तत्पदार्थवृत्तित्वमित्यर्थः। गगनस्यावृत्तित्वात्। तथा चाकाशधर्मोऽत्राभिहितः। अथ वायुधर्ममाह—बन्ध इति। वायूनां भस्त्रिकादिषु निर्बन्धकरणे व्यजनादिना विमथनेऽपि अन्योन्याभिघातं न जहति। स्वतस्सञ्चारिष्णूनां वायूनां निर्बन्धकरणे परस्पराभिघातस्यावश्यकत्वात्। उष्णे शीतलतामुपेत्येति जलधर्मः भजन्त्युष्णतामिति तेजोधर्मश्च काठिन्यवन्त इति च पृथिवीधर्मोऽवगम्यत इति वैचित्र्यविशेषो द्योत्यते।

एवं सस्यघट्टनस्थानपरोऽप्यर्थः। तत्र च 'व्रीह्याद्याघट्टनस्थाने खलं धूर्ते त्वयं त्रिषु।' इति नपुंसकलिङ्गतानिर्देशेऽपि खलमत्रास्तीति विग्रहात् अर्श आद्यच्प्रकरणेन खलवत्प्रदेशपरतया पुंलिङ्गतोपपत्तिर्बोध्या। तथा च खलवन्तः प्रदेशाः मुक्ताहारं वक्त्रबन्धनादिभिः परित्यक्तपलालादिभक्षणं यथातथा गवादिभिर्निषेविता अपि तद्वृत्त्यै परस्परासंमर्देन गवादीनां स्थित्यै अवकाशं न ददति। सर्वतः पलालभारप्रकीर्णत्वात् निबिडतमावकाश एव धान्यानां विमथनादिति भावः। एवं बन्धे सति सस्यबन्धेषु विद्यमानेष्वपि गाढविमर्दनेपि केषांचिद्विघट्टनानन्तरमपि च अन्योन्यं पलालजालानां संपीडनं उपमर्दं न जहति। सर्वत्र सस्यबन्धपलालादि-

नैबिड्यस्य चिरानुवृत्तत्वादिति भावः । उष्णे ग्रीष्मकाले शीतलतामुपेत्य सर्वतः प्ररूढतृणदूर्वादिशीतवल्लिकामासाद्य तदानीं सस्याद्याघट्टनानावश्यकतया तृणादिनिर्मथनेन खलतलपरिष्करणाकरणात् इति भावः। 'वसन्ते सर्वसस्यानां जायते पत्रशातनम् ।' इति हि श्रूयते। शिशिरे प्राप्ते हेमन्तशिशिरादिशीतकालप्राप्तौ सत्यां उष्णतां भजन्ति । सर्वत्र ऊष्मलतरनूतनपलालभारप्राचुर्यात् शीतव्यथाविमोचनक्षमा इति भावः। तटीकाठिन्यवन्तश्च खलतलेषु सर्वतो मृत्स्नादिविधूननेन स्थलकाठिन्यकल्पनादिति भावः ।

एवमत्र खलानां कपिस्वभावातिदेशोऽपि गम्यते । तथा हि—मुक्ताहारेण कण्ठे विभूषिता अपि कपयः तादृशमुक्ताहारस्य क्षणं स्थित्यै अवकाशं न प्रयच्छन्ति। अपि तु सद्य एवावच्छिद्य भूमौ प्रक्षिपेयुरिति लोकवादः । वर्ण्यते हि कविना केनचित् 'आघ्रातं परिचुम्बितं परिमुहुर्लीढं पुनश्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां माकृथाः । हे सद्रत्न तवैतदेव कुशलं यद्वानरेणादरादन्तस्सारविलोकनव्यसनिना चूर्णीकृतं नाश्मना ॥' इति। एवं बन्धे शृङ्खलादिभिः कट्यादिषु बन्धने गाढविमर्दनेऽपि कशादिभिरसकृत् प्रहरणेपि अन्योन्यसंपीडनं एकस्थाने बद्धैस्सह परस्परकलहायितमुपरिपतनादिकञ्च न त्यजन्ति । क्षणमपि कलहं विना न तूष्णीं तिष्ठन्तीति यावत्। तथा उष्णे दण्डादिधरे क्रूरपुरुषे सन्निहिते सति शीतलतामुपेत्य मृदुलस्वभावतां शिरोनमनादिरूपां प्राप्य शिशिरे स्त्रीबालादिभीतजने प्राप्ते सति उष्णतां तदुपरि क्रुंङ्कारादिकं भजन्तीति। एतदेव कापेयकलहोचित इत्यस्य पूर्वोक्तस्य विवरणमिति बोध्यम् ।

एवं कपिकुलपतेर्हनूमतोप्यत्र वर्णनं परिस्फुरति। तथा हि—मुक्ताहारेण 'प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि ।' इति दिव्यदम्पतिपारितोषिकलब्धेन विभूषिताः, पूजायां बहुवचनं, तस्य वृत्त्यै स्थिरतया प्रकाशाय अन्तरं वस्त्रमपि न दिशन्ति वस्त्रेण नाच्छादयन्ति 'हनूमांस्तेन हारेण शुशुभे वानरर्षभः। चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाचलः ॥' इति

79

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २२] कलि ५०५० विरोधि { कर्कट, सिंह } { साधारण सं ११, शास्त्रानुबन्ध सं १२ } आहत्य सं १२

## संस्कृतसेवा ॥

नैवाद्य अस्मद्देशे अल्पा सङ्ख्या तेषां ये संस्कृतप्रियाः संस्कृतभक्ताः संस्कृतसेवायां तीव्राभिलाषाः सोत्कण्ठाः । प्रतिप्रदेशं बहवः कथं तदभिवृद्धिः कार्या तदर्थं किमस्माकं कर्तव्यम् ; इति निरन्तरचिन्तालीढचेतसो वर्तन्ते, यथाप्रतिभं यथाशक्ति किमपि किमपि कुर्वन्ति च ।

अस्मद्राजधानीप्रधाननगरे मद्रे उत्साहिनः केचन संस्कृतपण्डिताः 'दक्षिणभारतीयसंस्कृतपण्डितपरिषदं' स्थापयित्वा सम्मेलनसंविधानेन उपन्यासप्रवर्तनेन नाटकाभिनयसंपादनेन च तत्रत्यानां जनानां संस्कृते रुचिं श्रद्धां च जनयन्तो वर्तन्ते । आन्ध्रद्रविडसन्धिप्रदेशे चित्तूर्-नगरे केचित् पण्डिताः काञ्चन सभां स्थापयित्वा श्रद्धालूनां शिक्षादानेन परीक्षाप्रवर्तनेन उपन्यासादिघटनेन च पौरान् संस्कृते दत्तदृष्टीन् कुर्वन्तः सन्ति । त्रिशिरःपुरे बहोः कालात् प्रभृति एवंविधः संस्कृतसेवायत्नः

वर्षस्यकाले बहु वारिवाह
काले न वर्षस्यथवाऽतिदभ्रम् ।
यजामहे त्वां न वयं वराकाः
सत्यं तथाप्यङ्ग दयां कुरु त्वम् ॥

ससंरम्भं क्रियमाण आस्ते। द्रविडदेशतिलकायमाने मधुरानगरे अस्ति कश्चन संस्कृतसङ्घः।

अस्मद्देशस्य पश्चिमोत्तरभागे स्थितायां बरोडा (बडोदा) नगर्यां सम्प्रति संस्कृताभिवर्धनतत्परा काचन सभा प्रतिष्ठापितेति अस्मत्सुहृदो निवेदयन्ति। अयोध्यायां सुचिरात् 'संस्कृतकार्यालयः' बहुधा प्रवृत्तिं कुर्वन् वर्तत इति पण्डिता जानन्त्येव। विशिष्यात्र सः नवीनरीत्या ललितान् जनानां चित्ताकर्षिणो गद्यग्रन्थान् प्रकाशयितुं कृतोद्यम इति जानीमः। गद्यरामायणं गद्यभारतं श्रीकृष्णचरितं इत्येते अन्ये च गद्यग्रन्थाः प्राकाश्यन्त।

तदिदं सर्वमस्माकं अत्यन्तं सन्तोषाय। जनानां भाषान्तरैकसङ्ग-कारिणि अस्मिन् काले अल्पशोऽपि एवं क्वचित् क्वचित् कैश्चिदार्यमतिभिः क्रियमाणं संस्कृतपालनयत्नं दृष्ट्वा कः संस्कृतप्रियो न संतोष्टुमर्हति। परन्तु पूर्वकाल इव संस्कृतस्य सार्वभौमीं प्रतिष्ठामिच्छतामियं चिन्ता भवति—विप्रकलितं तत्र तत्र क्रियमाणेन यत्नेन उद्देश्यस्य कियती सिद्धिर्भविष्यतीति। सर्वैर्मिलित्वा महान् प्रयत्नः कार्यः। अर्थशक्तिः मनुष्यशक्तिश्च आ हिमालयात् आ कुमारीभ्यः यावती सम्पादयितुं शक्यते तावतीं सम्पाद्य कृत्स्ने अस्मद्देशे यथा भूयिष्ठानां संस्कृताध्ययनेऽभिरुचिः, अनधीयानानामपि सर्वेषां तत्र तन्मयेषु ग्रन्थेषु तदध्यायिषु च आदरः गौरवं प्रीतिश्च अत्यन्तं जायेत तथा संविधेयम्। प्रादेशिकसभाप्रवर्तकाः परस्परं संव्यवहारेण समष्टिसभां स्थापयितुमर्हन्ति। तद्द्वारा क्रमेण कृत्स्ने भारतवर्षे संस्कृते श्रद्धां रुचिं च उद्भावयितुमर्हन्ति।

संस्कृतप्रचारतत्परैः अन्यत् किञ्चिदवश्यमवधेयम्। संस्कृतप्रचारस्य, तदभिवर्धनस्य, जनैस्तदधिगमस्य किमुद्देश्यम्? पाश्चात्यैः समागम्य तद्रीत्या काञ्चन विद्यां आचारांश्च शिक्षित्वा तदनुगुणं जीवितं प्रायः सर्वे जनाः सम्प्रति वर्तयन्ति। दिनेषु गच्छत्सु गच्छत्सु प्राचीना अस्मदीया जीवितपद्धतिः अनादृता विस्मर्यमाणा विलुप्यमाना विलीयमाना भवति। इतः उपदशेषु किञ्चिदधिकेषु वा वर्षेषु अतीतेषु इमे भार-

तीया इति प्रत्यभिज्ञापकेन चिह्नेन सर्वथा शून्याः अस्मज्जनाः नाममात्रेण देशवासमात्रेणैव वा देशान्तरवासिभ्यो भिन्ना भविष्यन्तीति प्रतिभाति। अस्यां दशायां संस्कृतमयीनां विद्यानां उपयोगो मनागपि न दृश्यते । अतो भाषाप्येषा उपेक्ष्यते। एवं स्थिते संस्कृताभिवर्धनतत्परैः लोकयात्राप्रवृत्तेः, अस्मज्जीवनमार्गस्य सामीचीन्यं संस्कृतविद्यापरिचयं विना सर्वथा न भविष्यतीति महाजनानां हृदयङ्गमं निरूपणं यावत् न करिष्यते तावत् तेषां सर्वः प्रयासः केवलं बधिरकर्णजाप एव ।

आधुनिकरीत्या वृत्तान्तपत्रिकाणां, नवीनकानां (नावल्) च प्रकाशनं वा सम्मेलनानि प्रवर्त्य महता कण्ठेन घोषणं वा न कस्मैचित् फलाय कल्पेतेति यत् हृदये स्थितं तदेवं स्पष्टं कथयन्तो वयं मर्षणीयाः। आदौ यथाशक्ति क्रमेण सम्यक् च अस्मदीयानां आचाराणां आत्मगुणानां धर्माणां च व्यवस्थां परिपालयन्तो वयं संस्कृतनिष्ठाः यदि जनानां स्वयमेव बहुमन्तव्यायां उन्नतायां स्थितौ आत्मानं स्थापयेम तर्हि अचिरात् सर्वमस्मत्समीहितं सम्पत्स्यत इति प्रतीमः। जीवितस्य इदं लक्ष्यमिति सम्प्रति न ज्ञातम्। इदमज्ञानं गाढे तमसि लोकं मज्जयति। तेन अवमर्दः सम्मर्दः प्रतिमर्दः सर्वो वर्तते वर्धते विवर्धते। अस्या दुरवस्थायाः प्रहाणाय विज्ञानज्योतिष उदयोऽपेक्ष्यते। स संस्कृतसमुद्राद्भवितुमर्हति। नास्ति अन्यतः सम्भवः। तदेतत् संस्कृतप्रणयिभिरवधेयम्। संस्कृतविदां गोष्ठी इत्युक्ते सद्यो जनानां मनसि तेषु बहुमानः भक्तिः प्रीतिः स्वयं सन्तोषः प्रहर्षः शान्तिः इत्यादिकं यथा जायेत तथा संस्कृतविद्भिः स्वस्वरूपं प्रथमतः संस्कर्तव्यम्।

'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः' इति भगवता सादरमुपदिष्टा दैवी सम्पत् सम्पादयितव्या। अन्यथा स्वात्मानमेव परिष्कर्तुमक्षमाणामेषां लोकपरिष्कारे वा संस्कृतपरिष्कारे वा का योग्यता? स्वस्ववासस्थाने सामान्यजनानामपि हृदयङ्गमं काव्यकथाः पुराणवृत्तं धर्मशास्त्रसारः इत्येवमादिप्रवचनसौकर्यं परिकल्पनीयम्। 'सम्यग्जीवनाय यदवश्यं ज्ञातव्यं तत् सर्वं संस्कृतग्रन्थजाताद् ज्ञातव्यम्।

नान्या गतिरस्ति' इति जना यथा दृढं गृह्णीयुः तथा कर्तव्यम्। देशभाषया प्रदेशभाषाभिज्ञ सर्वजनसुग्रहतया सारार्थबोधिनो ग्रन्थाः मुद्रयित्वा प्रकाशनीयाः। एवमादिकार्यकलापपर्यालोचनाय निर्णयाय च यथानिर्णयं प्रवृत्तये च संस्कृतसम्बन्धि समष्टिस्थापनमेकं अवश्यमत्र अपेक्षितम्। अत्र तत्तत्प्रदेशवर्तिसंस्कृतसङ्घकार्यनिर्वाहिणः सुधियः समुचितां दृष्टिं दातुमर्हन्ति।

---

# श्रीरुक्मिणीविवाहः॥

(Vidyalankara V. R. Srinivasa Tatacharya Siromani)

विदर्भाधिपतिर्भीष्मको नाम राजाऽऽसीत्। तस्य रुक्मिरुक्मरथरुक्मबाहुरुक्मकेशरुक्ममालिनामानः पञ्च पुत्राः सर्वाङ्गसुन्दरी सुशीला रमावताररूपा रुक्मिणीनाम्नी पुत्री चाभवन्। सा स्वगृहमागतैर्जनैः गीयमाना मुकुन्दस्य रूपवीर्यगुणश्रियः श्रुत्वा तमेवात्मनोऽनुरूपं पतिं मेने। कृष्णः स्वागारागतजनमुखात् बुद्धिसौन्दर्यौदार्यसच्चरित्रादिगुणसम्पन्नां तां निशम्य तां स्वानुरूपभार्यां मत्वा परिणेतुमैच्छत्। कृष्णद्विट् रुक्मी स्वबन्धुषु स्वभगिनीं कृष्णायैव वितरीतुं वाञ्छत्सु सत्सु तान्निवार्य शिशुपालायैव तां दातुं निरचिनोत्। सा स्वसोदरनिर्णयमवेत्य भृशं दुर्मनाः विचिन्त्य आप्तं कञ्चिद्द्विजं कृष्णमानेतुं द्रुतं प्राहिणोत्। स द्वारकामासाद्य प्रतिहारैः प्रवेशितः काञ्चनासने आसीनं कृष्णमपश्यत्। कृष्णस्तमवलोक्य निजासनादवरुह्य तमुपवेश्य पूजयामास। तस्मिन्भुक्तवति विगताध्वश्रमे च सति कृष्णस्तमुपगम्य पाणिना तत्पादौ शनैस्सम्मर्दयन् अवहितचित्त इत्थमपृच्छत्—हे द्विजवरश्रेष्ठ, अयत्नलब्धदेहधारणोपयुक्तवस्तुप्रयुक्तः वृद्धानां मम च सम्मतः सन्तोषरूपो धर्मः किं तव विद्यते। स्वधर्मादनपेतस्य विप्रस्य तथाविधवस्तुप्रयुक्तस्सन्तोषोऽखिलकामधुक् भवति। सुरेश्वरोप्यसन्तुष्टश्चेत् ऐहिकमामुष्मिकं च सुखं नप्राप्नोति। अकिञ्च-

सोऽपि सन्तुष्टेन सर्वाङ्गविज्वरश्शेते । स्वतःप्राप्तेन वस्तुलाभेन हरिचरणानुसन्धानप्रयुक्तात्मलाभेन वा सन्तुष्टान् स्वधर्मनिष्ठान् परोपकारिणः प्राणिनामत्यन्तसुहृदो देहात्माभिमानरहितान् जितेन्द्रियान् विप्रान् अहमसकृत् शिरसा नमस्करोमि । कच्चिद्वो राजतः कुशलम् । यस्य राज्ञो देशे प्रजाः पाल्यमानाः सुखं वसन्ति स मे प्रियः । यस्माद्देशात् यत्प्रयोजनमनुसन्धाय समुद्रजलं निस्तीर्य इहागतोऽसि तत्सर्वमगुह्यं चेद्ब्रूहि । यत्ते कार्यं तत्करवामेति ।

एवं कृष्णेन पृष्टो ब्राह्मणो रुक्मिणीविवाहविषये तद्बन्धूनां तत्सोदरस्य रुक्मिणश्चाशयमन्यच्च वर्णयित्वा, हे पुरुषोत्तम, रुक्मिण्या ते सकाशमहं प्रेषितः । तस्यास्सन्देशमाकर्ण्य यथोचितं क्रियतामित्यभिधाय लिखितं तस्याः पत्रं तत्पादयोर्निधाय तं प्रणनाम । सन्तुष्टः कृष्णः तदादाय ब्राह्मणमुखेनावाचयत् । पत्रलिखितस्यायं संग्रहः— ‘भुवनसुन्दर, सन्तापहरान् तव गुणान् चक्षुष्मतां नयनयोरासेचनकं रूपं च श्रुत्वा अपत्रपं चित्तं त्वय्येवासज्जते । गुणरूपादिभिरात्मनैव तुल्यं लोकमनोऽभिरामं त्वां कुलगुणधैर्यसम्पन्ना का कन्या विवाहावसरे पतिं न वृणीत । मया भवान् पतिर्वृतः । आत्मा भवतेऽर्पितः । त्वमागत्य मां जायां विधेहि । मृगपतेर्बलिं गोमायुवत् वीरस्य तव भागभूतां मां शिशुपालश्शीघ्रमागत्य मा स्पृशतु । मदीयानेकजन्मार्जितसुकृतैर्गदाग्रज एव मे पतिर्भूयात् । श्वो भाविनि विवाहे त्वं विदर्भान् गुप्त एवागत्य ततस्सेनापतिभिः परिवृतस्सन् चैद्यादिबलं पराभूय प्रभावप्रदर्शनशुल्कां मां राक्षसेन विधिना प्रसह्योद्वह । कुलदेवगिरिजालयमासाद्य पूजां विधायागतां मां प्रसह्य गृहीत्वा यद्युद्वहेः तदा मद्बन्धुवधोऽपि न प्रसजेत् । आत्मतमोपहत्यै उमापत्यादिमहद्वाञ्छितपदपङ्कजरजस्स्नपनस्य भवतः प्रसादं यद्यहं न लभेय तदा व्रतकृशानसून् जह्याम् । शतजन्मभिरपि तपसा भवतः प्रसादं सम्पाद्य भवतो भार्या स्याम् ।’ इति ।

यदुनन्दनो रुक्मिण्यास्सन्देशं निशम्य मृधे राजन्यानुन्मथ्य मत्परां तामानेष्य इति ब्राह्मणं प्रति गदित्वा स्यन्दनमारुह्य द्विजमारोप्य

तूर्णगैर्हयैरानर्तादेकरात्रेण विदर्भानगमत् । कुण्डिनपतिस्स राजा पुत्रस्नेहेन स्वां कन्यां शिशुपालाय दास्यन् पुरालङ्कारपितृदेवाद्यर्चनमलङ्कृताया रुक्मिण्याः अन्यैर्मङ्गलवाचनं द्विजैर्वेदत्रयमन्त्रै रक्षां पुरोहितेनाथर्वमन्त्रैः प्रतिकूलमहाशान्तिहोमं च कारयित्वा हिरण्यादीनि प्रादात् । एवं चेदिपतिर्दमघोषो राजा सुताय शिशुपालाय मन्त्रज्ञैरभ्युदयोचितं सर्वं कारयित्वा चतुरङ्गसैन्येन परिवृतः कुण्डिनं ययौ । विदर्भाधिपतिस्तमभिपूज्य निर्मिते निवेशने मुदा निवेशयामास । कृष्णरामद्विषः चैद्यपक्षीयाः चैद्याय कन्यां युद्धेनापि साधयितुं काङ्क्षन्तः साल्वादयोऽन्ये भूभुजश्च समग्रबलवाहनास्तन्नगरमाजग्मुः । बलवान् रामः शत्रुपक्षे स्थितानां राज्ञामुद्यमं कन्यां हर्तुमेकं गतं कृष्णं च श्रुत्वा कलहशङ्कितो भ्रातृस्नेहेन त्वरितो महता बलेन कुण्डिनं प्रागात् । रुक्मिणी इत्थं व्यचिन्तयत्— 'मन्दभाग्याया मे उद्वाहो रात्रिमात्रान्तरितः । अरविन्दाक्षो मत्सन्देशहरो द्विजो वा नाद्याप्यायाति । मुकुन्दो मयि धाष्ट्र्यादिकं विचिन्त्य नागच्छत्येव किं । किं वा ब्रह्मादयो विमुखाः ।' इति । एवं विचिन्तयन्त्या गोविन्दागमनं प्रतीक्षमाणायास्तस्या वाममूरुभुजनेत्रं स्फुरत् प्रियमशंसत् । अथ कृष्णादिष्टो द्विजस्तस्यै कृष्णमागतं तस्यास्स्वसमीपनयनं प्रति कृष्णेनोक्तं सत्यवाक्यं च न्यवेदयत् । सन्तुष्टा सर्ववन्द्या सा ब्राह्मणाय प्रत्युपकर्तुं प्रियं योग्यं वस्त्वपश्यन्ती अत्यर्थप्रियं स्वनमनं चकार । भीष्मको रामकृष्णावुद्वाहदिदृक्षया स्वनगरं प्राप्तौ श्रुत्वा तूर्यघोषेण पूजासाधनैश्च सहाभिगम्य मधुपर्कादिभिस्सम्पूज्य भोग्यभोगोपकरणादिसमृद्धिमत् निवेशनं परिकल्प्य ससैन्ययोस्सानुगयोस्तयोरातिथ्यं यथावद्विदधे । स नृप इतरान् भूपानपि तत्तद्वीर्यवयःप्रभृत्यनुरूपं सर्वैः कामैः समपूजयत् । विदर्भपुरवासिनो नेत्रमनोहरं कृष्णमुखपङ्कजस्य लावण्यं पश्यन्तः कृष्णस्य रुक्मिण्याश्च दाम्पत्ये परस्परमेवानुरूप्यं लपन्तो यद्यस्माकं प्राचीनं पुण्यमस्ति तेन सुकृतेन प्रीतो विधाता वैदर्भ्याः पाणिमच्युतो गृह्णात्वित्यनुगृह्णातु इति सानुरागं वदन्ति स्म । तदनु सा राजभटैर्गुप्ता मुकुन्दचरणाम्बुजं ध्यायन्ती यतवाक् मातृभिस्सखीभिर्नानानैवेद्य-

पूजासाधनहस्ताभिस्स्वलंकृताभिः द्विजपत्नीभिर्गणिकोत्तमाभिश्च सह देवसदनमासाद्य धौतपादकराम्बुजा उपस्पृश्याम्बिकान्तिकं प्राविशत्। सा श्रीस्सत्यपि स्वावतारकुलाचारानुसारिणी लोकानुग्रहशीला द्विजपत्नीभिः पुरोऽवस्थापिता अम्बिकासकाशे भगवान् कृष्णो मे पतिर्भूयात् तद्भवत्यनुमोदताम् इति नमस्कारपूर्वकं सम्प्रार्थ्य शिवमुमाञ्चोदकगन्धाक्षतादिभिर्नानाविधनैवेद्यैश्च यथावदपूजयत्। ततः तया उदकादिभिर्लवणापूपादिभिश्च सम्पूजिता जीवद्भर्तृका विप्रस्त्रियः तस्यै गौर्युपभुक्तस्रगादिकं प्रदायाशीर्वादमकलयन्। सा ताभ्यो देव्यै च नमस्कृत्य तत् स्रगादिकं जगृहे। अथ सा मौनव्रतं त्यक्त्वा रत्नमुद्रिकोपशोभितसखीपाणिं स्वपाणिना प्रगृह्याम्बिकागृहात् निश्चक्राम। सर्वाङ्गसुन्दरीं नानाभरणभूषितां कलहंसगामिनीं तां विलोक्य समागता वीरा नृपतयस्तद्दर्शनोदितकामातुराः न केवलं मुमुहुः, अपि तु यात्राच्छलेन हरये स्वलावण्यमर्पयन्तीं तां वीक्ष्य तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राश्च सन्तो गजरथाश्वतः क्षितौ निपेतुश्च। भगवत्प्राप्तिदिदृक्षया शनैर्गच्छन्त्या प्राप्तान् नृपान् ह्रियेक्षमाणया तया दृष्टोऽच्युतः चैद्यादिषु समीक्षमाणेषु तन्मण्डलं परिभूय रथमारुरुक्षन्तीं तां गरुडध्वजं रथं समारोप्य सृगालमध्यात् स्वभागहृत् सिंह इव रामपुरोगमः शनैरयात्। मानिनो जरासन्धादयः शत्रवः कन्याहरणं स्वाभिभवं यशःक्षयं चासहमानाः धिगस्मान्, धनुर्धारिणामस्माकं यशः सिंहानां यशो वृकैरिव गोपैरपहृतमित्याचुक्रुशुः। एवमाक्रुश्य ते कुपिताः कवचिता धनुर्धरा अश्वादीनारुह्य ससैन्या यदूननुधावन्तः स्वधनूंषि टङ्कारयित्वा स्वसंमुखान् स्थितांस्तान् शरासारैराच्छादयन्। रुक्मिणी पत्युर्बलस्य दुर्दशामालोक्य भीता तद्वक्त्रं सव्रीडमैक्षत। भगवान् तदाशयमवगत्य तां प्रति, वामलोचने माभैषीः। तावकैः सैन्यैश्शात्रवं बलमधुनैव विनङ्क्ष्यतीत्याह स्म। जरासन्धपुरस्सरा राजानः स्वविक्रममममृष्यमाणैर्जयकाङ्क्षिभिर्गदसङ्कर्षणादिभिर्वृष्णिभिः क्रियमाणं स्वसैन्यसमुदायध्वंसमवेक्ष्य विमुखा हृतदारमिवातुरं शिशुपालं समेत्य, भो भो पुरुषशार्दूल, इदं दौर्मनस्यं त्यज। देहिषु सुखं दुःखं वा

स्थिरं न दृश्यते। सुखायैव कर्माणि कुर्वन् जनः स्वस्वकर्मानुगुणेश्वरेच्छया सुखदुःखे प्राप्नोतीत्यादिकमब्रवन्। तत्र जरासन्धस्तं प्रति इत्थमकथयत्। 'त्रयोविंशत्यक्षौहिणीसैन्यैस्सहितोऽप्यहं कृष्णेन सह सप्तदश संयुगानि कृत्वा सप्तदशकृत्वः पराजितः। एकस्मिन् संयुगे परं अहं जितवानस्मि। ईश्वरशरीरकालेन कृत्स्नं जगद्विद्रावितं जानन् पराजये न शोचामि विजये न प्रहृष्यामि च। वीरयूथपयूथपाः सर्वे वयं स्वल्पसैन्यैः कृष्णपालितैर्यदुभिरधुनापि पराजिताः। रिपवः स्वानुकूलकाले जिग्युः। यदास्माकं कालोऽनुकूलो भवेत् तदा जेष्यामः।' इति। एवं मित्रैः प्रबोधितश्चैद्यस्सानुगः स्वपुरमविन्दत। हतशेषास्ते नृपा अपि स्वं स्वं पुरमलभन्त।

कृष्णद्विट् बली रुक्मी तु स्वसू राक्षसोद्वाहमसहमानोऽक्षौहिण्या वृतस्सन् कृष्णं पृष्ठतोऽन्वगच्छत्। स सर्वभूपालानां शृण्वतां सतां समरे कृष्णमहत्वा रुक्मिणीमनावर्त्य कुण्डिनं न प्रवेक्ष्यामीति प्रतिज्ञाय रथमारुह्य भगवन्तमनुधाव्य धनुर्विकृष्याष्टभिः शरैस्तं सुदृढं जघान। कृष्णस्तु बाणैस्तस्य धनूंषि छित्वा तं चतुरो वाहान् सूतं ध्वजं च विव्याध। अथ कृष्णः स्वच्छिन्नपरिघादिनानाविधायुधस्य खड्गमादाय पावकं पतङ्गस्येवात्मानमभिद्रवतस्तस्यासिं छित्वा तं हन्तुमुद्यतः तीक्ष्णमसिमाददे। तदनु पत्युर्भ्रातृवधोद्योगं पश्यन्त्या भीतया कृपणां दशां प्रपन्नया रुक्मिण्या सर्वस्मात्परः शरण्यः कल्याणगुणपरिपूर्णो भवान् उपक्रान्ते विवाहे असमाप्त एव तं हन्तुं नार्हतीति पादौ गृहीत्वा प्रार्थितः कृष्णो दयया तद्वधान्न्यवर्तत। अथ कृष्णोऽसाधुकारिणं तं तच्चेलेन बध्वा तं तेनैवासिना तत्तत्स्थानावशिष्टश्मश्रुकेशं मुण्डयन् विरूपमकरोत्। भगवान् सङ्कर्षणो वैरूप्यमापन्नं हतप्रायं तमवलोक्य कृपया बन्धाद्विमुच्य कृष्णमेवमब्रवीत्—हे कृष्ण, अस्मज्जुगुप्सितमसाध्विदं कर्म त्वया व्यधीयत। श्मश्रुकेशानां वपनं बन्धोर्वध एव भवति। बन्धुर्वधार्हदोषोऽपि तेनैव दोषेण त्याज्यः। श्रीमदान्धा मानिनो जनाः राज्यतेजोमानादेः कारणात् बन्धून् क्षिपन्ति। अस्माकन्त्वेतदनुचितम् इति। अथ रुक्मिणी तद्विषादशान्तये भगवता रामेण, हे साध्वि, भ्रातुर्वैरूप्यचिन्तया अस्मभ्यं मैवा-

83

सूयेथाः। दुःखप्रदोऽन्यो नास्ति यतः पुमान् स्वकृताकुशलकर्मोपार्जित-दुःखभुक्। क्षत्रियाणां घोरतरोऽयं धर्मः प्रजापतिना विनिर्मितः येन धर्मेण भ्रातापि भ्रातरं हन्यात्। अतः को नामास्माकमपराधः। देहात्म-स्वतन्त्रात्माभिमानिवत् सदा सुहृदां भद्रं शत्रूणामभद्रं च मन्यसे। तवेयं बुद्धिः सर्वभूतेष्वेकरूपा न भवति। नृणां सुहृत् दुर्हृत् उदासीन इति बुद्धिमोहोऽनात्मन्यात्मबुद्धिं अस्वतन्त्रे स्वातन्त्र्यबुद्धिं च कल्पयन्त्या भग-वन्मायया भवति। एकस्य परमात्मनः कृत्स्नं जगत् शरीरभूतमित्येक-शरीरभूतपाणिपादादिषु शत्रुमित्रादिविभागो नोपपद्यते। तस्मादुक्तभगव-न्माययाप्रयुक्तमुक्तबुद्धिमोहं कृत्स्नं जगत् परमात्मशरीरमिति ज्ञानेनापा-कृत्य ज्ञानानन्दस्वरूपात्मविमर्शनपरा भवेति चिदचिदीश्वरस्वभाववर्णन-पूर्वकं प्रतिबोधिता स्वस्थस्वान्ता समवर्तत। रुक्मी तु प्राणमात्रावशिष्टो विरूपकरणं स्मरन् भोजकटाख्यं पुरं निर्माय तत्र पूर्ववत् प्रतिज्ञाय न्यव-सत्। भगवान् भूमिपानेवं निर्जित्य रुक्मिणीं द्वारकामानीय विधिवदुप-येमे। तदा द्वारकायां भगवद्भक्तानां गृहे गृहे महोत्सव आसीत्। निर्म-लमणिकुण्डला नरा नार्यश्च मुदिता वरवध्वोरुपायनमानिन्युः। द्वारका ध्वजैः विचित्रमाल्याम्बररत्नतोरणादिभिश्च भृशमशोभत। कुरुसृञ्जयादयो मिथस्समेत्य मुमुदिरे। तत्र तत्र देशेषु गीयमानं रुक्मिण्यानयनात्मकं भगवच्चेष्टितं श्रुत्वा राजानो राजकन्याश्च भृशं विस्मिता बभूवुः। रमया रुक्मिण्योपेतं श्रीकृष्णं दृष्ट्वा द्वारकानिवासिनां महान्मोद उदपद्यत।

---

# वाणिज्यम् ॥

(Pandit K. S. Ramaswami Sastri, Baroda.)

वणिजां कर्म वाणिज्यमिति सर्वे जानन्ति। त्रैवर्णिकेषु तृतीय-वर्णिनो वणिजः। तेषां च कर्म पुरातने काले मुख्यतया वर्णान्तराणां स्वेषां च परिपोषणमासीत्। परोपकाराय वाणिज्यं कुर्वद्भिः यदल्पतमं मूल्यं तत्तैर्गृह्येत। इदमेव मूल्यं तान् क्रमेण महाधनिनः श्रेष्ठिवर्यान् ध्रुवं कारयेत्। विभिन्नप्रदेशेषु प्ररोहतोऽर्थान् प्रयत्नेन प्रदेशान्तरेष्वपेक्षानुसारे-

णानाय्य प्रजानां पालनं तद्वर्णस्य मुख्यमुद्देश्यमासीत्। पवित्रतमया भावनया क्रियमाणं च वाणिज्यमत्यल्पमूल्येन प्रापयेदर्थान् ; नातिलोभोद्भूतेनाधिकमूल्येन ।

वणिजां चेदं कर्म तैरेवानुष्ठितं बभूव । अन्यवर्णानां तु न वाणिज्यमभूदंशतोऽप्यनुष्ठेयम् । राजानः प्रजापालनाय प्रवृत्ता न वाणिज्य चक्रुः । प्रजाभ्यः षष्ठांशग्रहणं प्रजानामेव पोषणाय तैर्विरचितमासीत् । राजभिः वणिजां कर्मणि कृतमानुकूल्यं प्रजापरिपालनाय, न वणिग्भ्योऽपि करविशेषग्रहणाय । वणिग्भ्योऽन्ये वाणिज्येऽनधिकृता इति भारतीयानां पुरातनं धर्मतत्त्वम् । वाणिज्येन जीवन्तश्चान्ये प्रायश्चित्तीयन्त इत्यासीद्भारतीयभावना ।

विद्याया विज्ञानस्य धर्मस्य च संरक्षणाय प्रवृत्ता ब्राह्मणाः सुतरां दूरे बभूवुर्वाणिज्यवृत्तेः । विना मूलधनसंयोजनं निष्कामतया कृतं विद्याग्रहणं विज्ञानसंरक्षणं धर्मवेदित्वञ्च विनैव मूल्यग्रहणमध्येतृषु संक्रामितमासीत् । अन्ते च

"सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥"

इति शान्तिपाठेनोभाभ्यामाचार्यशिष्याभ्यां तृप्तिरासादिताऽऽसीत् ।

त्रैवर्णिकेभ्योऽन्ये च न वाणिज्यं स्वकर्तव्यं मेनिरे । ते तु कृष्यादिषु पदार्थोत्पादनकर्मसु व्यापृताः समाजस्य बहूपकुर्वन्त आसन् ।

एवं चिराय भारतीयाः जनाः व्यवस्थित कर्म कुर्वाणा धर्मैकप्रधानां बुद्धिमावहन्तः सुखिनो निश्चिन्ताश्च बभूवुः ।

आसीत्तु पदार्थानां परस्परविनिमयः सर्वजनसाधारणः । तत्राभूत वाणिज्यम् । तच्चात्मरक्षणाय परोपकाराय वा कर्तव्यतामवाप । शिष्यमध्यापयन्नाचार्यः न प्रलुलोभ दक्षिणायै । स तु सत्कर्मकारीति समाजेन सुरक्षित आसीत् । असावपि नापैक्षत स्वनिर्वाहार्थादधिकं किञ्चिद्वस्तु । भृतकाध्यापनञ्च पातकतया परिगणितमासीत् । शिष्याश्चाधीतवेदाः आचार्याय प्रियं धनमाजह्रुः स्वकर्तव्यतामवबुध्य न गुरोराकांक्षया ।

राजानश्च प्रजापालनस्य करग्रहणं न मूल्यं मेनिरे। प्रजाश्च करप्रदानेन राजभिः पालनं नावश्यकव्ययममन्यन्त। उभयोरपि स्वकर्म कुर्वतोः परस्परोपकरणमात्मरक्षणञ्च मुख्यमुद्देश्यमासीत्। वणिजोऽपि पदार्थविनिमयं कुर्वन्तः समाजोपकारमेव मुख्यतया भावयन्तः स्वार्थसाधनं ततोऽपि गुणीभूतममन्यन्त।

त्रैवर्णिकेभ्योऽन्येतु समाजसेवामात्मरक्षणमात्रफलकतया कुर्वन्तः कर्मविनिमयं परोपकारैकदृष्ट्याऽप्यकुर्वन्। परपीडनेन वञ्चनेन वा स्वैरं सामाजिकद्रव्यापहरणाय तेषां प्रवृत्तिस्तु नासीदेव।

---

षेक्स्पियर् कृतं

# यथाभिमतम्॥ II 4.

## प्रेक्षणकम् 4। आर्देन्-वनम्

(प्रविशन्ति पुरुषवेषा रोसलिन्द्, अजपालावेषा सिलिआ, निकषोपलश्च)

रोसलिन्द्— अहो बत सर्वेश्वर, कियत् प्रहृष्टो § मे आत्मा !

निकषोपलः – न मे आत्मानं प्रति चिन्ता यदि पादौ मे न रुजेताम्।

रोसलिन्द्– अस्ति मे हृदि 'अयं पुरुषवेषोऽवमन्तव्यः। स्त्रीवदाक्रोशः कार्यः' इति। किन्तु दुर्बलो जनो मया आश्वासयितव्यः। स्त्रैणाकारं प्रति पुरुषाकारेण धीरता प्रदर्शनीया। अतो धीरा भव भद्रे अलिएने।

सिलिआ – नमस्ते, अन्वास्स्व माम्। नाहमितः परं गन्तुं शक्नोमि।

निकषोपलः– मां प्रति तु वरं अन्वासनं वहनात्। वहने वा न कोऽपि लाभो मे भविष्यति, यतस्त्वं, मन्ये, वित्तहीना।

रोसलिन्द्– अस्तु, इदं आर्देन्-वनम्।

---

§ Merry– प्राचीनमिमं पाठमसङ्गतं मन्यमानाः weary–(खिन्नः) इति विपर्यासयन्ति। इदं पुनः सर्वथा असङ्गतं वयं मन्यामहे।

निकषोपलः— अये, आर्देन् वने अहं सम्प्रति वर्ते ; तावन्मूढोऽहमस्मि। अथवा यात्रागामिभिः एभि- गृहे वसतो मे शोभनतरं स्थानमासीत्। अथवा यात्रागामिभिः एभि- र्भवितव्यम्।

रोसालिन्द्— अये, तथा भव, सौम्य निकष ! पश्य कोऽत्र आगच्छति।

कश्चिद्युवा कश्चिद् वृद्धश्च साभिषङ्गं भाषमाणौ।

(ततः प्रविशति कारिन्। सिल्विअस् च)

कारिन्—अयं मार्गः तां तथा कर्तुं, यथा त्वामितोऽपि अवजानातितराम्।

सिल्विअस्— हे कारिन्, कच्चिज्जानासि कियदहं तस्यामनुरक्तोस्मीति।

कारिन्— अंशत उत्प्रेक्षे, यतः पूर्वमहं कामितवानासम्।

सिल्विअस्— न, कारिन्। त्वं वृद्धः। यौवने कामातुरतया अधितल्पं निशीथे दीर्घान् श्वासान् मुक्तवतोऽपि नेदानीमुत्प्रेक्षितुं शक्यम्। यदि तु ते ममेव काम आसीत्—मम पुनः निश्चितमेतत् न कश्चिदेवमकामयतेति (ब्रूहि) कति अत्यन्तपरिहास्यानि कर्माणि सङ्कल्पेन अवशात् कारितोऽसि ?

कारिन्— सहस्रं, यानि विस्मृतवानस्मि।

सिल्विअस् – हन्त, तर्हि न त्वं तथा हार्दं अकामयथाः। कामकारितं जडकृत्यं अल्पिष्ठमपि यदि न स्मरसि न त्वं कामितवानसि।

अथवा यदि त्वं स्वकान्ताप्रशंसावचनैः श्रोतारमुद्वेजयन् नोपविष्टवानसि यथा अहमद्य, न त्वं कामितवानसि।

यदि वा इतरसान्निध्यं अकस्मात् न परिहृतवानसि, यथाऽहमद्य भावपरवशः परिहरामि, तर्हि न त्वं कामितवानसि। अयि पीबी, पीबी ! (निष्क्रान्तः)

रोसलिन्द्— हन्त तपस्विन् अजपाल, त्वदीयं व्रणं प्रत्यन्वेषणां कुर्वती दुरदृष्टवशान्मदीयं ‡ उपलब्धवत्यस्मि।

निकषोपलः— अहं च मदीयम्। स्मरामि यदहं कामयमानावस्थः पाषाणे मामकं खड्गं प्रहृत्य तमादिशं रात्रावागमनाय कान्ता समीप-

‡ कामव्यथा पुनरुद्गतेति भावः।

मेतन्नयेति । स्मरामि च यदहं तस्याः दण्डं ललितयोः छिदादन्तुरयोश्च करयोर्लग्नं गोमध्यं च अचुम्बम् । स्मरामि च यदहं सेति कृत्वा लतां काञ्चिदनुवर्तमानः तस्याः द्वे मुकुले अपचित्य तस्या एव पुनरुपहरन् साश्रुरवोचम्—मम कृते इमे धारयेति । परमार्थतः कामिनो वयं विचित्राणि चेष्टितानि कुर्मः । किन्तु यथा सर्वं मूलप्रकृतौ अवसानमेति तथा कामिनां सर्वा प्रकृतिः जाड्ये अवसानमेति ।

रोसलिन्द् — अतिनिपुणं भाषसे । तत्तु त्वं न जानासि ।†

निकषोपलः— सङ्कटोपनिपातात्पूर्वं कदापि मया आत्मनो बुद्धिमत्ता न ज्ञायेत । §

रोसलिन्द् — अहो बत अस्य अजपालस्य मान्मथो विकारः भूयिष्ठं मामकीनमनुकरोति ।

निकषोपलः— तथा ममापि । किन्तु मयि सः किञ्चिद्यातयामः सम्पद्यते ।

सिलिआ— प्रार्थये अन्यतरो वां अमुं पुरुषं पृच्छतु यदि प्रीत्या धनाय वा अशितुं किमपि दद्यात् । मूर्छा मे भवति प्रायो मरिष्यामि ।

निकषोपलः— अये, त्व आभास ।

रोसलिन्द्— जोषमास्स्व, जड । न स ते बन्धुः ।

कारिन् — क आह्वयति ?

निकषोपलः— त्वत्तः श्रेयांसः ।

---

† स्वयं प्रकाशितां रोसलिन्द्-अस्याः कामव्यथां शमयितुकामः निकषः कामुकवृत्तान्तः सर्वः जाड्यैकपर्यवसायीति आत्मनि दर्शनेनाह । तदुपपन्नमभ्युपेत्य सा तं श्लाघते स्म । श्लाघा तु न शुद्धा । 'मूढस्त्वम् । इदं निपुणभाषणमिति विवेकस्ते नास्ति । अथापि इदं ते भाषणं निपुणम्' इत्येवंरूपा ।

§ 'इदं साधु । इदं कार्यम् ।' इति प्रथमं निपुणं निरूप्य निश्चित्यैव किमपि क्रियते । अनर्थस्तु ततो भवति । ततःपरमेव तु विवेको जायते अनिपुणमाचरितम् । एवं तु कर्तव्यमासीदिति । इति भावः । निपुणमानिन्या भवत्या अपि इयमेव स्थितिस्तात्त्विकीति तस्य निगूढो भावः ।

कारिन्— अन्यथा ते अतीव शोच्याः स्युः।

रोसलिन्द्— जोषमास्व, अहं ब्रवीमि। सुसायं ते, मित्र।

कारिन्— तवापि, उदार आर्य। सर्वेषां च युष्माकम्।

रोसलिन्द्— याचामि त्वां अजपाल, यदि प्रेम स्वर्णं वा अस्मिन्नरण्ये उपचारक्रयणाय कल्पेत तर्हि नयास्मान् तत्र यत्रास्माकं विश्रमः आहारश्च सुलभः स्यात्। इयं बाला अध्वश्रमपीडिता आहारं विना मूर्छति।

कारिन्— अभिरूप आर्य, तामहं अनुकम्पे। कामये च तस्याः कृते, न मम कृते, तच्छ्रमपरिहारानुगुणाः सम्पदो मे भवितुमर्हन्तीति। अहं तु अन्यस्य कस्यचित् अजपालः। मया चार्यमाणान् अजान् नाहं विनियुञ्जे। मम स्वामी रूक्षप्रकृतिः। अतिथिपूजाजनितं धर्मं न गणयति। अपि च तस्य गोष्ठं अजाः गोचराश्च विक्रेयाः संवृत्ताः। अजगोष्ठे च तदसन्निधानेन हेतुना न तत् किमप्यस्ति यद् भवद्भिराहारीक्रियेत। अथापि आगत्य पश्यत। मम हि अत्यन्तं सम्भावनीया अतिथयो भवन्तः।

रोसलिन्द्— कः सः योऽस्य समजं गोचरांश्च क्रेष्यति।

कारिन्— स तरुणः कामुकः, योऽत्र क्षणात् पूर्वं भवत्या दृष्टः। अल्पा तस्य श्रद्धा कस्यापि क्रयणे।

रोसलिन्द्— यद्यार्जवयुक्त तर्हि त्वामर्थये गोष्ठं गोचरं समजं च क्रीणीहि। मूल्यमस्मत् लप्स्यसे।

सिलिआ— वयं च ते वेतनं वर्धयिष्यामः। इदं स्थानं मे रोचते। अस्मिन् मम कालं सानन्दं यापयिष्यामि।

कारिन्— नूनं तद् वस्तु विक्रेष्यते। मया सह आगच्छत। परीक्ष्य भूमिं लाभं, ईदृशं जीवनं च यदि रोचयध्वे, अहं भवतां अनुरक्तोऽजपालो भविष्यामि। स्वर्णं दत्त्वा सद्यस्तत् क्रीणीत।

(निष्क्रान्ताः)

---

# समुद्रवर्णनम् ॥

(T. E. Viraraghavacharya)

लक्ष्मीकौस्तुभलक्ष्मलक्ष्यमभवद्येनैव वक्षो हरेः
भूतोत्पत्तिलयस्थितीस्स विदधात्यध्यास्य यं पूरुषः ।
यत्संसर्गविशोधितां शशिकलां मूर्ध्ना बिभर्तीश्वरः
सोऽयं वाङ्मनसातिशायिमहिमा वारां निधिर्वर्ण्यते ॥ १ ॥

श्रीसोमोदय[1]दर्शनीयविभवः कैलासशैलायते
नित्यं वि[2]द्रुमसम्पदाऽनुकुरुतेऽरण्यश्च रत्नाकरः ।
श्यामात्मा च[3]पलोर्मिभिर्घ[4]नरसारावैश्च मेघायते
किश्चासावु[5]डुपाश्रितामृतवपुश्चन्द्रायते वारिधिः ॥ २ ॥

गङ्गापावनतां विदुः कतिपये विष्ण्वङ्घ्रिसङ्गार्जितां
एके साहजिकीं परे हरजटाजूटानुबन्धोद्भवाम् ।
अम्भोराशिसमागमात्समुदितामेतां समाचक्ष्महे
गङ्गामत्यजतां यतो हरिहरौ सिन्धुस्तु सक्तस्तया ॥ ३ ॥

इन्द्राद्या दिवि लोकपालपदवीमध्यासतेऽद्यापि यत्
यच्चाद्यौ स्थितिसंहृती कलयतो देवौ रमोमेश्वरौ ।

---

1 उमया सह वर्तत इति सोमः । श्रीमतः पार्वतीपतेरुत्कर्षेणेति शैलपक्षे । श्रीमतः चन्द्रस्य, उदये आविर्भावे इति, श्रीसोमयोः लक्ष्मीचन्द्रयोः, उदयेन उत्पत्त्या (मथनसमये) इति च चन्द्रपक्षे ।

2 वयः पक्षिणः द्रुमाश्च तेषां सम्पत्त्येति अरण्यपक्षे । विद्रुमाः प्रवालानि इति समुद्रपक्षे ।

3 चपलाः विद्युतः तासां परम्पराभिः । अन्यत्र चञ्चलवीचिभिः ।

4 घनरसानि जलानि । मेघपुष्पं घनरसम् इति कोशः । तैः आरावैश्च ।

5 उडुपश्चासौ अश्रितामृतवपुश्चेति चन्द्रपक्षे । उडुपैः प्लवैः अश्रितेत्यादि समुद्रपक्षे ।

लक्ष्मीचन्द्रगजामृतप्रभृतिभिस्सिद्धं हि तत्सैन्धवैः
त्रैलोक्यस्थितिकारणं तत इदं तत्त्वं समुद्राह्वयम् ॥ ४ ॥

जाया हैमवती स्वयं परिगतस्स्वर्णस्थलीर्भूयसीः
नित्यं भाति बहूर्मिकस्सुविदितो रत्नाकरस्सर्वतः।[1]
जामाता श्रुतिभिर्हिरण्मयवपुर्जेगीयते श्रीपतिः
सिन्धोस्तत्किल सर्वतोमुखगता संपूर्णता कथ्यते ॥ ५ ॥[2]

व्याख्यात्यम्बुधिमेखलेति धरणेराख्याऽम्बुधेर्व्याप्ततां
आपातालमगाधता सगरजोदन्तेन सत्यापिता।
सादित्यग्रहतारकामिह दिवं प्रत्यक्षयामो वयं
त्रैलोक्याकृतिरीशवद्विजयते तस्मादयं वारिधिः ॥ ६ ॥

सामान्येन विशेषतश्च विदितैर्नेतुर्गुणैरन्वितं
धीरोदात्तमिमं स्वयंवरपतिं नद्यः प्रपद्योत्सुकाः।
सिन्ध्वद्वैतमिहाधिगम्य परमं ता दक्षिणे नायके
सन्तुष्यन्ति सरित्पतावतितरां स्वाधीनसद्भर्तृकाः ॥ ७ ॥

दूरोदश्चितवीचिहस्तनिचयैराहूय फेनैर्हसन्
गम्भीरध्वनिनाऽभिनन्द्य पथिजं वातैर्व्यपोह्य श्रमम्।
अर्थिभ्यो वितरन् धनं वितरणित्वञ्चात्मनश्छादय-
त्याश्चर्यं तरणिप्रचारकलनव्याजेन रत्नाकरः ॥ ८ ॥

[ वितरणित्वं दातृत्वं, तरणिशून्यत्वञ्च । ]

मात्स्यादिष्वथ जामदग्न्यजननेऽप्यब्धाववात्सीत्तु यत्
रामत्वे शरणं यदेनमगमत्सोऽपांनिधित्वाय तत्।

---

[1] ऊर्मिकाः-अङ्गुलीयकानि। पक्षे ऊर्मयः - वीचयः।
[2] सर्वतोमुखं - जलं, तद्विषयिणी पूर्णता। अन्यत्र भूयोमुखं गता।

तेनापांनिधिरित्यदःपदमगात्कृष्णावतारे हरिः[1]
नानाजन्मफलस्य नार्हति कलां नाम्नोऽस्य नामान्तरम् ॥ ९

केचित्फेनतरङ्गबुद्बुदसमान् जीवान्विदुरीशान्विदुः
मुक्तौ सिन्धुनदीसमागमसभं जीवेशसाम्यं परे ।
गाम्भीर्यादिमहागुणस्य कवयो दृष्टान्तयन्त्यम्बुधिं
सृष्टोऽयं विधिनोपमा निरुपमा तत्त्वस्य पाथो निधिः ॥ १०

---

# प्रकृतिभेदः ॥

I

नागी— (पुत्रं रङ्गं प्रति) कुत्र प्रतिष्ठसे । सर्वथा अटनम् । न पाठः पठ्यते । नान्यत् कर्तव्यं क्रियते ।

रङ्गः— नाम्ब । अद्यावधि पठन्नेव हि अभूवम् । अनन्तरगृहे मामी 'लवणमत्यन्तं नास्ति । किञ्चित् क्रीत्वा देहि' इत्यवादीत् । क्रीत्वा दत्त्वा अद्यैव आगमिष्यामि ।

नागी— (सक्रोधम्) सम्यक् तावदस्ति । तस्याः तस्याः कार्यान्तरं नास्ति । कस्मिन् गृहे को बालोऽस्ति । किं कर्म कस्य दद्याम इत्येवंपराः सर्वदा भवन्ति । मा तावत् । नैवाद्य त्वया गन्तव्यम् । लवणं नास्ति चेत् यत् किमपि सा करोतु । गृहान्तरेषु यद्यन्नास्ति तस्य सर्वस्य सम्भरणं किं तव कर्म । पठ तूष्णीं गत्वा अन्यद्वा कुरु । नैव तु गन्तव्यम् ।

---

1 अपांनिधिरधिष्ठानमिति सहस्रनामसु । तदुपदेशः कृष्णावतारे भीष्मेण धर्मपुत्रं प्रति ।

II

कमला— (पुत्रं नाणुं प्रति) जात, याहि किञ्चित् । अनन्तरगृहे मामी दधि अपेक्षते । विचार्य क्रीत्वा दत्त्वा आगच्छ। साधुः समर्थो हि त्वम् ।

नाणुः— गच्छाम्ब । तव बुद्धिरेव नास्ति । तस्मिन् दिने किल मयि असन्निहिते तस्याः पुत्रः स वटुः लवणं ते क्रीत्वा नानयत् । सैव तं न गच्छेति प्रतिरुरोधेति श्रूयते । अद्य त्वमागत्य मां गन्तुमादिशसि तदर्थम् । किं लवणवत् दधि सुलभम् । आपणं गत्वा क्रीत्वा आनेयं लवणम् । तावदेव । न श्रमः कोऽपि । दधि तु वीथीं वीथीं गत्वा का विक्रीणीते कस्यामस्ति इति अटित्वा विचार्य क्रेतव्यम् । कियान् कालः स्यात् । पठितव्यं मे बह्वस्ति । याहि त्वमम्ब तूष्णीम् । यदा अहं तां द्रक्ष्यामि तदा तां स्पष्टं वक्ष्यामि—त्वं हि बहु सर्वेषामुपकरोषि । तदर्थमवश्यं मया ते उपकर्तव्यमिति ।

कमला—जात, नैवं ब्रूहि । सा चेत् नोपकरोति कामं न करोतु । अस्मानुपेत्य सा अर्थयते । तत्र यदस्माकं शक्यं तत् कर्तव्यम् । तस्या अनुपकारशीलत्वं दोष इत्येव हि त्वं मन्यसे । स दोषः किमस्मासु युज्यते । तद् गच्छ । अकुर्वतां कृत्वा शिक्षा कार्येत्याहुः ।

---

सर् मानियर् विल्लियम्स् नामा कोशकारः स्वकोशे शिक्षापदस्य दण्डरूपार्थम् (punishment) अभिधाय तत्रार्थे प्राचीनप्रयोगं प्रादर्शयत् ।
[ V.R.S.T.]

# पुस्तकपरामर्शः ॥

**रसमाधुरी ।** ओट्टूर् उण्णिनम्पूतिरिप्पाट्-प्रणीता ।
Thulaseevanam, Post. Mayanoor, Via Ottapalam (South Malabar) अत्र लभ्या । 1—0—0

स्तोत्रकाव्यमिदम् । भगवतः श्रीकृष्णस्य महिमानं रूपं लीलां चानु-नुभवितुं प्रवृत्तेन उत्तमगोष्ठीगणनीयेन कविना तन्मयीभूय रसाभिवर्षिभिः सर्वाकाररमणीयैः पद्यैर्गुम्फितम् । रसमाधुरी श्यामसुन्दरः गोपीभक्तिः इति पृथक् पृथक् कृतनामधेयैर्नवभिः प्रकरणैर्घटितम् ।

---

**हरस्तुतिः ।** गरिगपाट्युपाद्ध-लक्ष्मीकान्त M A., (Lecturer in Telugu and Sanskrit. Nizam College) कृता । 0—12—0

अत्र त्रिचत्वारिंशत् पद्यानि । काव्यलक्षणपूर्णानि तानि कर्तुः जन्म-सिद्धां कवित्ववासनां भगवति दृढां परिपाकवतीं च भक्तिं प्रकाशयन्ति ।

---

**शिशुजल्पनसाहस्री ।** श्रीललितादासविरचिता ।
V. R. Sastrulu and sons, 292, Esplanade, Madras.
1—8—0

ललितादेवीविषयाणि भूयिष्ठानि श्रीकृष्णविषयाणि च स्तोत्राणि इह सन्ति । कर्त्रा वास्तवं स्वनाम निगूहितम् । स्वोपास्यदेवताभक्त्यनु-गुणं तु नाम प्रकाशितम् । सर्वेषु स्तोत्रेषु पुराणच्छाया पुष्कला दृश्यते ।

> एतानि स्तोत्राणि ...श्रीमातुः एकान्तसन्तुष्टय एव कृतानि । तथापि मयि अभिमानयुक्तैः ...प्रेरितेन मया अयं ग्रन्थः मुद्रितः । अस्मिन् बहूनि अबद्धानि स्युः । तानि सर्वाणि पण्डितवर्याः क्षमया दर्श-येयुः ।

इति निरहङ्कारं कर्ता ब्रवीति । भक्तिमेकामत्र अनुभविष्यन्ति पण्डिताः । न शब्दादिविमर्श इति तु वयं पश्यामः ।

अद्य नास्तिक्यनष्टात्मनि लोके एवं ग्रन्थरचनपर्यन्तभक्तिप्रकर्ष-शालिनोऽपि केचन सन्तीति नूनं सात्त्विकाः प्रीयेरन् ।

---

# AN APPEAL

## To lovers of Sanskrit

—o—

We pray to the Indian Nation to accord to Sanskrit the honoured position which should be its, by:

(*a*) adopting it for specific purposes in the higher planes of Indian National life, as distinct from the popular use by the common citizens, and

(*b*) entertaining the practical and spiritual wisdom and the millenia old, yet young and virile tradition of unbroken civilized life recorded in it, as the unshakable foundation for our present and future national unity and stability and also by

(*c*) advocating such foundations to the Nations of the World as a dependable and effective basis for world amity and for enduring peace, prosperity and happiness among men.

To achieve this ideal, we suggest that the Dasara in the THIRD YEAR of our INDEPENDENCE (23rd Sep. to 1st Oct. 1949) be celebrated as a

SANSKRIT SEASON (GIRVANA-UTSAVA)

throughout India, in so far as Dasara is an All-India Festival dedicated to the worship of the Goddess of Learning and Culture.

Sri C. Jinarajadasa, Adyar.
His Excellency M. S. Aney, Patna.

.... .... .... ....

Dr. G. Srinivasa Murti, Director, Adyar Library,
Adyar, Madras.
Dr. C. Kunhan Raja, Curator, Adyar Library.

---

89

॥ श्रीः ॥

# उद्यानपत्रिका ॥

द्वाविंशवर्ष-

# विषयसूची ॥

—o◇o—

# UDYANA PATRIKA

[XXII Year]

## CONTENTS.

1 मेनका । 1, 25, 49, 73, 99.

2 सुभाषितनीवी । 5, 29, 53, 77, 103.

3 धर्मवीरता । 9.

4 नाटककथासारः । 11, 37, 62, 89. [T. Venkatacharya B. O. L.]

5 जाजलिचरित्रम् । 18. [V. R. S. Tatacharya]

---

स्वातन्त्र्योत्सवः ।

—:o:—

उपर्युपरि वैभवं विपुलमश्नुतां भारतं
परस्परहितैषिणो विगतमत्सरा मानवाः
अनर्घफलशालिनो विमलबुद्धयो जागृयुः
सदेति करुणानिधिं भजत राघवं सादरम् ॥

आर्. नरसिंहभट्टार्यः ।

988
TIRUPATI

6 प्रकृतिभेदः। 20, 70, 95, 123.
7 यथाभिमतम्। 21, 66, 92, 117.
8 वृक्षाः। 23.
9 स्वस्ति। 33.
10 गुरोः त्वङ्कारः स्वस्तवश्च वधः। 34 [V. R. S. Tatacharya
11 पूर्णत्वसंवादः (2)। 41. [T. E. Viraragavacharya]
12 अहिंसा। 45. [K. S. Ramaswami Sastri]
13 पुस्तकपरामर्शः। 48, 71, 96, 125.
14 राज्यतन्त्रम्। 57.
15 दिनचरी। 58.
16 धैर्यम्। 59. [V. R. S. Tatacharya]
17 प्रभातचिन्ताः। 64. S. Krishna, M. A.
18 राष्ट्रभाषा। 67, 81, [K. S. Ramaswami Sastri]
19 मिथ्यागौरवम्। 83.
20 केचन विशेषाः। 85. [V. R. S. Tatacharya]
21 गानम्। 94. [S. Krishna, M. A.]
22 संस्कृतसेवा। 107.
23 श्रीरुक्मिणीविवाहः। 110. [V. R. S. Tatacharya]
24 वाणिज्यम्। 115. [K. S. Ramaswami Sastri]
25 समुद्रवर्णनम्। 121. [T. E. Viraraghavacharya]
26 स्वातन्त्र्योत्सवः। 127. [R. Narasimha Bhattar]
27 विषयसूची। 127.

---

शास्त्रानुबन्धः।

कुवलयानन्दः - बुधरञ्जनीसमेतः। [253-292]

---